CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

व
३७१



CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

Registered under Act XXV. of 1867. (All Rights Reserved.)

BENARES SANSKRIT SERIES;

A

COLLECTION OF SANSKRIT WORKS:

EDITED BY THE

PANDITS OF THE BENARES SANSKRIT COLLEGE,

UNDER THE SUPERINTENDENCE OF

R. T. H. GRIFFITH, M. A., C. I. E.

AND

G. THIBAUT, Ph. D.

No. 86.

भेदधिक्कारः

श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमन्नृसिंहाश्रममुनिप्रणीतः ।

तदीयशिष्यश्रीनारायणाश्रमविरचितभेदधिक्कार-

सत्क्रियाख्यव्याख्यासनाथः ।

काशीस्थद्राविडोपाह्वपण्डितलक्ष्मणशास्त्रिणा विषमपदटिप्पणीपूर्वकं संशोधितः ।

BHEDADHIKKÂRA

BY

ŚREE NRISIMHÂŚRAMAMUNI,

With a Commentary by the Author's Pupil

Sree Narayanasrama.

EDITED AND ANNOTATED BY

PANDIT LAKSHMANA ŚASTRÎ DRÂVIDA,

PROFESSOR OF VEDÂNTA, CENTRAL HINDU COLLEGE, BENARES.

Fasciculus I.

BENARES.

Published by the Proprietors Messrs. Braj B. Das & Co.,

AND SOLD BY H. D. GUPTA,

Secretary, Chowkhamba Sanskrit Book Depot.

Printed at the Vidyâ vilas Press,

BENARES.

1904.

MUMUKSHU BHAWAN

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

॥ श्रीः ॥

सव्याख्यो भेदधिक्कारः प्रारभ्यते

वेदान्तवनसञ्चारिनीलाचलगुहाशयम् ।
ज्योतिर्विराजतेऽध्वस्तमायावरणवारणम् ॥ १ ॥

मृषामायाशक्त्याऽऽवृतमहिमनि ब्रह्मणि परे
जगज्जालं जातं स्फुरति वियतीवोरुनगरम् ।
विरिञ्चिश्रीशेशत्रिदशनरतिर्यग्गतभिदा
कुतोऽतो भूमाऽहं निरवधिसदानन्दघनचित् ॥ १ ॥
काशते कलितं यस्य पदं वैदिकमस्तकैः ।
भक्तमुक्त्यै समीहन्तं तं नृसिंहं गुरुं भजे ॥ २ ॥
गम्भीरभावभारेण दुर्वहा गौरवी कृतिः ।
तथापि भेदधिक्कारसक्रियां श्रद्धयाऽऽरभे ॥ ३ ॥

यद्यपि श्रुतिस्मृतीतिहासपुराणागमैः क्रियासमभिहारेण जगन्निदाने सर्वज्ञे परमात्मनि सजातीयादिसमस्तभेदो निन्दितो निषिद्धश्च यद्यपि चात्र भगवद्भिर्बादरायणभगवत्पादादिभिः पूर्वाचार्यैरारम्भणाधिकरणादिन्यायतोऽपि भेदसत्ता निराकारि, तथापि केचित्स्वोत्प्रेक्षापरिकल्पितपारिभाषिकयुक्तिकलापाकुलीकृतान्तःकरणा भेदसत्तां सम्भावयन्तो न श्रुत्यादिसिद्धाद्वितीयचिदात्मनि श्रद्धां बध्नन्ति अतस्तन्मोहशान्तये समस्तभेददुर्निरूपत्वप्रकटनाय ग्रन्थमारभमाणस्तत्परिसमाप्त्यादिफलकमीश्वरतत्त्वानुस्मरणं मङ्गलं मनसाऽनुष्ठितं शिष्यशिक्षार्थं प्रकटयन्प्रकरणविषयादिकं च सूचयन् स्मृतवस्तुस्वरूपं सलक्षणप्रमाणं निर्दिशति * वेदान्तेत्यादिना * ज्योतिः चित्प्रकाशः विराजते विविधनामरूपप्रपञ्चात्मना दीप्यते तेनाध्यस्तसमस्तप्रपञ्चात्मत्वापत्त्या तदधिष्ठानत्वं तत्तदवच्छिन्नस्फूर्तिमत्तया च

MUMUKSHU BHAWAN
श्री, काशी

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सर्वज्ञत्वमिति तटस्थलक्षणद्वयं सूचितं ज्योतिःपदोपात्तस्य चित्प्रकाशस्य सदानन्दात्मत्वेन श्रुतिन्यायाभ्यां निर्द्धारितत्वात्तेन सच्चिदानन्दरूपत्वं स्वरूपलक्षणमुक्तम् । ननु प्रपञ्चाधिष्ठानाचित्प्रकाशात्मत्वमात्रेण कथं ब्रह्मणः सर्वज्ञत्वं तदात्मत्वेऽपि जीवस्य तदभावादित्याशङ्क्य 'मायिनं तु महेश्वरं' 'योनिंयोनिमधितिष्ठत्येकः' 'विद्यावद्यं ईशते यस्तुसोऽन्यः' 'मयाऽध्यक्षेण प्रकृतिः सूयते सचराचरं' 'मायापरेत्यभिमुखे च विलज्जमाने' त्यादिश्रुतिस्मृतिभिरीश्वरस्य मायानियन्तृत्वावधारणात्तं प्रति तत्स्वरूपावरणानुपपत्तेस्तस्यैव सर्वज्ञत्वं जीवस्य तु तत्प्रतिबिम्बस्या 'नृतेन हि प्रत्यूढा' 'अनीशया शोचति मुह्यमान' इत्यादिवचनात् अविद्यावृतस्वरूपत्वादज्ञतैवेत्यभिप्रेत्याह * अध्वस्तेति * अध्वस्ताऽनादिकालमारभ्याखण्डदण्डायमाना या माया जीवपुरुषार्थाच्छादनेन तदनर्थहेतुभूता तत्कृतावरणस्य नितरां वारणं नित्यनिवृत्तिर्यस्मात्तत्तथा, मायाया अर्थाच्छादनेनानर्थोपस्थापकत्वमुक्तं श्रीभागवते 'ऋते ऽर्थं यत्प्रतीयेत न प्रतीयेत चात्मनि । तद्विद्यादात्मनो मायां यथाभासो यथा तम' इति। ध्वस्तेति वा च्छेदः स्वप्रकाशासङ्गचैतन्यस्य वस्तुतो मायां प्रत्याश्रयविषयत्वानुपपत्तेस्तदाश्रयविषयभूतवस्त्वन्तरानिरूपणाच्च तदपेक्षा माया न वस्तुसतीति तदिदमाह *ध्वस्तेति*नित्यनिरस्तसत्ताकेत्यर्थः । यद्वा मायावरणमेव वारणो मत्तगजः दुर्बलानां भयादिविक्षेपहेतुत्वात् स ध्वस्तः समूलमुन्मूलितः येन प्रत्यगात्मतया साक्षात्कृतेन तत्तथा, जडापि चरमसाक्षात्कारात्मिका वृत्तिर्यद्दुर्बलमवष्टभ्यात्यन्तनिरूढमप्यावरणं निवारयति तत्र तस्य काऽसम्भावनेति भावः। एवं शास्त्रीयलक्षणलक्षितं विषयभूतं वस्तु सप्रयोजनं निर्दिश्य प्रकरणनिष्पत्तिस्थानं सूचयन् प्राकृतजनस्यापि सुबोधायोपलक्षणान्तरमाह * नीलेति* नीलाचले या गुहावत् तत्त्वाभिव्यक्तिहेतुत्वाद् गुहा पुरुषोत्तमसिंहासनस्थानं तत्र शेते निरतिशयैश्वर्यशालितयाऽभिव्यज्यते इति तथोक्तं, तत्र प्राकृतानामपि प्रकाशमानज्योतिष एवेश्वरात्मत्वमुक्तं विष्णुपुराणे 'ब्रह्माक्षरमजं नित्यं यथाऽसौ पुरुषोत्तमः। तथा रागादयो दोषाः प्रयान्तु प्रशमं ममेति'। उक्तलक्षणे ब्रह्मणि प्रमाणाकाङ्क्षायामाह*वेदान्तेति* वेदान्ता एवानभ्यासिनां दुरवगाहित्वाद्वनमिव वनं फलवचनार्थवा-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

किं न त्वं नरसिंह एव यदि वा नाहं न नोचेत्कथं
बन्धो मय्यखिलेश्वरे त्वयि विभो किं नास्ति मत्तः परः॥

दादिफलपुष्पादियुक्तनानाशाखाकाण्डवल्लीसमुदायात्मकत्वाद्वा घनमिव घनं वेदान्तास्तदात्मत्वादुपनिषदां तत्त्वं तत्र सञ्चरणशीलं तदेकावगममिति यावत् अत्र घनपदेनोपनिषदां कार्त्स्न्यपरेण तासां ब्रह्मणि प्रामाण्यकारणं गतिसामान्यं सूचितम् । उक्तलक्षणे ब्रह्मणि प्रमाणान्तरानिरूपणा 'न्नावेदविन्मनुते तं बृहन्तं' 'नैषा तर्केण मतिरापनेया' 'सर्वे वेदा यत्पदमामनन्ति' 'तं त्वौपनिषद' मित्यादिश्रुतेश्च 'सत्यं ज्ञानमनन्तं ब्रह्म' 'यतो वा इमानि भूतानि जायन्ते' 'सदेव सौम्येदमग्र आसीदेकमेवा ऽद्वितीयं तदैक्षत बहु स्यां प्रजायेयेति' 'यः सर्वज्ञः स सर्ववि' दित्यादि समस्तवेदान्ता एवोक्तलक्षणे ब्रह्मणि प्रमाणमिति भावः । अत्र घनशैलगुहादिकीर्त्तनात्सिंहाकृति ब्रह्म स्वाभीष्टं द्योतितम् ॥ १ ॥

ननु समस्तभेदसत्त्वसाधनसमर्थेषु कणभुगादिमतानुवर्त्तिष्वभिनवतार्किकेषु जीवत्सु कथं वेदान्तानां स्वारस्यमात्रेण प्रत्यगभिन्नाद्वयब्रह्मणि प्रामाण्यं सिद्ध्येदित्याशङ्क्य सर्वज्ञेनापि परमेश्वरेण मां प्रति जीवपरादिभेदसत्त्वमशक्यं साधयितुमिति परमेश्वरेण सह विवादव्याजेन वदन्नन्यान्प्रति तन्निराकृतिः सुकरेति सूचयन्भक्तिभारनम्रेण चेतसा पुनस्तमेवानुसन्धत्ते *किं न त्वमित्यादिना* हे नरहरे आस्तां तावदन्यभेदसाधने मानं तवैव नाम निरुच्यमानं मदभेदं साधयतीत्याह किं न त्वं नरसिंह एवेति । नरसिंह एव न किमिति किमा नञर्थ आक्षिप्यते । तव नरसिंहनामधेयत्वस्य लोकवेदसिद्धत्वादभ्यर्हितकर्मधारयसमासात्मकनामनिर्वचनेन नृशब्दवाच्यस्य मम सिंहशब्दार्थत्वेन श्रुतिसिद्धेन त्वया सहाभेदप्रतीतेर्नावयोर्भेदः सन्नित्यर्थः । ननु नुः जीवस्य मदभेदे तव किमायातमित्यत आह *यदीति* अहं ना न किमित्यनुषङ्गः । मयि नृशब्दवाच्यजीवत्वस्यानुभवसिद्धत्वान्न तदपलापः कर्त्तुं शक्य इत्यर्थः । ननु त्वं नानेति न किं तु प्रमातृत्वकर्त्तृत्वभोक्तृत्वादिबन्धयुक्तत्वात्तव नित्यमुक्तेन मया सह भेद एव नाभेद इति शङ्कते *नोचेदिति* उक्तविधया ऽभेदो न चेदित्यर्थः । स्यादेतदेवं बन्धो मयि यदि वास्तवः स्या-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भूयादर्थवदात्मबन्धहर इत्याद्यं वचोपौरुषं
न त्वं ना तदहं त्वमेव नृहरे भूयासमात्मंस्त्वयि ॥२॥

त्स तु मुखप्रतिबिम्बादिगतश्यामतादिवदापौधिकभेदमुपजीव्य मयि कियन्तं कालं व्यवस्थितः अधुना श्रुतिन्यायादिना परमेश्वरात्मना निश्चिते मयि कथं वास्तवबन्धो घटेत अवास्तवेन च तेन कथमावयोः सत्यभेदसिद्धिरित्यभिप्रेत्याह * कथं बन्धो मय्यखिलेश्वरे त्वयीति* त्वयि मयीति सप्तम्यौ समानाधिकरणे । किं च विभुत्वप्रसिद्धिरपि तव सर्वभेदसत्तामपवदति निरवयवस्यासङ्गस्य वस्तुतः केनापि संयोगादेरसम्भवेन 'सर्वं समाप्नोषि ततोऽसि सर्वः' 'अन्तर्बहिश्च तत् सर्वं व्याप्य नारायणः स्थितः' 'सर्वाननशिरोग्रीवः सर्वभूतगुहाशयः । सर्वव्यापी स भगवांस्तस्मात्सर्वगतः शिवः' । 'महान्प्रभुर्वैश्वरूप' इत्यादिवचनसिद्धसर्वात्मत्वयोग्यत्वस्यैव विभुत्वादित्यभिप्रेत्य तत्त्वेन सम्बोधयति * विभो इति * ननु जीवानामनेकत्वादेकेन मया कथं तेषामभेद इत्याशङ्क्य तद्भेदोऽप्यवास्तव इत्याह * किं नास्ति मत्त इति * मदन्यो ना जीवः किमस्तिनास्त्येवेत्यर्थः। एतदतिरिक्तानि शरीराणि ममैव भोगसाधनानि शरीरत्वात् एतच्छरीरवत्, चैत्रमैत्रात्मानौ न वस्तुतः परस्परं भिद्येते उपाधिपरामर्शं विना भेदेनाविभाव्यमानत्वात् घटाद्याकाशवदित्यादिप्रयोगाद्विपक्षे कल्पनागौरवादिबाधकतर्कोपेतात् 'एको देवः सर्वभूतेषु गूढः' 'एक एव हि भूतात्मा भूते भूते व्यवस्थितः' 'आवभक्त च भूतेषु विभक्तमिव च स्थित'मित्यादिवचनाच्च जीवैकत्वसिद्धिः । न चैवं कर्तृत्वभोक्तृत्वव्यवस्थाया एकस्य सकलशरीरवर्त्तिसुखदुःखाद्यननुसन्धानस्य चानुपपत्तिः स्यादिति वाच्यम्। स्थूलसूक्ष्मशरीरद्वयभेदेनैव तदुपपत्तेर्वक्ष्यमाणत्वादिति भावः । ननु त्वत्कृतनामनिर्वचनमात्रं नावयोरभेदसाधकं तस्य पौरुषेयतया स्वार्थे मानान्तरापेक्षणात् भेदहेतोर्बन्धस्य सर्वजनीनत्वात् अबाधितत्वेन मिथ्यात्वायोगात्त्वदनुभवस्य च घटयक्षानुभववद्बन्धवैतथ्यासाधकत्वादित्याशङ्क्याह * भूयादर्थवदित्यादिना * स्वात्मबन्धहर इत्येतदाद्यं यस्य तदपौरुषं वचोऽर्थवद् भूयादित्यन्वयः । 'एष उ एव नृ एष हि सर्वत्र सर्वदा सर्वात्मा सिंहोऽसौ परमे-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्वरो ऽसौ हि सर्वत्र सर्वदा सर्वात्मा सन्सर्वमस्ति नृसिंह एवैकलः' 'उपद्रष्टानुमन्तैष आत्मा नृसिंहः चिद्रूप एवाविकारोऽनुपलब्धा सर्वत्रेत्यादिकं बहुव्रीहिपरिगृहीतम्। अयम्भावः, तापन्यां चतुर्थखण्डे एष उ एव नृपष इत्यादि श्रुतिवाक्यमपौरुषेयतया निरस्तसमस्ताप्रामाण्यशङ्कं पौर्वापर्य्यन्यायेन मानान्तरात्प्रबलं पदार्थद्वयप्रदर्शनपूर्वकं समानाधिकरणपदद्वयात्मकमहावाक्यात्मकनामनिर्वचनेन प्रत्यक्ब्रह्माभेदपरं न शक्यमन्यथयितुं।तदुक्तं तापनीयटीका(१)यां,मन्त्रराजमध्यगतनृसिंहपदेनैव च ब्रह्मात्मैक्यं प्रतिपत्तव्यमित्याह एषउ एव नृइत्यादिना । यदवादि प्रत्यगात्मनि सर्वजनीनो बन्धः सत्य इति तदसाधु, देहात्मभावस्यासत्यस्यापि सर्वजनीनत्वात् । किं च मन्त्रराजमध्यगनृसिंहपदार्थप्रकटनाय द्वितीयखण्डे नुर्जीवस्य स्वस्वरूपभूतस्य पिनर्थं बन्धं हन्तीति नृसिंह इति च व्युत्पत्तिमभिप्रेत्य स्वात्मबन्धहर इत्यभेदेनावगतस्य तव स्वात्मीयबन्धानिवर्त्तकत्वाभिधानाद् बन्धवैतथ्यं दुर्वारं न हि बन्धस्य सत्यत्वे प्रतीचस्त्वद्रूपत्वं बन्धस्य स्वात्मीयत्वं वा तस्य त्वज्ज्ञाननिवर्त्यत्वं वा सम्भवति नहि सत्यस्य शक्यं ज्ञाननिवर्त्यत्वं क्वचिद्दर्शयितुं एतदभिप्रेत्यार्थवद्भूयादित्युक्तं । तस्मान्नसत्यो बन्धो न वा भेद इति। नन्वहमपि सिंहाकृतिशरीरादिमत्वात्त्वदभिन्नत्वाच्च जीव एव स्यामिति कथं मद्भेदादिना बन्धो मिथ्येति तत्राह *न त्वं नेति*'यदा यदाहि धर्मस्य ग्लानिर्भवति भारत' 'अवजानान्त मां मूढा मानुषीन्तनुमाश्रित'मित्यादिभवदीयवचना'देष सर्वेश्वर एष भूताधिपतिः' ' अनश्नन्यो अभिचाकशीतीत्यादिवचनाच्च लोकानां भोगापवर्गार्थं लीलया नानावतारवत्यपि त्वयि जीवत्वसम्भावनायोगात् मय्यपि जीवत्वस्य प्रतिबिम्बत्वादिवदौपाधिकभेदेनैव व्यवस्थितत्वाच्च न सत्यत्वमिति भावः। एवं स्वाभेदमीश्वरेऽभि(२)धाय निःशङ्कं तमात्मत्वेन सम्बोधयन्नभेदमुपसंहरति * तदहमिति * तत् तस्मादित्यर्थः। तर्हि किं मम जीवमात्रत्वमित्याशङ्क्य न जीवस्यैवारोपितविपरीतरूपपरित्यागेन ब्रह्मरूपे पर्य्यवसानमित्याह *भूयासमिति *विधिवदावश्यकत्वादिदमन्यथयितुमशक्यमित्याशयेन विध्यर्थलिङ्प्रयोगः। अथवा उक्तविधया समस्तबन्धहरे परमेश्वरे त्वयि सति

---

(१) दीपकायामिति क पु० पा० । (२) प्रसाध्येति क पु० पा० ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

हृदयालयमालम्ब्यकरुणारससुन्दरम् ।
गुरूणां चरणाम्भोजं कुर्वे भेदस्य धिक्कृतिम् ॥३॥

अन्तःकरणातिरिक्तोऽहमिति प्रतीयमानो जीवः परस्मा-

मयि प्रातीतिकोपि बन्धः न युक्तः अतः तमपि निवारयेति प्रार्थयते * भूयासमिति * त्वय्येवान्तर्भूतः स्यामित्यर्थः ॥ २ ॥

इदानीं स्वसामर्थ्यनिदानं दर्शयन् चिकीर्षितं प्रतिजानीते *हृदयेति* गुरूणां श्रीचरणपरिचरणनैपुण्यपरिणतत्वादसाधारणस्वकीयविद्यादिसम्पत्तेः गुरुभिः कृतां करुणामारक्तत्वसुकुमारत्वादिमाम्भोजसदृशतच्चरणकृतां मत्वा करुणारससुन्दरमित्युक्तम् । भेदस्य धिक्कृतिर्नाम तुच्छीकरणं तच्च प्रामाण्यादिनिरासपुरःसरं तन्मिथ्यात्वसाधनं तदत्र प्राधान्येन क्रियत इत्यर्थः ॥ ३ ॥

यद्यपि स्वमते भेदमिथ्यात्व (१) साधनेनाद्वैतसिद्धौ श्रुतिरेव भगवती प्रमाणं तथापि न्यायमेव बहु मन्यमानं प्रति न्यायतः तावज्जीवपरभेदमिथ्यात्वं साधयति * अन्तःकरणेति * अहमिति प्रतीयमानः अहमिति वर्त्तमानव्यवहारहेतुप्रतीतिगोचरः जीवपदाभिधेयो जीवः परस्मान्न भिद्यते अव्यक्तात्परो योऽसंसार्य्यात्मा तत्प्रतियोगिकभेदात्यन्ताभावधानित्यर्थः। एतच्च स्वरूपेणैव स्वसंसृज्यमानाधिकरणनिष्ठात्यन्ताभावप्रतियोगित्वं मिथ्यात्वमिति मतेनोक्तं। अत्र कर्त्तृत्वादिधर्मिवाचकजीवपदवाच्यत्वमहमिति प्रतीयमानत्वं च वस्तुतः सिद्धान्तेऽहङ्कारेपीति तस्य पक्षत्वे बाधः स्यात्तद्वारणायान्तःकरणातिरिक्तेत्युक्तम । अन्तःकरणातिरिक्तो जीव इत्येतावत्युक्ते 'आमुक्तेर्भेद एव स्यात् जीवस्य च परस्यच। मुक्तस्य तु न भेदोस्ति भेदहेतोरभावत' इति मते मुक्तजीवे सिद्धसाधनं स्यात्परस्मिन्स्वप्रतियोगिकभेदाभावेन तदभिन्नजीवेपि तदभावात् तन्निरासायाहमिति प्रतीयमान इत्युक्तं। तदपीश्वरे परमतेऽस्तीति तत्र सिद्धसाधनतावारणाय जीव इत्युक्तं। स्वमते तु अन्तःकरणातिरिक्तोऽहमिति प्रतीयमान इत्येकः पक्षनिर्देशः अन्तःकरणातिरि-

(१) मिथ्यास्वेनेति क० पु० पा० ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

न भिद्यते चेतनत्वात्पदार्थत्वाद्वा ब्रह्मवत्, विपक्षे भेद-ग्राहकप्रमाणाभावादभेदश्रुत्यप्रामाण्यप्रसङ्गाच्च नाप्रयोजकत्वम्। तथा हि—

क्तो जीव इति चापरोऽभिप्रतः अत्रोक्तसाध्ये चेतनत्वादित्येव हेतुः परप्रतियोगिकभेदाश्रयस्यानात्मवर्गस्य कल्पितस्य कल्पितभेदाधिष्ठानत्वाभावेन तत्र तदत्यन्ताभावाभावात् पदार्थत्वादित्यस्य तत्र व्यभिचारापत्तेरहेतुत्वात्। तत्त्वमिति वाक्यस्थपदार्थत्वादिति वाऽयं हेतुः विवक्षितः ततश्चोक्तव्यभिचाराभावादत्रायमपि हेतु र्भवत्येव, यस्मिन्मतेऽधिष्ठानेपि सत्वावच्छिन्नत्वेनैवारोपितात्यन्ताभावो न स्वरूपेण यन्मते चाधिष्ठानमेवारोपिताभावः तत्र मतद्वयेपि परप्रतियोगिकस्वानधिकरणवृत्त्यत्यन्ताभावप्रतियोगिभेदवान्न भवति इति साध्यं विवक्षितम्। तत्र जीव इत्येव पक्षनिर्देशः यथाश्रुतपदार्थत्वादित्यपि हेतुः घटादेरपि पक्षसमत्वेन व्यभिचाराभावात् परप्रतियोगिकभेदवति जीवे स्वानधिकरणवृत्त्यत्यन्ताभावप्रतियोगित्वविशिष्टभेदनिषेधो भेदे विशेषणाभावेन पर्यवस्यति विशेषणाभावश्च भेदे स्वाधिकरणमात्रवृत्त्यत्यन्ताभावप्रतियोगित्वेन वा स्ववैय्यधिकरण्यानधिकरणात्यन्ताभावप्रतियोगित्वेन वेति भेदे तन्मतद्वयाभिमतमिथ्यात्वसिद्धिः। न चाधिष्ठानातिरिक्ताभाववादे जीवनिष्टपरभेदे स्वानधिकरणपरवृत्त्यत्यन्ताभावप्रतियोगित्वसत्वात्तदभावो बाधित इति वाच्यम्। तन्मते एकस्यैव भेदस्य विभागादिवद्धर्मिप्रतियोगिनिष्ठत्वेन तस्य तदनधिकरणत्वाभावात्। न चोक्तविशेषणविशिष्टभेदस्य निषेध्यस्योक्तमतद्वयाप्रसिद्धत्वेन तन्निषेधायोग इति वाच्यम्। परप्रसिद्ध्या परो बोधनीय इति न्यायेन तदुपपत्तेः। 'तद्धैक आहुरसदेवेदमग्र आसीदि'त्यादिना शून्यवादिमतसिद्धस्यासत्कारणत्वस्य निषेधाद्वेदवदेव वेदविदां व्यवहारस्य परभ्रान्तिनिवृत्तिमात्रप्रयोजनत्वादितिभावः। अप्रयोजकत्वेन व्याप्यत्वासिद्धिमाशङ्क्य परिहरति *विपक्ष इति* यदि भेदः सत्यः स्यात्तर्हि तत्प्रमाणतत्स्वरूपतद्धर्मिप्रतियोग्यादि निरूप्येत वक्ष्यमाणविधया च तदशक्यं निरूपयितुं तथा जीवपरभेदस्य सत्यत्वे तद्भेदश्रुतीनामप्रामाण्यं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मानाभावादयुक्तेश्च न भिदेश्वरजीवयोः ।
जीवानामचितां चैव नात्मनो न परस्परम् ॥ ४ ॥

अथ कथं भेदे मानाभावः ।

नाहमीश्वर इत्येतत्प्रत्यक्षं सर्वसम्मतम् ।
न भ्रान्तिर्बाधविरहान्न वा तद्धेत्वसम्भवः ॥ ५ ॥

अस्ति खल्वस्मदादिप्रत्यक्षं नाहमीश्वर इति तच्चाबाधि-

स्याद्भेदाभेदासम्भवस्य च वक्ष्यमाणत्वादित्यर्थः । प्रथमं तर्कस्य विपर्ययपर्यवसानं दर्शयन्भेदमात्रस्य सत्वासम्भवं साधयति *तथाहीति* अयुक्तेरिति* लक्षणाद्यभावेन तदनुपपत्तेरित्यर्थः। मानानुग्राहकयुक्त्यभावाच्चेति वा । सत्यानां परस्परभिन्नानां कथमेकेनेश्वरेण भेदाभाव इत्याशङ्क्य यद्यपि जीवाः स्वरूपेण सत्यास्तथापि तद्भेदोपि न वास्तव इत्याह *जीवानामिति* जीवानां परस्परमपि भिदा नेत्यन्वयः। जीवेश्वरयोर्जीवानां च स्वाभाविकभेदाभावेप्यौपाधिको भेदो वास्तवोऽस्त्वित्याशङ्क्य जडप्रपञ्चस्य स्वरूपेणापि मिथ्यात्वेन तद्भेदस्यापि तथात्वात्तत्प्रयुक्तचेतनभेदः कथं सत्यः स्यादित्यभिप्रेत्याह * अचितां चेति*अचितां जडानामपि परस्परमपि न भिदा जीवेश्वररूपादात्मनः सकाशादपि न भिदेत्यर्थः ॥ ४ ॥

विमतः भेदः न सत्यः अप्रमाणिकत्वादनुपपन्नत्वाद्वा देहात्मभाववदित्युक्ते हेतोरसिद्धिं शङ्कते * अथ कथमिति * तत्र तावदभावप्रत्यक्षत्ववादी मानान्तरवार्त्तानभिज्ञः, प्राक्तजनैरप्यनुभूयमानत्वाज्जीवेश्वरभेदस्य तत्र प्रत्यक्षमेव प्रमाणमित्युपपादयति * नाहमिति * सर्वसम्मतस्यापि भेदप्रत्यक्षस्य देहात्मभावानुभववत्परीक्षकानुभवबाधितत्वादप्रमाणत्वमित्याशङ्क्य तद्बाधकानुभवासम्प्रतिपत्तेर्मैवमित्याह * न भ्रान्तिरिति* तथापि तद्धेतोरिन्द्रियादेरसम्भवात्साभ्रान्तिरित्याशङ्क्याह *न वा तदिति* श्लोकस्य पूर्वार्द्धं विवृणोति *अस्तीति* प्रत्यक्षस्य व्यावहारिकभेदविषयत्वान्न तत्वावेदकत्वमित्याशङ्क्याह *तच्चेति* च शब्दोऽवधारणे तदबाधितमेवेत्यर्थः।तस्य किमभेदग्राहि प्रत्यक्षं बाध-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तं अहमीश्वर इत्यप्रतीतेः । ननु न तावदिदं चक्षुरादि-जन्यं आत्मनि तदसामर्थ्यात् मनसश्च प्रमाणान्तरसह-कारिणः पृथक्प्रमाणत्वायोगात् अतः क्लृप्तकारणा-भावात्सा भ्रान्तिरिति चेन्न । सुखाद्युपलब्धेः प्रमाणा-न्तराजन्यतया मनस एव तत्प्रमाणत्वे भेदस्यापि तत्प्र-

कमुतान्यत्, न द्वितीयः तदनिरूपणादित्यभिप्रेत्याद्यं निरस्यति *अ-हमिति* चतुर्थपादव्यावर्त्याशङ्कामाह *नन्विति* किमात्मनि ईश्व-रभेदप्रत्यक्षे बाहिरिन्द्रियं हेतुरुत मनः, नाद्यः बाह्येन्द्रियाणां रूपादि-रहितात्मग्रहणासामर्थ्येन तद्गतभेदग्रहेऽप्यसामर्थ्यादित्याह *न ताव-दिति* मनस्समवधानदशायामेवात्मभेददर्शनान्मन एव तत्र मान-मिति द्वितीयमाशङ्क्याह *मनसश्चेति* मनो न प्रमाणं प्रमाणस-हकारित्वात् प्रमाणत्वपर्यवसानाधिकरणसहकारित्वादित्यर्थः तत-श्च वाक्याद्यवयवपदादिषु न व्यभिचारः प्रमाणमपि प्रमात्रादिसह-कारीति तद्व्यावृत्तये प्रमाणेत्युक्तं । आ (१) लोकादिवद्विपक्षे चालो-कादेरपि परमते प्रमाणत्वप्रसङ्गः ततश्च मनसः क्वचिदप्यप्रमाणत्वाद्-न्यस्यात्मभेदग्राहिप्रत्यक्षस्याभावात् क्लृप्तकरणाजन्यत्वात्तत्प्रतीतिर्भ्रा-न्तिरित्यर्थः । प्रत्यक्षात्मविशेषगुणेषु मानान्तरस्याभावान्मनसस्तत्र प्रमाणत्वमावश्यकं ततश्चोक्तानुमानमप्रयोजकामिति जीवपरभेदेऽपि तस्यैव प्रमाणत्वान्न तत्प्रतीतिर्भ्रान्तिरिति स्वमतसिद्धवत्कारेण पूर्व-वादी परिहरति *न सुखेति* सुखादिप्रत्यक्षस्य जन्यत्वमेवासिद्धं वक्ष्यमाणविधया तत्र कादाचित्कत्वानुभवस्य साधनोपादानस्य च परमते सुखादिसमवाय इव सुखादिकादाचित्कत्वेनाप्युपपत्तेः सुखाद्युपाधिपरामर्शं विना तदनुभवे स्वतो भेदानवगमात् लाघवा-नुगृहीततदनुगतबुद्ध्या तदेकत्वसिद्धौ तन्नित्यत्वसिद्धेः न तस्य कारणापेक्षा आत्मनस्तु स्वसत्तायां संशयाद्यगोचरत्वेन स्वत एव प्र-काशमानत्वात्कर्त्तुः कर्मत्वविरोधाच्च तदनुभवेपि न मनः करणं ततश्च क्वचिदपि मनसः प्रमाणत्वाभावाद्भेदानुभवेपि तस्य तत्त्वम-

(२) अलोकादिवदिति क० पु० पा०

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

माणत्वात्।नन्वेवमप्यतीन्द्रियेश्वरभेदः कथं प्रत्यक्षः स्यात्प्रत्यक्षप्रतियोगिकाभावस्यैव प्रत्यक्षत्वादिति चेन्न। न हि प्रतियोगिप्रत्यक्षत्वमभावप्रत्यक्षत्वे तन्त्रं मनसि घटत्वाभावस्याप्रत्यक्षत्वात् घटे मनस्त्वाभावस्य प्रत्यक्षत्वाच्च किन्तु यत्र यत्सत्त्वमनुपलब्धिविरोधि तत्र तदभावः प्रत्यक्षः ततश्च जीवे तदभेदवदीश्वराभेदोऽप्यस्ति

युक्तमित्याद्यरुचिं सूचयन्मनसः प्रमाणत्वमङ्गीकृत्यापि प्रकारान्तरेण भेदप्रत्यक्षमाक्षिपति *नन्वेवमपीति* प्रतियोगितद्व्याप्येतरयावत्तदुपलम्भकसमवधानसहितानुपलम्भस्याभावग्राहिप्रत्यक्षसहकारित्वाभ्युपगमात्प्रतियोगिप्रत्यक्षत्वमभावप्रत्यक्षत्वे तन्त्रं अन्यथा घटादौ जलपरमाण्वाद्यभावस्य प्रत्यक्षत्वप्रसङ्गात्तथाचाप्रत्यक्षेश्वरप्रतियोगिकान्योन्याभावरूपभेदस्य प्रत्यक्षत्वं न सम्भवतीत्यर्थः। स्यादेतदेवं यदि प्रतियोगिप्रत्यक्षत्वमभावप्रत्यक्षत्वे प्रयोजकं स्यात्तत्त्वेतदस्ति तस्य तत्र प्रयोजकत्वं किं तद्व्याप्यत्वमुत तद्व्यापकत्वं नोभयमपि व्यभिचारादिति परिहरति *न हि प्रयोगीत्यादिना* उक्तव्यभिचारोऽसम्मत इति मन्वानं प्रति तमुपपादयन्नभावप्रत्यक्षत्वं प्रति समनियतं प्रयोजकमाह *किं तु यत्रेति* यत्राभावाधिकरणे यस्य प्रतियोगिनः तर्कितसत्त्वं तदनुपलब्धिविरोधित्वेन तर्कितुं शक्यते तत्र तदभावः प्रत्यक्ष एवं सति घटत्वस्य मनसि सत्त्वेपि मनसोऽतीन्द्रियत्वादतीन्द्रियगतजातेरपि मनस्त्ववदतीन्द्रियत्वेनानुपलम्भविरोधित्वाभावात्तत्र तदभावो न प्रत्यक्षः मनस्त्वस्य तु घटे सत्त्वे व्यक्तिग्राहकेन्द्रिययोग्यत्वनियमात्तद्गतजातेर्घटत्ववदेवानुपलब्धिविरोधित्वस्य सुवच(१)नत्वात्तदभावः तत्र प्रत्यक्ष एवेति भावः। फलितमाह *ततश्चेति* स्तम्भे पिशाचाभेदसत्त्वे स्तम्भाभेदवत्तस्याप्युपलम्भापातेनानुपलम्भविरोधित्वात्तदभावरूपः पिशाचभेदः स्तम्भे यथा स्तम्भः पिशाचो न भवतीति प्रत्यक्षविषयस्तथा जीवे ब्रह्मा-

(१) सुवचत्वादिति ख० पु० पा०।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चेत्प्रत्यक्षः स्यादिति तदनुपलम्भात्तद्भेदः प्रत्यक्षः ॥ ५ ॥

नन्वेवमप्ययमौपाधिक एव शरीरविशिष्टस्यैवेश्वरभेदानुभवादिति न भेदधीः प्रमा स्यादिति चेन्न, अहमिति

भेदसत्त्वे जीवाभेदवत्तदनुपलम्भायोगात्तत्र तदभावरूपो ब्रह्मभेदः प्रत्यक्षइत्यर्थः ॥ ५ ॥

अत्रेदं चिन्त्यं घटे मनस्त्वाभावानुभवः प्रत्यक्षो मनसि तु घटत्वाभावानुभवो न प्रत्यक्षः स्तम्भे पिशाचभेदः प्रत्यक्षः पिशाचे तु स्तम्भभेदो न प्रत्यक्ष इत्यादिव्यवस्था कथमिति । नह्यत्र किञ्चित्प्रमाणं शक्रेणापि शक्यं निरूपयितुम् पारिभाषिकप्रयोजकानुरोधेन तद्व्यवस्थायामतिप्रसङ्गात्, व्यवस्थितानुभवानुरोधेनैव तत्प्रयोजकस्य कल्प्यत्वाच्च, प्रत्यक्षगोचरस्तम्भाभेदे पिशाचेपि तत्प्रत्यक्षत्वापादनं सुकरमिति तत्रापि स्तम्भभेदः प्रत्यक्षः स्यात् न ह्यभेदरूपप्रतियोगिसत्त्वस्यानुपलम्भविरोधित्वापादनं धर्मिद्वारकमेव न प्रतियोगिद्वारकमिति शक्यं नि (१) रूपयितुं तद्धर्मिप्रतियोगिनोरेकत्वात् । किं च यद्यभावाधिकरणे प्रतियोग्यनुपलम्भो निश्चितः स्यात्तदा खलु तत्र तर्कितं तत्सत्त्वं तदनुपलम्भविरोधित्वेन शक्यं तर्कितुं तथा चानुपलम्भस्याप्युपलम्भाभावत्वात्तत्प्रतियोग्यनुपलभान्तरनिश्चये सति प्रत्यक्षेण तन्निश्चयो वाच्यः एवं तस्य तस्यापीत्यनवस्थानान्न कोऽप्यभावः प्रत्यक्षपद्धतिमध्यासीतेत्याद्यरुचिं सूचयन्नङ्गीकृत्याप्यौपाधिक एव जीवपरभेदः प्रत्यक्षगोचरो न स्वाभाविकः औपाधिकश्च भेदः स्वाभाविकाभेदेपि न विरुध्यते तस्य मिथ्यात्वादिति शङ्कते * नन्वेवमपीति * कृशोऽहमित्यादिप्रतीतिगोचरः कार्श्यादिर्यथा शरीराद्युपाधिकतयाऽऽत्मनि कल्पितः तथा नाहमीश्वर इति प्रतीतेरन्वयव्यतिरेकाभ्यां शरीरादिप्रतिभासाधीनत्वात्तद्गोचरो भेदस्तदुपाधिको न वास्तव इत्यर्थः । जाग्रत्स्वप्नयोरेकशरीरानवभासेऽप्यहम्प्रत्ययस्यैकरूपस्यानुवर्त्तमानत्वाद्विविक्तात्मैव तद्गोचरो वाच्यः तथा च तत्र प्रतीयमानभेदस्यौपाधिकत्वायोगात् स स्वाभाविक एवेत्यभिप्रेत्य परिहरति * न, अहमि-

(१) नियन्तुमिति ख० पु० पा०

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रत्यक्षस्य शुद्धात्मविषयत्वेन तत्प्रत्याय्यभेदस्याप्यनौपाधिकत्वादिति, मैवं—

अप्रमाणं मनोसक्तमयोग्यानुपलब्धिकम् ।

तीति * सिद्धान्ती मानाभावादयुक्तेश्चेत्येतदुपपादयितुं भेदस्य प्रत्यक्षप्रमाणगोचरत्वमुक्तं तावदयुक्तमित्याह * मैवमिति * चाक्षुषत्वावच्छिन्नज्ञानं प्रति लाघवेनालोकस्यानुकूलत्वनिश्चयेनालोकाभावे चाक्षुषत्वायोगादनुपलब्धेरेव तत्र प्रामाण्यमावश्यकमिति तस्या एव प्रत्यक्षत्वेनाभिमताभावमात्रे प्रामाण्योपपत्तेर्नान्योन्याभावात्मकभेदे प्रत्यक्षप्रामाण्यं युक्तमिति भावः । यदवादि सुखाप्रामाण्यमिति तदप्ययुक्तमित्याह * अप्रमाणमिति * नास्ति प्रमाणं यस्मिंस्तदप्रमाणं न हि परोत्प्रेक्षितेऽणुपरिमाणवति क्रमिककार्यजननसमर्थे मनसि किञ्चित्प्रमाणं शक्यं निरूपयितुं सर्वेन्द्रियेषु तत्तद्विषयसम्बद्धेषु युगपदनेकज्ञानोत्पत्तेः केषु चित्प्रज्ञावत्स्वनुभूयमानतया तदनुत्पत्तिरूपलिङ्गस्यासिद्धेः सिद्धौ वा ज्ञानाश्रयस्यैव लाघवेन क्रमजननसामर्थ्यकल्पनया तदुपपत्तौ तत्समर्थधर्मिकल्पने गौरवात् शब्दादिज्ञानक्रमनियमस्य मनसः परमते श्रोत्रादिसंयोगनियमवद्दृष्टादेवोपपत्तेः सुखाद्यनुभवस्य च नित्यतया करणानपेक्षाया वक्ष्यमाणत्वात्कुतः परकीयमनःसिद्धिः कुतस्तरां तस्य प्रामाण्यं कुतस्तमां चात्मभेदस्य प्रत्यक्षप्रमाणगोचरतेति भावः । यद्वा श्रुत्यनुभवसिद्धमनसोऽङ्गीकारेऽपि क्वापि न तत्प्रमाणमित्याह * अप्रमाणमिति * मनो न प्रमाणं ऐन्द्रियकविशेषगुणजातीयानाश्रयद्रव्यत्वाद्दिक्कालवत् । अत्र परं प्रति विशेषगुणानाश्रयद्रव्यत्वादित्येव हेतुः । स्वमनसाधारण्यनासिसिद्धिपरिहारायैन्द्रियकेत्यादिविशेषणम् । अथवा आत्मतद्धर्मगोचरानीश्वरसाक्षात्कारो न विशेषगुणशून्यप्रमाणजन्यः साक्षात्कारत्वात्सम्मतवत् ततश्च मनसोऽन्यत्राप्रसङ्गान्न क्वापि प्रामाण्यमिति सिसिद्ध्यति विपक्षे ग्राह्यसजातीयगुणानाश्रयस्यापि ग्राहकत्वे श्रोत्रादीनां नभस्त्वादिकं न सिद्ध्येदिति भावः । किं च मनो न भेदादौ प्रत्यक्षं प्रमाणं तदसन्निकृष्टत्वात् सम्मतवत् । न च हेत्वसिद्धिर्निरवयवात्मनि मनसः प्रदेशवृत्तिसंयोगासम्भवस्य वक्ष्यमाणत्वात्त-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सोपाधिकस्थो भेदो ऽयं नाध्यक्षमितिगोचरः ॥६॥

प्रमाणसहकारित्वाद्विषयस्याप्यभावतः ।

न प्रमाणं मनोऽस्माकं प्रमादेराश्रयत्वतः ॥ ६ ॥

मनो न प्रमाणं प्रमाणसहकारित्वात् कालादिवत्, प्रमा-

द्धटितसम्बन्धान्तरस्याप्ययोगाद्युतसिद्धयोः समवायाभावादनवस्थाद्यापातेन तस्य (१) काप्यसम्मतत्वाच्च विशेषणतादेः सन्निकर्षत्वेन काप्यक्लृप्तत्वाच्चेत्यभिप्रेत्याह * असक्तमिति * किं चाभावग्राहकप्रत्यक्षसहकारितया पराभ्युपेतयोग्यानुपलम्भाभावाच्च न मनोऽभावरूपात्मभेदग्राहकं न च हेत्वसिद्धिः त्वन्मते सर्वगतात्माभेदस्येव ब्रह्माभेदस्य परिच्छिन्नत्वादिभ्रमहेतुदोषादात्मनि सतोऽप्यनुपलम्भोपपत्तेर्विशुद्धचित्तस्य तु तदनुपलम्भोऽसिद्ध इत्यभिप्रेत्याह * अयोग्यानुपलब्धिर्कामिति * किं च स्थूलसूक्ष्मशरीरोपाधितादात्म्यापन्नात्मगततया भेदप्रतीतेर्वक्ष्यमाणत्वात्तस्य च रजततादात्म्यापन्नशुक्तीदमंशगतशुक्तिप्रतियोगिकभेदवन्न प्रत्यक्षप्रमितिगोचरतेत्याह * सोपाधिकस्थ इति * ॥ ६ ॥

पूर्वोक्तहेत्वतिरिक्तहेतून् सङ्गृह्णन् मनसोऽप्रमाणत्वमुपपादयति * प्रमाणेति * विषयस्येत्यनन्यथासिद्धप्रमेयशून्यत्वादित्यर्थः । प्रमादेरित्यत्रादिपदार्थं इच्छादि, मनो न प्रमाकरणं तदाश्रयत्वात् प्रमातृत्ववत् स च केवलान्तःकरणातिरिक्तस्तत्तादात्म्यापन्नः सिद्धान्तेऽप्यस्तीति न दृष्टान्तासिद्धिः नापि परमते परमेश्वरे व्यभिचारः । न च प्रमाद्याश्रयत्वस्य मनस्यसिद्धिरिति वाच्यं। अहमुपलभे इत्याद्यनुभवेन ' तयोरन्यः पिप्पलं स्वाद्वत्तीति सत्वं ' ' कामः सङ्कल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एवे'त्यादिश्रुत्या बुद्ध्यादिगुणलिङ्गकपरिशेषानुमानेन च प्रमादेरहङ्कारात्मकमनोधर्मत्वस्य वक्ष्यमाणत्वादिति परमते मनसः प्रमाणत्वं प्रमाणाभावात्पारिभाषिकम् । अस्मिन्मते तु तदप्रमाणत्वमनेकप्रमाणसिद्धं न पारिभाषिकमिति भावेनास्माकमित्युक्तम् । पद्यस्याद्यपादं विवृणो-

---

(१) तस्य समवायस्य

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

णस्य चक्षुरादिवत्प्रमाणान्तरासहकारित्वात् बाधकस्य तत्प्रयोज्यजातिविशेषस्यात्रापि तुल्यत्वात् न हि चक्षुरादिजन्यरूपादिज्ञाने मानसत्वं कश्चिदनुभवति । न चाननु-

ति * मनो नेति * ननु न तावत्सकलप्रमाणसहकारित्वं हेतुः परमते मनसोपि प्रमाणत्वेन तत्र तत्सहकारित्वस्यासिद्धेः । नापि स्वव्यतिरिक्तसकलप्रमाणसहकारित्वं स्वव्यतिरिक्तत्वविशेषणस्य व्याप्तिग्रहानुपयुक्तत्वेनासिद्धिपरिहारमात्रप्रयोजनस्याप्रयोजकत्वात् । नापि किञ्चित्प्रमाणसहकारित्वं हेतुः एकत्र प्रमाणभूतस्याप्यन्यत्र प्रमाणसहकारित्वोपपत्तेरप्रयोजकत्वात् । अत एव सकलप्रमाजनकत्वं हेत्वर्थः इति निरस्तमिति तन्न । किञ्चित्प्रमाणसहकारित्वस्यैव हेतोर्विवक्षितत्वात् । यदुक्तं तस्याप्रयोजकत्वमिति तत्राह * प्रमाणस्येति * प्रमाणत्वपर्यवसानाधिकरणस्येत्यर्थः । यदि मनः प्रमाणं स्यात्तर्हिचक्षुरादिवत्प्रमाणसहकारि न स्यादिति हेतूच्छित्तिरेव विपक्षे बाधिकेति नाप्रयोजकतेत्यर्थः । ननु गन्धादिज्ञानेष्वयोग्यत्वादेव चक्षुरादेर्न सहकारित्वं तत्सन्निकृष्टार्थविशेषविषयशाब्दबोधादौ चाक्षुषत्वादिजातिविशेषापत्तिश्चक्षुरादिजन्यत्वे बाधिकेति न तच्चक्षुरादिसहकारीति वैषम्यमाशङ्क्याह * बाधकस्येति * रूपादिज्ञानस्य मनःकरणकत्वे सुखादिज्ञानवत्तत्रापि मानसत्वरूपजातिविशेषापत्तिर्बाधिकेति तुल्यतेत्यर्थः । इष्टापत्तिमाशङ्क्याह * न हीति * चाक्षुषादिज्ञाने मानसत्वरूपजातिविशेषः किमनुभवबलादभ्युपेयते उत मानान्तरात्, नाद्यः तत्र तदनुभवस्यानुपलब्धिपराहतत्वात् । वैशेषिकादिमते व्युत्पन्नैः सोऽनुभूयते इति चेन्न । वादिपरिकल्पितानुभवमात्राद्वस्तुसद्भावातिप्रसङ्गात् । न द्वितीयः रूपादिज्ञाने मानसत्वजातिसाधकमानान्तरानिरूपणात् । न च मनःकरणकत्वादेव तत्र मानसत्वसिद्धिरिति वाच्यम्। हेतोरसिद्धत्वादन्योन्याश्रयात् । ननु सुखादिज्ञाने मनःकरणकज्ञानत्वान्मानसत्वं सिद्धं ततश्च कल्पितत्वान्मनसो रूपादिज्ञानेपि करणत्वं तथा च मनःकरणकज्ञानत्वान्मानसत्वसिद्धिरिति चेन्न । सुखादिज्ञानेऽपि मनःकरणकत्वस्य मानसत्वस्य च निराकरिष्यमाणत्वात् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भूयमानजातिविकल्पने किञ्चिन्मानमस्ति मनःप्रमाणत्वा-
भावस्याबाधितानुमानेन निश्चित्वात् । मनसः सर्वज्ञा-
नकरणत्वे तदेव सर्वत्र प्रमाणम् चक्षुरादित्वालोकादि-
वत्सहकारिमात्रमित्येककरणतापत्तिः । ननु सुखादिप्रत्य-
क्षस्य परिशेषान्मन एव करणं एवं मनसा इदं पश्यामीत्य-

प्रत्युत वैपरीत्ये प्रमाणस्य निरूपितत्वादित्याह * मनः प्रमाणत्वेति * विपक्षे बाधकान्तरमाह * मनस इति * सर्वत्रान्तर्बहिर्विषयेषु मनस एव प्रमाणत्वे बहिर्विषयप्रमायामपि तदेव करणं स्यादिति । ननु चक्षुरादेः किं प्रयोजनं रूपादिज्ञाने चाक्षुषत्वादिजातिर्वा कथं स्यादित्याशङ्क्याह * चक्षुरादि त्विति * रसादिव्यञ्जकलालादिरालोकादीत्यादिपदार्थः । रूपादिज्ञाने क्रियात्वप्रयुक्तकरणाकाङ्क्षाया मनसैव शान्तत्वात् चक्षुरादेरालोकादिवन्मनःसहकारित्वमात्रत्वं यद्यमाधारणकारणप्रयोज्यैव जातिर्ज्ञाने तर्हि ज्ञाने चाक्षुषत्वादिजात्यभाव इष्ट एव । न च तदभावे चक्षुरादिजन्यत्वमालोकादिजन्यत्वं वा तत्र दुर्ग्रहमिति वाच्यम् । रूपादिविषयसाक्षात्कारत्वादिना तद्ग्रहोपपत्तेर्गौरवस्य प्रामाणिकतया अदोषत्वात् । न च ज्ञानाकरणत्वे चक्षुरादेरिन्द्रियत्वानुपपत्तिरितिवाच्यम् । शरीरसंयुक्तत्वेन ज्ञानकरणत्वादिना स्मृत्यजनकज्ञानजनकमनःसंयोगाश्रयत्वादिना वा तदुपपत्तेः । अत एव मनसो बाह्यप्रमाजनकत्वे यदेवासाधारणकारणं सहकारि तत्प्रमाणान्तरमिति निरस्तम् । आलोकादौ व्यभिचारादिति भावः । सुखादिसाक्षात्कार इन्द्रियजन्यः जन्यसाक्षात्कारत्वात् रूपादिसाक्षात्कारवत् ततश्चक्षुरादीनां व्यवस्थितरूपादिविषयत्वादेकैकाभावेऽप्यन्धादिषु सुखाद्युपलब्धिदर्शनाच्च परिशेषात्तदतिरिक्तमनःप्रमाणसिद्धिरिति शङ्कामनुवदति * ननु सुखादीति * न केवलं सुखाद्युपलब्धावेव मनः करणं किन्तु रूपादिज्ञाने (१)ऽप्यनुभवोपपत्तिभ्यां मनसः करणत्वमुपेयमित्याह * एवं मनसेति * व्यासङ्गो हीन्द्रियसन्निकर्षादौ सत्यपि सन्निकृष्टविषयज्ञानानुदयः सर्वस-

(१) रूपादिज्ञानव्यासङ्गानुपपत्तिभ्यामिति (ख०) पु० पा० ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नुभवात् व्यासङ्गानुपपत्तेश्च बहिरपि मनःकरणमिति चेन्न। सुखादिव्यवहारः स्वविषयज्ञानजन्यः व्यवहारत्वात्सम्म-

म्मतः तस्य चेन्द्रियेण सह संयोगरूपमनोव्यापाराभावमात्रप्रयोज्यत्वान्मनसो बाह्यज्ञानकरणत्वमणुत्वं चोपेयम् । न च ज्ञानान्तरसामग्रीप्रतिबन्धादेव तदुपपत्तिरिति वाच्यम् । विनिगमकाभावात् । करणव्यापाराभावादेव तदुपपत्तौ प्रतिबन्धकल्पनायोगाच्चेति भावः। सुखादिप्रत्यक्षस्य मनः करणमिति एतत्तावदयुक्तमिति दूषयति * नेति * सुखादिसाक्षात्कारस्येन्द्रियजन्यत्वे सिद्धे हि परिशेषान्मनस्तत्करणतया सिद्ध्येत् न चोक्तानुमानात्तत्सिद्धिः शब्देतरोद्भूतविशेषगुणानाश्रयत्वं सति ज्ञानजनकमनःसंयोगाश्रयत्वमिन्द्रियत्वमिति परेषामभ्युपगमान्मनसः सिद्धेः पूर्वमिन्द्रियत्वासिद्धौ इन्द्रियजन्यत्वानुमानायोगात् । न च शरीरयुक्तं ज्ञानकरणमतीन्द्रियमिन्द्रियमिति नोक्तदोष इति वाच्यम् । चक्षुरादेस्तेन रूपेण रूपादिसाक्षात्कारजनकत्वस्याक्लृप्तत्वेन सुखादिसाक्षात्कारकरणस्य तेनाकारेणानुमानायोगात् परमते शरीरगतशैत्याभिव्यञ्जकव्यजनपवनादाविन्द्रियलक्षणस्यातिव्याप्तेर्वक्ष्यमाणविधया मनसो ज्ञानकरणत्वासम्भवेनाव्याप्तेश्च । नापीन्द्रियत्वं जातिस्तेजस्त्वादिना साङ्कर्यात् ।न च तत्तद्व्याप्यमिन्द्रियत्वं नाना, इन्द्रियपदस्यानेकार्थत्वप्रसङ्गात् जन्यसाक्षात्कारमात्रेऽनुगतव्यापकाभावेन व्याप्तिग्रहायोगाच्च । ननु सुखाद्युपलब्धेः करणजन्यत्वमात्रं साध्यं ततो नोक्तदोष इति चेत् न, तथासति धर्मकल्पनालाघवेन देहादेरेव कस्य चित्करणत्वकल्पनोपपत्तेरर्थान्तरत्वात्करणव्यापारस्य करणान्तराजन्यतया कार्यमात्रस्य करणजन्यत्वानियमेनाप्रयोजकत्वाच्चेति भावः । किञ्च सुखादिसाक्षात्कारे जन्यत्वासम्प्रतिपत्तेर्विशेषणासिद्धो हेतुः तदुत्पत्त्याद्यनुभवस्यान्यथासिद्धेरनुपदमेव वक्ष्यमाणत्वात् प्रत्युत सुखादिसाक्षात्कारस्यानुमानादिनैकत्वसिद्धौ तदजन्यत्वमेव प्रामाणिकमित्याह * सुखादिव्यवहार इति * स्वविषयस्य ज्ञानं स्वविषयज्ञानं तज्जन्य इत्यर्थः । * व्यवहारत्वादिति * अर्थज्ञापनेच्छाधीनजडव्यवहारत्वादित्यर्थः तथा च सुप्तप्रलापादिव्यवहारे सुखादिसाक्षात्कारव्यवहारे च न व्यभिचारः । ननूक्तहेतोर्जनकज्ञानैकत्वेन व्याप्त्यभावात् कथं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तवदित्यनुमानाल्लाघवाच्च तदेकं सिद्धं । न च दुःखादि-
प्रत्यक्षस्योत्पादविनाशानुभवविरोधः, दुःखादौ पृथक् तदु-
त्पत्तिविनाशानुभवयोरभावेन दुःखज्ञानं नष्टमित्याद्यनु-
भवस्य विषयविनाशादिमात्रविषयत्वात् । न च विनिग-
मकाभावः, सुखाद्यनुभवदशायां दुःखाद्ययोगात्प्रमाणा-

तदेकत्वसिद्धिरित्यतआह * लाघवादिति * क्षितिकर्त्रनुमानाल्लाघ-
वानुगृहीताद्यथा तदेकत्वसिद्धिस्तथा व्यवहारलिङ्गादपि लाघवानु-
गृहीतात् तज्जनकज्ञानैक्यं तव कथं न सिद्ध्येदिति भावः।सुखादिसाक्षा-
त्कारानुगतबुद्धिरपि स्वतो व्यक्तिभेदानिश्चयाल्लाघवात्तदेकत्वे प्रमा-
णमिति चार्थः।ननु दुःखप्रत्यक्षसमये सुखप्रत्यक्षनाशानुभवादर्थात्तत्प्र-
त्यक्षभेदसिद्धेरनुमानादेरनुभवबाध इति नेत्याह * नचदुःखादीति *
किं दुःखाद्युत्पत्त्याद्यनुभवसमय एव तत्साक्षात्कारोत्पत्त्याद्यनुभूयत
उतसमयान्तरे, न द्वितीय इत्याह*दुःखादौ सतीति*यथा घटे सत्ये-
वानन्तरं तज्ज्ञानस्योत्पत्त्याद्यनुभूयते नैवं दुःखादौ सति तत्साक्षात्का-
रोत्पत्त्याद्यनुभूयत इत्यर्थः । प्रथमे तूत्पादविनाशानुभवस्य दुःखाद्युप-
हितप्रत्यक्षगोचरतया तद्विशेषणीभूतदुःखादेरेव स्वाभाविकनाशा-
दिविषयत्वेनापि तदुपपत्तेर्न तद्विरोध इत्याह * दुःखज्ञानमिति *
दुःखादिदशायामिदानीं साक्षात्कारो नेति स्वरूपेण तन्नाशाननु
भवात् परैर्विशिष्टनाशानभ्युपगमाच्च विशेषणीभूतदुःखादिनाशादि-
रेव रूपसम्बधो नष्ट इत्यादौ श्यामतादिनाशादिवदनुभूयत इत्यर्थः ।
ननु दुःखाद्यनुभव एव स्वत उत्पत्त्यादिमाननुभूयते दुःखादौ तु त-
दुपाधिकोत्पत्याद्यनुभव इति वैपरीत्यं किं न स्यादिति तटस्थशङ्कां
निराकरोति * न चेति * स्यादेतदेवं यद्यनुभवस्वरूपवत्सुखाद्य-
नुभवसमये दुःखाद्यनुवर्त्तेत न त्वेतदस्ति तदा तदननुभवात् दुःखा-
दितारतम्यस्य साधनतारतम्याधीनतया स्वत एव तदुत्पत्त्यादेराव-
श्यकत्वाच्चेत्याह * सुखाद्यनुभवेति * ननु सिद्धान्ते सुखस्य नि-
त्यत्वेऽपि साधनतारतम्यादिना तदभिव्यक्तिमात्रस्य तारतम्यमा-
श्रीयते तथा दुःखादावपि किं न स्यादित्याशङ्क्या'नन्दाद्येव खल्विमा-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भावाच्च, बुद्ध्यादिगोचरनित्यसाक्षात्कारस्यैकस्यानभ्युपगमे बुद्ध्यादेर्नियमेन मनसा ग्रहासम्भवेन तद्दशायां मयेदमनुभूयते न वा इदानीं इदं इच्छामि न वेत्यादिसंशयः स्यात् ग्राह्यानिश्चयव्यतिरिक्तसंशयसामग्रीसत्वात्

नि भूतानि जायन्ते' 'यदेष आकाश आनन्दो न स्यात् 'विज्ञानमानन्दं ब्रह्म'त्यादिश्रुतिभिः परमप्रेमास्पदत्वलिङ्गेन सौषुप्तिकसुखानुभवेन च नित्यात्मन एव सुखत्वावधारणात्सुखस्य नित्यत्वे न तदभिव्यञ्जकवृत्तेरेव साधनपारतन्त्र्यादि युक्तं दुःखादेस्तु नित्यत्वेन किञ्चिन्मानमस्तीति स्वत एव तदुत्पत्त्यादिमदिति वैषम्यमभिप्रेत्याह * प्रमाणाभावाच्चेति * एवं तावज्जडात्मकबुद्धीच्छादिगोचरसाक्षात्कारनित्यत्वे बाधकाभावमुपपाद्य तदुत्पत्त्याद्यभ्युपगमे बाध(१)माह*बुद्ध्यादिगोचरेति * बुद्ध्याद्युत्पत्तिसमनन्तरमेव किं त्वयेदानीमिदं बुद्धं तवेदमिष्टं वेत्यादि परेण पृष्टस्य स्वबोधादौ न संशय इति सर्वजनीनं स च नियमेन संशयाभावो ग्राह्यानिश्चयनिर्वाह्यः इतरथा ग्राह्यानिश्चयादिसंशयसामग्रीसत्वेन तदभावानुपपत्तेः बुद्ध्याद्युत्पत्यनन्तरं च नियमेन मानसतन्निश्चयोपगमे मानसज्ञानान्वस्था स्यात् न स्याच्चेष्टानिष्टज्ञानादिना सुखदुःखाद्युत्पत्तिः, अत एव बुद्ध्यादीनां स्वप्रकाशत्वं कल्प्यते इति चेन्न। लाघवेन तद्गोचरचिदात्मन एकस्यैव स्वप्रकाशत्वे (२) तदुपपत्तौ बुद्ध्याद्यनन्तकार्यस्वप्रकाशत्वकल्पने गौरवात् इच्छादेरपि सविषयस्यार्थप्रकाशत्वप्रसङ्गेन बुद्धिवैजात्यायोगाच्च तस्माद्बुद्ध्यादिगोचरनित्यसाक्षात्कार एकोऽभ्युपेय इति भावः। किं च स्वप्ने बाह्येन्द्रियाणामुपरतत्वान्मनसश्च बहिरस्वातन्त्र्यात्तदा गजरथादेरपरोक्षतया सर्वानुभवसिद्धत्वात्तत्साधकनित्यानुभवोऽभ्युपेयः तथा सुप्तोत्थितस्य सुखमहमस्वाप्समिति परामर्शदर्शनात्स्वापे तन्मूलानुभवो नित्योऽभ्युपेयः तत्र सर्वेन्द्रियाणामुपरतत्वेन सुषुप्तिभङ्गप्रसङ्गेन 'न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते' इति श्रुत्या चा-

(१) बाधकमिति ख० पु० पा०।
(२) स्वप्रकाशत्वेनेति ख० पु० पा०।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ततश्चावस्थात्रयानुयायिदुःखादिसाक्षात्कारस्य नित्यत्वान्न तत्र मनः करणं, मनसेदं पश्यामीत्यनुभवोपि तदावयोर्मनो जानातीत्यनुभवा'त्कामः सङ्कल्पः' इत्यादिश्रुत्या च दर्शनाद्युपादानस्यापि मनस आत्मनि दर्शनाद्यारोपनिमित्तत्वान्न विरुद्ध्यते, व्यासङ्गस्त्वात्मनि परस्य क्रमज्ञा-

नित्यज्ञानायोगात् ततश्च मनोग्राह्यतया शङ्क्यमानसमस्तभावाभावसाक्षिणोऽवस्थात्रयानपायिनो नित्यानुभवादेव सर्वव्यवहारसिद्धेर्न क्वापि मनः प्रमाणमित्युपसंहरति * ततश्चेति * मनसोऽकरणत्वे मनसेदं पश्यामीत्यनुभवो 'मनसा ह्येव पश्यतीति' श्रुतिश्च विरुद्ध्येयातामित्याशङ्क्याह * मनसेदमिति * मनसेदं पश्यामीत्यनुभवोऽपिशब्दोपात्तोक्तश्रुतिश्च न विरुद्ध्यत इत्यन्वयः । तत्र हेतुः * मनस इति * अयसि दग्धृत्वारोपे यथाऽग्निर्निमित्तं तथाऽऽत्मनि प्रमातृत्वारोपे तदुपादानस्यापि मनसो निमित्तत्वान्मनसा पश्यामीत्यादिव्यवहार इत्यर्थः । नन्वनुभवाद्यनुरोधाद्बुद्ध्यादौ मनसः करणत्वमेव किं न स्यादित्याशङ्क्य तस्य ज्ञानाद्याश्रयत्वस्यानन्यथासिद्धानुभवागमाभ्यामवसितत्वान्मनसः प्रमातृत्वमेवोपेयमित्याह * तदावयोरिति * तादिति ज्ञेयमुच्यते आवयोर्मन इति प्रत्येकं मनः परं त्वन्मनो मन्मनश्च जानातीत्यर्थः । यदप्यवादि व्यासङ्गानुपपत्त्या बाह्यविषयज्ञानकरणं मन इति तत्परमतेऽन्यथैवोपपत्त्या निराकरोति * व्यासङ्गस्त्विति * चोऽवधारणे, परमते हि प्रथमज्ञानसमये धारावाहिकद्वितीयादिसमस्तज्ञानसामग्र्यां सत्यामप्यात्मनि क्रमजननशक्त्यैव ज्ञानोत्पादक्रमस्य निर्वाह्यत्वादन्यथा धर्मधर्मिकल्पनागौरवात् ततश्च तथैव व्यासङ्गोपपत्तौ न क्रमजननशक्तिमन्मनःकरणं कल्प्यमित्यर्थः । सिद्धान्ते तु बुभुत्साघटितज्ञानान्तरसामग्रीप्राबल्येन तत्प्रतिबन्धादेव युगपच्छ्रोत्रसमवेतानेकशब्दाग्रहणवत् क्वचिन्मनःसङ्कोचादिन्द्रियसंयोगाभावाद्वा व्यासङ्गोपपत्तिरिति भावः । किं च यद्यहमनुभवगोचरोऽहङ्कार एवात्मा स्यात्तर्हि तदतिरिक्तं पराभिमतज्ञानकरणं मनः सिद्ध्येदपि नत्वेतदस्ति श्रुतिस्मृतिन्यायैरह-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नजननशक्त्याऽन्यथा चोपपद्यते इति न ततो ऽपि मनः करणं। किं चाहमित्यनुभवस्यान्तःकरणविषयत्वं वक्ष्यते ततश्चाहं जानामीत्यहङ्कारधर्मतयाऽनुभूयमानं ज्ञानादि तद्धर्मएवेति न तत्र मनः करणमिति तन्न भेदे प्रमाणम् ॥ ७ ॥

किं च मनो न भेदे प्रमाणं तदसन्निकृष्टत्वात्सम्मतवत्, न चासिद्धिः।

संयोगादेरयुक्तत्वात्तदन्यस्याप्रसिद्धितः।
सन्निकर्षस्य तेनेदं भेदासङ्ग्येव मानसम् ॥८॥

मनसो भेदेन संयोगसमवायतादात्म्यानामन्यतमो नेति

ङ्कारानात्मताया वक्ष्यमाणत्वात्तस्यैव ज्ञानाद्याश्रयतयाऽनुभूयमानस्यात्मनि स्वधर्मारोपनिमित्तत्वेनान्तःकरणपदाभिलप्यस्य ज्ञानाद्युपादानत्वे (१) तत्करणत्वायोगान्न क्वापि प्रमाणत्वं तस्येत्याह * किं चाहमितीति * ॥ ७ ॥

एवमप्रमाणं मन इत्येतदुपपाद्यासक्तमित्येतत्प्रपञ्चयति * किञ्च मन इति * भेदे न प्रत्यक्षप्रमाणमित्यर्थः ततो नानुमानादौ हेतोर्व्यभिचारः। तत्रापि व्याप्त्यादिसन्निकर्षसत्वाद्यथाश्रुतं वा साध्यमस्तु। आत्मगतभेदे मनः प्रमाणमिति वदन्तं प्रति तेनासन्निकृष्टत्वादितिहेतुरसिद्ध इत्याशङ्क्य सन्निकर्षस्य निरूपयितुमशक्यत्वान्नैवमित्याह * न चेति * किं मनोभेदयोः संयोगसमवायतादात्म्यानामन्यतमः सन्निकर्षः तदन्यो वा, नाद्यः वक्ष्यमाणविधया तदसम्भवात्। न द्वितीयः तदन्यसन्निकर्षस्य क्वाप्यसिद्धेस्तेन नासिद्धो हेतुरित्यर्थः। श्लोकं विवृणोति * मनस इति * तदसन्नि-

(१) दानत्वेनेति ख० पु० पा०

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सुप्रसिद्धं न चान्य इन्द्रियसन्निकर्षोऽस्ति, न चासन्निकृष्टमिन्द्रियमर्थं गृह्णाति विशेषणविशेष्येन्द्रियसन्निकर्षस्य जन्यप्रत्यक्षमात्रहेतुत्वात् । न च भेदस्य विशेषणता सन्निकर्ष इति वाच्यम् । व्यवहितप्रदेशेऽप्यभावग्रहणप्रसङ्गात् । न चाधिकरणेन्द्रियसन्निकर्षोपि कारणमिति वाच्यं । परमते शब्दाभावस्याप्रत्यक्षत्वप्रसङ्गात् । न च यत्र प्रति-

कृष्टत्वादिति हेतोरप्रयोजकत्वं निराकरोति * न चासन्निकृष्टमिति * हेतुत्वादित्यत्र सन्निकर्षाभावे मनसस्तज्जनकत्वानुपपत्तेरिति शेषः । ननु विशेष्यसन्निकर्षो विशेषणासंसर्गाग्रहश्च विशिष्टप्रत्यक्षहेतुर्न विशेषणसन्निकर्षः भेदश्चायमस्माद्भिन्न इति विशेषणतयैव भातीति चेन्न । लाघवेन यावद्विषयसन्निकर्षस्य तद्धेतुत्वेन विशेष्यसन्निकर्षत्वेनाहेतुत्वात् । किञ्च पर्वतादावसत्यपि वन्ह्यादिसन्निकर्षे वन्हिमानयं पर्वत इत्यादिप्रत्यक्षप्रसङ्गः । न च विशेषणोपस्थितिरपि विशिष्टबोधहेतुरिति वाच्यम् । एवमपि परमते गृहीतव्याप्तिकस्य वन्ह्यादावपि तत्सत्वाद्भेदे च निर्विकल्पकरूपायाः सविकल्पकरूपाया वा विशेषणोपस्थितेरनुपपत्तेः सन्निकर्षं विना तदयोगात्तत्रानुमानादेर्निराकरिष्यमाणत्वात्परोक्षोपस्थितेरप्यसम्भवादिति भावः । ननु भेदस्यान्योन्याभावात्मत्वादभावे च विशेषणतायाः सन्निकर्षत्वादसन्निकर्षासिद्धिरिति तत्राह * न च भेदस्येति * किमभावस्य विशेषणतामात्रं सन्निकर्षः इन्द्रियसन्निकृष्टाधिकरणविशेषणता वा किं वा यत्राधिकरणे प्रतियोगिसत्वमनुपलब्धिविरोधि स्यात्तद्विशेषणता, न तावदाद्यः कल्पोऽघकल्पते कुड्यादिव्यवहितभूतलादिनिष्ठघटाद्यभावेपि विशेषणतामात्रस्य सत्वेन प्रत्यक्षत्वप्रसङ्गादित्याह * व्यवहितेति * न द्वितीय इत्याह * न चाधिकरणेति * परमते कर्णावलयावच्छिन्नगगनस्य एव श्रोत्रेन्द्रियत्वात्तस्यैव स्वग्राह्यशब्दाभावाधिकरणत्वात्स्वेन स्वस्यासन्निकर्षादधिकरणेन्द्रियसन्निकर्षाभावेन शब्दाभावे प्रत्यक्षत्वं न स्या-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

योगिनः सत्वमनुपलब्धिविरुद्धं तद्विशेषणाभावस्येन्द्रिय-प्रत्यासत्तिरितिवाच्यम् । कदा चिदुपलम्भस्य व्यवहित-देशस्थघटादेरपि सत्वात् नियमेनोपलम्भस्य शब्दादेरप्य-भावात्; विशेषणताया इन्द्रियप्रत्यासत्तित्वे प्रमाणाभावा-च्च, अनुपलब्धिमात्रादप्यभावज्ञानोपपत्तेः ज्ञानाकरणक-

दित्यर्थः । तृतीयं निराकरोति * नच यत्रेति* प्रतियोगिसत्वस्यानु-पलब्धिविरोधित्वं नाम उपलभ्यमानत्वं तस्य किं यदा कदाचिद्भा-वोऽपेक्षित उत नियमेन, आद्ये व्यवहितेऽप्यभावाधिकरणे कदाचि-दुपलम्भसम्भवात् प्रतियोगिनस्तत्र व्यवधानसमयेऽप्यभावः प्रत्यक्षः स्यादित्याह * कदाचिदिति * द्वितीयस्त्वयुक्त इत्याह *नियमेनेति* श्रोत्रदेशे भूतलादौ वा शब्दस्य घटादेर्वा सत्वेऽपि सामग्र्यभा-वादिनाऽनुपलम्भसम्भवेन (१)नियमेन तदुपलम्भायोगात्तत्र तदभावो न प्रत्यक्षः स्यादित्यर्थः । विशेषणतायाः क्वचिदिन्द्रियप्रत्यासत्तित्वमु-पेत्यैतदुक्तं, सम्प्रति अङ्गीकृतं परित्यजति * विशेषणताया इति * ननु कादाचित्काभावानुभवस्य करणसापेक्षत्वात्तत्रचेन्द्रियातिरि-क्तकरणासम्भवात्तस्य च प्रत्यासत्तिं विना करणत्वायोगात् परि-शेषाद्विशेषणता तत्र प्रत्यासत्तिरित्याशङ्क्य तत्र करणान्तराभा-वोऽसिद्ध इत्याह * अनुपलब्धिमात्रादिति * मात्रचा करणान्त-रंव्यावर्त्यते । नचैवं भेदस्याप्यनुपलब्धिप्रमाणकत्वे षष्ठप्रमाणवादिना मिष्टमेव सिद्धमितिवाच्यम् । तत्र योग्यानुपलब्धेरप्यनन्तरमेव नि-राकरिष्यमाणत्वादिति भावः । नन्वभावज्ञानस्य ज्ञानाकरणकज्ञान-त्वेन प्रत्यक्षत्वानुमानादिन्द्रियजन्यत्वं दुर्वारमित्याशङ्क्याह * ज्ञाना-करणकस्येति* परमते स्मृतिरूपपरामर्शजन्यानुमितौ ज्ञानस्य करण-णत्वासम्भवान्मन एव वा परामर्शप्रागभावो वा ऽनुमितौ ज्ञान-द्वारा करणमिति कैश्चिदभ्युपगमात् ज्ञानाकरणिकाया अप्य-नुमितेः परोक्षत्ववत्सिद्धान्तेऽपि संस्कारकरणिकायाः स्मृतेः परोक्ष-

(१) नियमेनेति ख० पु० नास्ति ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्यापि मनःकरणकानुमितिवदप्रत्यक्षत्वसम्भवात् क्वचिदिन्द्रियव्यापारस्याधिकरणग्रह एवोपक्षयात् । न च प्रमाणान्तरकल्पनागौरवं, त्वया ऽपि तस्या अभावज्ञाने निमित्तताया अभ्युपेतत्वात् विशेषणताया अपीन्द्रियप्रत्या-

त्ववच्चाभावज्ञानस्यापि परोक्षत्वोपपत्तेर्नेन्द्रियजन्यतेत्यर्थः । घटाद्यभावानुभवस्य चक्षुराद्यजन्यत्वे तदन्वयव्यतिरेकानुविधानविरोधमाशङ्क्य शब्देनरेन्द्रियग्राह्यप्रतियोगिकाभावस्येन्द्रियेणाधिकरणग्रहणे सत्येवानुपलम्भेन ग्रहणात्तदन्वयव्यतिरेकयोरन्यथासिद्ध्या न विरोध इत्याह * क्वचिदिन्द्रियेति * शब्दाभावस्तु सति प्रतियोगिज्ञाने योग्यानुपलब्धित एव गृह्यत इति न तद्ग्रहे श्रोत्रं हेतुः साक्षिमात्रग्राह्यप्रतियोगिकाभावस्तु तत्प्रतियोगिविरोधिसत्वलिङ्गेन वा साक्षिणैव वा गृह्यते अभावस्यापि साक्षिमात्रभास्यत्वमुक्तमाचार्यैः 'स्वप्ने जागरिते सुप्तौ भावाभावौ धियां तथा । योवेत्त्यविक्रियः साक्षी सोऽहमित्यवधारयेति' ततश्च क्वचिदपीन्द्रियस्याभावधीहेतुतैव नेति भावः। नन्विन्द्रियस्यान्यथासिद्ध्यापादनेनानुपलब्धेरेवाभावानुभवकरणत्वाभिधानेऽनुपलब्ध्याख्यप्रमा(१)णान्तरकल्पनागौरवप्रसङ्ग इति नेत्याह * न च प्रमाणान्तरेति * हेतुमाह * त्वयाऽपीति * अभावस्येन्द्रियग्राह्यत्ववादिनाऽप्यनुपलब्धेस्तद्ग्रहे निमित्तत्वोपगमात् तस्यास्तत्रासाधारणनिमित्ततया करणत्वमप्यनुक्तसिद्धमेवेति नास्माकमधिकं कल्पनीयमस्ति । न च व्यापाररहिताया अनुपलब्धेरभावग्रहे करणत्वमनुपपन्नमिति वाच्यम् । परमतेऽपि शब्दप्रागभावादिग्रहे श्रोत्रस्य व्यापाराभावेनाकरणत्वप्रसङ्गात् व्यापाराभावेऽपि केन चिदतिशयेन साधकतमत्वात्करणत्वमनुपलब्धावपि तुल्यमिति भावः। स्वमते कल्पनागौरवं परिहृत्य परमते तत्प्रसङ्गो दुर्वार इत्याह * विशेषणताया इति * ननु समवायस्याद्रव्यस्येन्द्रियेण संयोगायोगात्स्ववृत्तित्वविरोधेन समवायासम्भवाच्च विशेषणताया एव तत्र प्रत्यासत्तित्वं क्लृप्तमित्यभावेऽपि तस्यास्तदुपपत्तौ नापूर्वाधिककल्प-

(१) प्रमाणं तदक इति क पु० पा० ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सत्तित्वज्ञानहेतुत्वयोः कल्प्यत्वात् । न च समवायप्रतीतौ तत्क्लृप्तमिति वाच्यम् । तदसम्प्रतिपत्तेः तादा-

मेत्याशङ्क्य प्रमाणाभावात्समवाय एव तावदसिद्धः तत्र विशेषणतादेः प्रत्यासत्तित्वं सुतरामसिद्धमित्यभिप्रेत्याह * न च समवायेत्यादिना * ननु रूपी घट इत्यादिविशिष्टप्रत्ययस्य दण्ड्यादिप्रत्ययवत्सम्बन्धिद्वयातिरिक्तवैशिष्ट्यविषयत्वावधारणाद्गुणादौ च संयोगासम्भवात्परिशेषात्समवायसिद्धिरिति चेन्न। गुणगुणिनोरवयवावयविनोश्चात्यन्तभेदे तत्सम्बन्धस्य च ताभ्यामत्यन्तभेदे दण्डपुरुषादाविव शुक्लः पटः सुवर्णं कुण्डलमित्यादिसमानाधिकरणप्रत्ययानुपपत्तेः। किं च समवायस्य सम्बन्धिभ्यामसम्बद्धस्यैव विशिष्टप्रत्ययनियामकत्वेऽतिप्रसङ्गात्तत्रापि सम्बन्धान्तरोपगमेऽनवस्थाप्रसङ्गात्स्वरूपसम्बन्धस्य च निरसिष्यमाणत्वात् तस्य च क्वचिद्विशिष्टधीनियामकत्वे गुणगुण्यादावपि तस्यैव नियामकत्वोपपत्तौ समवायकल्पनावैयर्थ्यम् । किं च समवायस्यैकत्वे रूपज्ञानादिसमवायस्य वायुघटादिवृत्तिसमवायादभेदाद्रूपी वायुः घटोजानातीत्यादिधीप्रसङ्गः । न च वाय्वादौ रूपादिसमवाये सत्यपि रूपादेरभावान्न तद्विशिष्टधीरिति वाच्यम् । तद्वृत्तित्वप्रयोजकसम्बन्धे सति तदभावव्यवहारस्य व्याहतत्वात् समवायनानात्वकल्पनं त्वतिजघन्यत्वाद्धेयं। एवं मृद्घटादेरत्यन्ताभेदेऽप्यपुनरुक्तशब्दद्वयावगाहिसमानाधिकरणप्रत्ययानुपपत्तिः कार्यकारणभावाद्यनुपपत्तिश्च तस्मात्तादात्म्यमेवावयव्यादीनां सम्बन्धः तच्च न भिन्नाभिन्नत्वं विरुद्धयोर्भेदाभेदयोरेकत्रासम्भवात् अविरोधे च भेदाविरुद्धेऽभेदसंज्ञायाः पारिभाषिकत्वेनात्यन्तभेदवादिमताद्विशेषायोगात् किं तु भिन्नत्वे सत्यभिन्नसत्ताकत्वं तादात्म्यं तच्चानिर्वचनीयं स एव च समानाधिकरणप्रत्ययगोचर इति न समवायः प्रामाणिक इति भावः। ननु शुक्लो घट इत्यादिरूपेण तादात्म्यस्यापीन्द्रियग्राह्यत्वात्तत्र प्रत्यासत्त्यन्तराभावाद्विशेषणतायाः प्रत्यासत्तित्वं दुर्निवारमिति नेत्याह * तादात्म्ये चेति * अभिन्नसत्ताकसम्बन्धिद्वयाभिव्यक्तसाक्षिमात्रभास्यत्वस्य शुक्तिरजततादात्म्यादौ क्लृप्तत्वात् गुणगुण्यादितादात्म्यस्यापि साक्षिमात्रभास्यत्वसम्भवात् इन्द्रियस्य च सम्बन्धिग्रह एवान्यथासिद्ध-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्म्ये च न प्रत्यासत्त्यन्तरमपेक्ष्यते तस्य साक्षिभास्यत्वात्, निरवयवात्मनि संयोगासम्भवाच्च न भेदस्येन्द्रियसन्निकृष्टत्वं, एकत्र संयोगतदभावायोगात् वृक्षादावपि औपाधिकभेदवत्येव तदुभयप्रतीतेः अग्रे वृक्षः कपिसंयोगवान्मूले नेत्यनुभवात् । न च परमते तदभिन्ने तद्भेदः स-

त्वाच्च सम्बन्धिप्रत्यासत्त्यतिरिक्तप्रत्यासत्तेस्तादात्म्ये ऽनपेक्षणाद्विशेषणता न तत्रापि प्रत्यासत्तिरिति भावः । किञ्च विशेषणतामात्रस्यातिप्रसक्तत्वेनेन्द्रियप्रत्यासत्तित्वायोगादिन्द्रियसंयुक्तत्वादिघटितायास्तस्याः प्रत्यासत्तित्वं वाच्यम् संयोगस्य च प्रदेशवृत्तित्वनियमान्निष्प्रपञ्चात्मनि च मनः संयुक्तत्वासम्भवात्तद्गते च भेदे मनः सन्निकर्षाभावान्न तद्ग्राह्यतेत्याह * निरवयवात्मनीति * निरवयवे संयोगः किमव्याप्य वर्त्तते उत व्याप्य, नाद्यः निरवयवे संयोगस्य स्वात्यन्ताभावसमानाधिकरणत्वातिरिक्ताव्याप्यवृत्तित्वस्यानिरूपणात्तस्य च भावाभावयोरेकत्रविरोधेनासम्भवादविरोधे वा विरोधवार्त्तायाः सर्वत्रोच्छेदप्रसङ्गात् तयोरविरोधे नियामकाभावेन व्याप्यवृत्तित्वापाताच्चेत्यभिप्रेत्याह * एकत्रेति * ननु भावान्तराणां स्वाभावसामानाधिकरण्यविरोधेपि संयोगादीनां तदविरोधः एकस्मिन्नेव वृक्षादौ कपिसंयोगतदभावयोः सर्वानुभवसिद्धत्वादिति नेत्याह *वृक्षादाविति* वृक्षस्य स्वत एकत्वेऽप्यग्रमूलाद्यवयवभेदाधीनभेदवत्वादौपाधिकभेदवतोरेव वृक्षयोः संयोगतदभावाधिकरणत्वं (१) भावाभावयोः सर्वत्र विरुद्धमेवेत्यर्थः । एकस्मिन्नौपाधिकभेदं साधयति * अग्रे वृक्ष इति * न च मूले कपिसंयोगवान्नेत्यनुभवात्संयोगात्यन्ताभाव एव प्रतीयते न तु संयोगवद्वृक्षभेद इति वाच्यम् । संयोगिनः प्रतियोगित्वानुभवविरोधात् विशिष्टप्रतियोगिकभेदप्रप्रतीतेर्विशेषणाभावविषयत्वे घटः पटो नेत्यादिभेदप्रतीतेरपि घटादौ पटत्वाद्यभावविषयत्वोपपत्तेर्भेदो दत्तजलाञ्जलिः स्यात् । तर्ह्येकस्मिन्नात्मनि औपाधिकभेदेन मनःसंयोगतदभावौ स्तामित्याशङ्क्या-

(१) धिकरणत्वा देकाधिकरणत्वमिति स्व० पु० अधिकं वर्त्तते।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्भवति सिद्धान्ते च कल्पितप्रदेशवृत्तिसंयोगस्य प्रमाहेतुत्वं न सम्भवति। नचैकस्मिन्नप्यवच्छेदकभेदादेव भावाभाववृत्तिरिति वाच्यम्। अधिकरणभेदाभावे तदभाववदवृत्तित्वघटितावच्छेदकत्वस्याग्रत्वादेरयोगात्। तदधिकरणवृत्तित्वस्य प्रमेयत्वादिसाधारण्यात् संयोगस्य

ह * न च परमते इति * भेदादिकं वास्तवमिति मते तदभिन्ने तस्मिन्वास्तवभेदायोगात् अत्यन्तभेदवादिभिरव्याप्यवृत्तिभेदानङ्गीकाराच्चेति भावः। ननु परमते निरवयवात्मनि संयोगासम्भवेपि सिद्धान्ते तत्तदुपाधिपरिकल्पितात्मप्रदेशभेदेन मनःसंयोगसम्भवात्तन्निमित्तो जीवपरभेदः प्रमा स्यादित्याशङ्क्याह * सिद्धान्ते चेति * मिथ्याभूतप्रदेशभेदसापेक्षस्य मनःसंयोगस्यापि मिथ्यात्वात्तस्य बाष्पधूमादिवत्प्रमापकत्वं न सम्भवति। नचैवं वेदान्तानां प्रमापकत्वानुपपत्तिरिति वाच्यम्। तेषां स्वरूपेण कल्पितत्वे ऽप्यर्थक्रियासमर्थत्वादपौरुषेयतया निरस्तसमस्तकलङ्काशङ्कानां स्वार्थे बाधकाभावेन यादृच्छिकसंवादिलिङ्गविभ्रमवत् प्रमापकत्वोपपत्तेः भेदज्ञानस्य तु कल्पितसामग्रीप्रसूतत्वाच्छ्रुतिन्यायापहृतविषयत्वाच्चेति प्रमात्वमनुपपन्नमिति भावः। ननु संयोगतदभावयोर्नाधिकरणभेदनियमस्तयोरवच्छेदकभेदेनैकत्राप्यविरोधादेकस्मिन्नपि वृक्षादावग्रत्वमूलत्वाद्यवच्छेदकभेदात्कपिसंयोगादिदर्शनादात्मन्यपि शरीराद्यवच्छेदकभेदान्मनःसंयोगाद्युपपत्तिरिति नेत्याह * नचैकस्मिन्निति * अग्रत्वादेः संयोगाधिकरणतावच्छेदकत्वं नाम किं तदभाववदवृत्तित्वे सति तदाश्रयवृत्तित्वमुत तदाश्रयवृत्तित्वमात्रं, नाद्यः संयोगतदभावयोरधिकरणभेदाभावे संयोगाधिकरणस्यैव तदभावाधिकरणत्वाश्रयत्वात् संयोगाधिकरणत्वाश्रयवृत्त्यग्रत्वादेस्तदभाववदवृत्तित्वायोगादित्याह * अधिकरणेति * न द्वितीयः अतिव्याप्तेरित्याह * तदधिकरणेति * एवं निरवयवे संयोगस्याव्याप्यवृत्तित्वं निराकृत्याधुना व्याप्यवृत्तित्वकल्पं निराकरोति * संयोगस्येति * किं सर्वस्य संयोगस्य व्याप्यवृत्तित्वमभिमतं उत

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

व्याप्यवृत्तित्वमनुभवपराहतमसम्भवि च, तथात्वे शब्दादेः सर्वत्र प्रतीतिप्रसङ्गाच्च । तस्मान्न मनसो भेदेन सम्बन्धः नापि मनसः सहकारी योग्यानुपलम्भोऽस्ति ईश्वरस्य प्रत्यक्षायोग्यत्वात् प्रत्यक्षयोग्यस्यानुपलब्धिर्हि योग्यानुप-

निरवयववृत्तेः, नाद्यः स्थाणुश्येनादिसंयोगानां व्याप्यवृत्तित्वस्यानुपलब्धिपराहतत्वादसम्भवाच्च, न द्वितीयः परमते परमाणुसंयोगस्य परमाण्वन्तरव्यापित्वे द्व्यणुके प्रथिमानुपपत्तेः। किञ्च परिच्छिन्नापरिच्छिन्नद्रव्यसंयोगस्य परिच्छिन्नव्यापित्वे ऽप्यपरिच्छिन्नव्यापित्वादर्शनादन्यथा नीरक्षीरवदुभयोरपि समा व्याप्तिः स्यादिति भावः। संयोगस्य व्याप्यवृत्तित्वे बाधकान्तरमाह * तथात्वे इति * कर्णवलयसंयोगावच्छिन्ननभस एव परमते श्रोत्रेन्द्रियतया शब्दग्राहकत्वाङ्गीकारात्तत्संयोगस्य च नभोमात्रव्यापित्वे कृत्स्नस्य नभसः श्रोत्रत्वापातेन तन्निष्ठानां सर्वेषां शब्दतदभावानां उपलम्भप्रसङ्गः निमि(१)त्तसंयोगावच्छेदेनोत्पद्यमानशब्दस्याव्याप्यवृत्तित्वं च न स्यात्, अत एव कर्णगोलकस्य सर्वत्राभावान्न सर्वशब्दोपलब्धिरितिनिरस्तम् । तथापि व्यापिसर्वशब्दोपलम्भस्य दुर्वारत्वात् गोलकसंयोगस्य रूपज्ञाने व्यभिचारेण सतीन्द्रियसन्निकर्षे केवलव्यतिरेकाभावेन हेतुत्वायोगा ऽयति भावः। मनो न भेदे प्रमाणं तदसन्निकृष्टत्वादित्येतदुपसंहरति *तस्मादिति * अयोग्यानुपलब्धिकामित्येतद्विवृणोति * नापि मनस इति * उपलब्धुं प्रत्यक्षेणावगन्तुं योग्यस्य प्रतियोगिनोऽनुपलम्भो योग्यानुपलम्भः सोभावरूपभेदग्राहकेन्द्रियस्य सहकारी वक्तव्यः स मनसेश्वरभेदग्रहे न सम्भवति तत्प्रतियोगिन ईश्वरस्य प्रत्यक्षायोग्यत्वादित्यर्थः। ननु योग्यत्वमनुपलब्धेरेव विशेषणं तच्चानुपलब्धेस्तद्ग्राह्याभावप्रतियोगितद्व्याप्येतरसकलतदुपलम्भककालीनत्वमेवेति नवीनोत्प्रेक्षितमाशङ्क्य प्रतियोगिप्रत्यक्षज्ञानजनकस्य तदुपलम्भकपदाभिलप्यत्वात्तत्प्रत्य-

---

(१) निमित्तं भेरी तत्संयोगावच्छेदेन ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

लब्धिः प्रतियोगितद्व्याप्येतरसकलतदुपलम्भककालीनानुपलब्धेश्चात्रासम्भवात् घटे मनस्त्वं नास्तीति ज्ञानं च परमाणुत्वं नास्तीति ज्ञानवन्न प्रत्यक्षं, न हि मनसो घटभेदाप्रतिसन्धानदशायां तदनुभवोऽस्ति, अत एवातीन्द्रिये

क्षत्वमभावप्रत्यक्षत्वे तन्त्रं स्यादित्युक्तदोषानिस्तार इत्याह * प्रतियोगीति * प्रतियोगिनोऽप्रत्यक्षत्वे ऽप्यभावप्रत्यक्षत्वदर्शनात् प्रतियोगिप्रत्यक्षत्वं तत्र न तन्त्रमिति प्रागुक्तं निराकरोति * घटे मनस्त्वमिति * यद्यपि पराभिमतपरमाणुत्वोपाधेर्धर्मिप्रत्यक्षत्वेन प्रत्यक्षत्वमापादयितुमशक्यं मनस्त्वस्य तु जातित्वात्तदापादनं सुकरमिति पराभिमानस्तथापि (१) तदुभयाभावेपि साक्षात्करोमीत्यनुभवाभावेन तद्प्रत्यक्षत्वमेव युक्तं न हि परोत्प्रेक्षितसामग्रीमात्रान्मनस्त्वाभाव एव प्रत्यक्ष इति स्वीकारो युक्तोऽनुपलब्धिविरोधादिति भावः। घटे मनस्त्वाभावस्याप्रत्यक्षत्वे हेत्वन्तरमाह * न हि मनस इति * घटस्य मनसः सकाशाद्भेदाप्रतिसन्धानदशायां घटे मनस्त्वसंशयविपर्ययोरन्यतरापातेन घटे तदभावनिश्चयायोगात् घटमनसोर्भेदनिश्चयदशायामेव घटे मनस्त्वाभावानुभवो वाच्यः तदा(२) च भेदप्रतियोगितावच्छेदकमनस्त्वाभावस्य तद्धर्मिण्यार्थिकत्वान्न प्रत्यक्षत्वं कल्प्यमिति भावः। भेदप्रतिसन्धानदशायां भेदप्रतियोगितावच्छेदकधर्माभावस्य भेदधर्मिण्यार्थिकत्वे गमकमाह * अत एवेति * परमते परमाण्वादौ घटत्वाद्यभावस्य प्रतियोगिद्व्याप्येतरसकलतदुपलम्भकसमवधाने ऽपि प्रत्यक्षत्वं नोपेयते तत्कस्य हेतोः तथा ऽनुभवाभावात् घटपरमाण्वादीनां भेदप्रतिसन्धानदशायामेव परमाण्वादौ घटत्वाभावानुभवेन तत्र तस्यार्थिकत्वोपपत्तेश्च, एवं प्रत्यक्षेपि धर्मिण्यतीन्द्रियधर्माभावः परोक्ष एवेत्यर्थः। एवमतीन्द्रियप्रतियोगिकात्यन्ताभावग्रहे योग्यानुपलम्भं निरस्य (३) तदन्योन्याभावरूपेश्वरभे-

---

(१) परमाणुत्वमनस्त्वयोरुभयोरभावमध्ये एकस्यापीत्यर्थः।
(२) तथाच इति ख० पु० पा०। (३) अतीन्द्रियेत्यर्थः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

घटत्वाद्यभावो न प्रत्यक्षः, न च नाहमीश्वर इति भेद-प्रतीतिदशायामीश्वरोपलम्भकसमवधानमस्ति तत्कालीनमनआदेस्तदयोग्यत्वात् । यत्तु यत्र यत्सत्त्वमनुपलब्धिविरोधीत्यादि योग्यानुपलब्धिनिर्वचनं, तदसत् । यत्र कुत्र चित्प्रतियोगिसत्वस्यान्यत्रोपलम्भाव्याप्तत्वेनाभावदेशीयं तत्सत्वं तद्व्याप्यं वक्तव्यं तच्च न सम्भवति अभावाधिकरणे प्रतियोगिवैशिष्ट्यसत्वेऽभावप्रमानुपपत्तेः। तर्कितं तत्र तद्विरोधीति चेत्तर्कितस्यापि सत्त्वासत्वान्यतरत्वात्। तत्रासदप्यन्यत्र सदिति चेत्तर्हि तत्रैव तद-

ग्रहेपि स नास्तीत्याह * न च नाहमीश्वर इति * तत्र हेतुः * तत्कालीनेति* भेदधीपूर्वक्षणे सतोऽपि मनश्चक्षुरादेरतीन्द्रियेश्वरग्रग्रहायोग्यतया प्रतियोग्युपलम्भकाभावान्न तत्र विवक्षितयोग्यानुपलम्भ इत्यर्थः । इदानीं नवीनतरोत्प्रेक्षितमनूद्य दूषयति * यत्त्वित्यादिना * साक्षादभावविरोधत्वं प्रतियोगिन एव अन्यस्य तु तत्प्रतियोगिव्याप्यत्वेनेति सर्वत्र स्थितिः तथाच प्रतियोगिसत्वस्यानुपलब्धिविरोधित्वं तत्प्रतियोग्युपलब्धिव्याप्यत्वेनैवेति वक्तव्यं एवं चान्यत्र प्रतियोगिसत्वस्याभावस्थलीयोपलम्भाव्याप्तत्वेन तत्रत्यानुपलम्भविरोधित्वायोगात् यत्र यत्सत्वमित्यादि वदताऽभावाधिकरणे एव प्रतियोगिसत्वं तदुपलम्भश्च वाच्यः ततश्च नाभावधीसम्भव इति वरघातीय कन्यावरणमिति न्यायापात इति भावः ।ननु यत्र यत्सत्वमित्यत्र तर्कितमिति विवक्षितत्वादभावाधिकरणे न प्रतियोगिसत्वाद्यापात इति शङ्कते *तर्कितमिति* तर्कितप्रतियोगिसत्वस्यापि तत्र सत्त्वमसत्त्वं वा वक्तव्यं परमते प्रकारान्तराभावात्, तत्राद्ये पूर्वोक्तदोषानिस्तारः, द्वितीये त्वसतोऽनुपलब्धिविरोधित्वमसम्भवीत्यभिप्रेत्य दूषयति * तर्कितस्यापीति * ननु प्रतियोगिवैशिष्ट्यस्यान्यत्र सत्वादनुपलब्धीविरोधित्वमभावाधिकरणे चासत्वादनुपलम्भश्च त-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नुपलब्धि(१)विरुद्धं नाभावाधिकरणे, क्वचिदनुपलम्भविरो(२)धेनान्यत्राभावनिरूपणेऽतीन्द्रिये घटत्वाद्यभावः प्रत्यक्षः स्यात् अभावाधिकरणे प्रतियोगिवैशिष्ट्यं असत्वादेव नानुपलम्भविरोधि, न वाऽसता किञ्चिन्निरूप्यते। न च यत्र यत्सत्वापादनेनानुपलम्भाभाव आपादयितुं शक्यते तत्र तदभावः प्रत्यक्ष इति वाच्यम्। असताऽऽ-

तश्चाभावधीरिति शङ्कते * तत्रासदपीति * किमभावाधिकरणे प्रतियोगिवैशिष्ट्यस्यानुपलब्धिविरोधित्वमभावप्रत्यक्षत्वे प्रयोजकमुत यत्र कुत्र चित् तत्राद्यमसम्भवेन निराकरोति * तर्हीति * द्वितीयमतिप्रसङ्गेन दूषयति * क्वचिदनुपलम्भेति * किं चास्मिन्पक्षेऽतीन्द्रियेश्वरादितादात्म्यस्य कुत्रापि अनुपलम्भविरोधित्वाभावात्तदभावरूपो भेदो न प्रत्यक्षः स्यादिति द्रष्टव्यं। अभावाधिकरणे प्रतियोगिवैशिष्ट्यस्यासत्वेऽपि तदुपलम्भकस्य सत्वादनुपलब्धिविरोधित्वमित्याशङ्क्यासतः समस्तसामर्थ्यविकलतया तदधीनं किमपि न सम्भवतीत्याह * अभावाधिकरण इति * किञ्चिद्व्याप्त्यादि, ततश्चाव्याप्येन तेन न किञ्चिदापादनीयमितिभावः। नन्वभावाधिकरणे प्रतियोगिवैशिष्ट्यस्यासतः स्वरूपेणानुपलब्धिविरोधित्वं न ब्रूमो येनोक्तदोषः स्यात् किं तु तत्र तस्यारोपितस्य प्रतियोग्यनुपलम्भाभावरूपोपलम्भापादकत्वेन, ततश्च तत्र तर्कितप्रतियोगिसत्वेनापादनयोग्योपलम्भाभाव एव योग्यानुपलम्भ इति नवीनतमानां कल्पनां निराकरोति *न च यत्रेति* आपादनेन आरोपेणाभावाधिकरणे प्रतियोगिसत्वस्यापादितस्याऽऽप्यसत्वाविशेषान्न तदुपलभापादकं क्वचिदपि सम्भवति अतस्तच्छक्तिरपि नेत्याह * असतेति * न चैवं सति वन्ह्यभावेनापादितेन पर्वतादौ धूमाभावापादनमपि न स्यादिति वाच्यम्। तत्रापि वन्ह्यभावविकल्पे सति धूमाभावविकल्पमात्रोदयो न क-

(१) पलब्धिर्विरुद्ध्यतां इति ख० पु० पा०।
(२) विरोधिना इति ख० पु० पा०।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पादितेन वैशिष्ट्येनान्यापादनायोगात् प्रतियोगिवैशिष्ट्य-मात्रेणाभावाधिकरणे तदुपलम्भप्रसञ्जनायोगात् अभाव-ग्राहकेण पुंसाऽन्यदेशीयप्रतियोगिवैशिष्ट्यस्याग्रहणेन त-स्यानुपलब्धिविरोधाभावाच्च । किं चापादनशक्तिः प्र-मेयगता व्याप्तिः तज्ज्ञानं वा नान्यत्, न चासद्वैशिष्ट्य-

स्य चिदापादकत्वाद्यस्ति, नचानिर्वचनीयवादिना तदुपपादनीयमिति भावः । किञ्चाभावाधिकरणे प्रतियोगितद्व्याप्येतरसकलतदुपलम्भ-कसामग्र्यां सत्यामेव किं तत्र तत्सत्वमापादितं तदुपलम्भापादकमि-त्यभिमतं, किं वा तद्वैशिष्ट्यमात्रं तत्रापादितं तदुपलम्भापादकमिति, नाद्यः दृष्टादृष्टसमुदायात्मकसामग्र्याः कार्यैकगम्यतया तदभावे दुर्य-हत्वात्तद्ग्रहाभावे चान्धकारावृतदेश इव सहकारिवैकल्यादनुपल-म्भोपपत्तिशङ्कया तर्कितस्यापि प्रतियोगिनः स्वोपलम्भापादकत्वायो-गादतीन्द्रियोपलम्भकाभावेन तदभावस्य प्रत्यक्षत्वायोगाच्चेत्येतद-तिस्पष्टमित्याभिप्रेत्य द्वितीयं दूषयति * प्रतियोगिवैशिष्ट्यमात्रेणे-ति * आरोपितेनेति शेषः । घटवति देशेपि तत्सत्तामात्रेण तदुप-लम्भाभावादन्यत्रापि तन्मात्रमारोपितं न तदुपलम्भापादकमित्यर्थः । किं च देशविशेषे प्रतियोगिसत्त्वस्यानुलब्धिविरोधित्वानुसन्धान-वतैवान्यत्रापि तेन (१) तदा (२) पादनीयमिति वाच्यं । न चाभावोपलम्भसमये नियमेन देशविशेषे प्रतियोगिसत्वानुस-न्धानमस्ति न चोक्तापादनरूपयोग्यानुपलम्भं विनाऽभावधीस्स-म्भवतीति न त्वदुक्तरीत्या ऽभावप्रत्यक्षत्वसिद्धिरित्याशयेनाह * अ-भावग्राहकेणेति*नन्वभावाधिकरणेऽसतः प्रतियोगिवैशिष्ट्यस्य तदु-पलम्भाद्यनापादकत्वेपि तच्छक्तिरस्ति ततश्च सैवाभावप्रत्यक्षत्वप्रयोजि-केत्याशङ्क्याह*किं चेति*नान्यदिति*असतोऽतीन्द्रियधर्मभूतायाः स्व-रूपभूताया वा शक्तेरसम्भावितत्वादितिभावः । व्याप्तेरपि सामानाधि-

(१) प्रतियोगिसत्वेन । (२) अनुपलब्धिविरोधित्वम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

निरूपिता व्याप्तिरस्तीति तज्ज्ञानं वाच्यं, ततश्चाभाव-
धीपूर्वं नियमेन व्यतिरेकव्याप्तिज्ञाने वन्ह्यादाविवाभावे-
ऽनुमितिरेव स्यान्न प्रत्यक्षं, एवमपि प्रत्यक्षयोग्यशब्दादे-
रभावः प्रत्यक्षः स्यान्न त्वतीन्द्रियाभावः मनस्त्वादेर्घटे

करण्यरूपायाः समानकालीनत्वरूपाया वा स्वरूपेणासत्यसम्भवात्त-
ज्ज्ञानं शक्तिरित्यभ्युपेयमिति शिक्षयति*न चासद्वैशिष्ट्येति * भवतु
व्याप्तिज्ञानमेव शक्तिः सैवाभावप्रत्यक्षत्वप्रयोजिकेति मन्वानं प्रत्याह
* ततश्चेति * प्रतियोगिसत्त्वस्य तदुपलम्भेन सह व्याप्तौ गृहीता-
यामेव व्यापकाभावानुभवेन व्याप्यप्रमेयाभावानुभवाभ्युपगमे नि-
यमेन व्यतिरेक्यनुमानसामग्रीसत्त्वेनाभावस्यानुमेयत्वमेवं स्यात् न
प्रत्यक्षत्वमित्यर्थः । न चानुमितिसामग्र्यां सत्यामपि(१)संशयोत्तरप्र-
त्यक्षवत्प्रत्यक्षसामग्रीप्राबल्यादपरोक्षैवाभावधीः स्यादिति वाच्यम् ।
अनुपलम्भस्य क्वचिदपि प्रत्यक्षसामग्रीत्वेनाक्लृप्तत्वात्तत्प्राबल्यस्य
दूरापेतत्वादितिभावः । प्रत्यक्षप्रतियोगिसत्त्वस्य तदुपलम्भव्याप्य-
त्वग्रहाधीनाभावप्रत्यक्षत्वप्रयोजकत्वमङ्गीकृत्याप्यतीन्द्रियेश्वरादिप्र-
तियोगिकभेदस्य प्रतियोगिन्युक्तप्रकारासम्भवात्प्रत्यक्षत्वं न स्यादि-
त्याह * एवमपीति * यदप्युक्तमतीन्द्रियस्यापि प्रतियोगिनः प्र-
त्यक्षधर्म्मिण्यापादितस्य प्रत्यक्षत्वयोग्यताघटकतया स्वोपलम्भापाद-
कत्वेनानुपलम्भविरोधित्वमस्तीति तदप्यसाधु । तस्य धर्मिप्रत्यक्षत्व-
स्याप्यपलापकत्वापातेन स्वोपलम्भापादकत्वस्य दूरापेतत्वादित्यभि-
प्रेत्याह * मनस्त्वादेरिति * यत्र मनस्त्वं तत्राणुत्वमिति नियमेन
तद्वत्तया तर्कितघटस्याप्यणुत्वापातेन तद्धर्ममनस्त्वस्यानुपलम्भ
एव न्याय्य इति न त्वदुक्तयोग्यानुपलम्भसम्भव इत्यर्थः । न च कुम्भे

(१) स्थाणुर्वा पुरुषो वेत्यत्र संशयोत्तरं पुरुषत्वंव्याप्यकरा-
दिमानयमिति परामर्शज्ञानस्यानुमितिसामग्रीरूपस्य सत्त्वेऽपि प्रत्य-
क्षसामग्र्या बलवत्त्वात्पुरुषोऽयमिति यथा प्रत्यक्षमेव भवति तद्व-
दित्यर्थः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तर्कितसत्वस्य तद्व्यापकाणुत्वापादनेनानुपलम्भाविरोधित्वात् । किं च सहकार्य्यभावेन ब्राह्मणत्वाद्यनुपलम्भवज्जीवे ब्रह्माभेदानुपलम्भोऽप्यभावं विनोपपद्यते तत्र लौकिकोपदेशवदत्रापि 'आचार्यवान्पुरुषो वेद' 'श्रोतव्य'

महत्वोद्भूतरूपवत्वयोर्निश्चितत्वेन तत्र मनस्त्वारोपे तस्यापि प्रत्यक्षयोग्यवृत्तित्वापत्त्या तदुपलम्भ एव कुम्भे प्रसञ्जनीयो नाणुत्वादिरिति वाच्यम । अणुत्वादेरपि मनस्त्वव्यापकत्वेन निश्चयात्तदारोपे तदारोपस्याप्यनिवार्यत्वात्।यदि तु कुम्भे मनस्त्वोपलम्भापादनसम्भवमात्रेण तत्र तदभावः प्रत्यक्षः स्यात्तर्हि मनस्यपि कुम्भत्वारोपे तद्व्यापकमहत्त्वाद्यापत्त्या तत्रापि कुम्भत्वोपलम्भापादनसम्भवात्तदभावोपि मनसि प्रत्यक्षः स्यात्तच्च तव नेष्टमिति भावः। एवं तावदभावग्राहकप्रत्यक्षसहकारिणी योग्यानुपलब्धिः सर्वत्र दुर्निरूपेत्युक्तं सम्प्रत्यन्यत्र या का चित् साऽस्तु जीवेश्वरभेदग्रहे तत्सम्भव एव नास्तिजीवे पराभेदस्य सतस्तर्कितस्य वा मानसप्रत्यक्षयोग्यत्वेऽपि श्रुत्यादिसिद्धसहकार्य्यभावेन ततस्तदुपलम्भाभावसम्भवादित्याह * किं च सहकारीति * पूर्वपरिचयरहितसाधारणवेषादिमद्देहवृत्तिब्राह्मणत्वक्षत्रियत्वादिकं चक्षुरादिसन्निकृष्टमपि तन्मात्रेण न निश्चीयते तत्कस्यहेतोः, तद्व्यञ्जकविशिष्टमातापितृजत्वाद्युपस्थापकाप्तोपदेशरूपसहकार्य्यभावात् न च तावता तत्र ब्राह्मण्याद्यभावनिश्चयः एवं जीवब्रह्माभेदे तद्ग्रहणयोग्यान्तःकरणे च सत्यपि सहकार्य्यभावात्तदनुपलम्भोपपत्तौ कुतो योग्यानुपलम्भः कुतस्तरां च तद्भेदसिद्धिरित्यर्थः । ननु दृष्टान्ते सहकारित्वमाप्तोपदेशस्यान्वयव्यतिरेकसिद्धं-ब्रह्माभेदानुभवे तु सहकार्य्यन्तरसत्वे मानाभावात्तद (१) भावप्रयुक्तत्वमनुपलब्धेरसिद्धमिति ग्राह्याभाव (२) प्रयुक्तत्वमेव वाच्यमित्याशङ्क्याह * तत्र लौकिकेति * 'तस्य यथा अभिनहनं प्रमुच्य प्रब्रूयादेतां दिशं गन्धारा एतां दिशं व्रजेति स ग्रामाद्ग्रामं पृच्छन् पण्डितो मेधावी गन्धारानेवोपसम्पद्येतैव मेवाचार्य्यवान्पुरु-

(१) सहकारीत्यर्थः। (२) अभेदाभावेत्यर्थः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

इत्यादिना सहकार्य्यन्तरस्य प्रमितत्वात् । न च जीवाभेद इव तस्मिन्विद्यमानब्रह्माभेदेऽपि सहकार्य्यन्तरापेक्षा मनसोन स्यादिति वाच्यम् । जीवत्वादेर्मनोमात्रयोग्यतया तद्विशिष्टाभेदस्य तावन्मात्रयोग्यत्वेपि सर्वात्मत्वयोग्यत्वादेस्तदयोग्यतया तदात्मब्रह्माभेदे सहकार्यन्तरापेक्षोपपत्तेः अन्यथा जीवेऽदृष्टवदभेदानुपलम्भात्सोऽपि न

षांवेदेति'। यथा कश्चिदभिनद्धाक्ष एव गन्धारदेशेभ्योऽपकृष्यारण्यानीं प्रापितस्तत्र तथैव बद्धाक्षा त्यक्तः (१) परिभ्रमन् केन चिद्दयालुना पान्थेनाक्षाभिनहनं प्रमुच्य स गन्धारदेशमार्गमुपदिष्टस्तदनुगुणयुक्तीरनुसन्दधानो गन्धारानेव प्राप्नोति एवं स्वयंप्रकाशब्रह्मात्मापि जीवोऽनाद्यविद्याकामकर्मादिभिः प्रमुष्टविवेकः संसाराटवीं प्रापितो नानायोनिषु परिभ्रमन् आत्मतत्त्वनिश्चयवदाचार्योपदेशादिनाऽऽत्मतत्त्वं साक्षात्करोतीति श्रवणादीनां ज्ञानाङ्गतां दर्शयति, तथा 'श्रोतव्यो मन्तव्य' इत्यादिना ज्ञानोद्देशेन श्रवणादिविधानात्तेषां तादर्थ्यमवगतम्। तथा 'नैषा तर्केण मतिरापनेया प्रोक्ताऽन्येनैव सुज्ञानाय प्रेष्ठे'ति गुरूपदेशस्यावश्यकत्वं श्रावयति ततश्च तदभावदशायां सतोऽपि ब्रह्मात्मैक्यस्य श्रुत्युक्तस्य तदुक्तसहकारिविरहादेवानुपलम्भसम्भवात् न परोक्तयोग्यानुपलम्भसम्भव इत्यर्थः । नन्वात्मन्यनुभूयमानजीवाभेदवद्ब्रह्माभेदेऽपि सहकार्यपेक्षाभावात्तदभावादेव तदनुपलम्भसम्भव इत्युदाहृतश्रुतीनामन्यपरत्वमित्याशङ्क्य कर्तृत्वादिरूपजीवत्वस्य मनोमात्रग्राह्यत्वेनात्मनि तद्विशिष्टाभेदोपलम्भेपि तदुपलक्षितसर्वोपप्लवरहितसच्चिदानन्दघनप्रत्यग्ब्रह्माभेदस्य वेदान्ततात्पर्यगोचरस्याध्यवसायरूपानुभवविशेषे मनोमात्रस्य सामर्थ्याभावाच्छ्रवणाद्यपेक्षा युक्तेत्याह * न च जीवाभेद इत्यादिना * अन्याकारेणाभेदानुभवेऽप्यन्याकाराभेदोपलम्भाभावमात्रात्तस्य ततो भेदे परमतं बाधकमाह * अन्यथेति * मनोमात्रेणात्मा

(१) बद्धाक्षः इति ख० पु० पा० ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्यात् । अपि च तमसा घटस्येव ' माययाऽपहृतज्ञाना ' ' अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः ' ' भवत्य-

जीवाभेदानुभवेऽप्यहमेव सुकृती दुष्कृती वेत्येवमाकारानुभवाभावा-त्तद्भेदानुभवप्रसङ्गेनात्मनः पापाद्याश्रयभिन्नत्वेन नित्यमुक्तता स्या-दित्यर्थः । ननु सहकार्य्यभावादागन्तुकोपलम्भाभावेपि स्वप्रका-शाभेदवादे स्वत एवोपलम्भः कथं न भवेदित्याशङ्क्याह * अपि चेति * इन्द्रियसन्निकर्षे सत्यपि तमसा घटस्येवाभेदस्यापि तत्सं-शयादिप्रयोजकानाद्यनिर्वचनीयाज्ञानेनावृतत्वात्स्वप्रकाशचिद्रूपेऽपि तस्मिन् तत्संशयादिविरोध्युपलम्भाभावरूपानुपलम्भसम्भवान्नाभे-दसत्वस्य तद्विरोधितेत्यर्थः। उक्तावरणे किं प्रमाणमिति वीक्षायामा-माह *माययेत्यादिना* अनिर्वचनीयाज्ञानमेव माया न वस्त्वन्तर-मित्याशयेन भगवद्वचनान्तरमुदाहरति * अज्ञानेनेति* विष्णुपुराणे तद्भावभावनापन्नस्तदा ऽसौ परमात्मना । भवत्यभेदीति ज्ञानदशायां परमात्माभेदप्राप्तिमभिधाय तर्हि ज्ञानात् प्राग्भेद एवेति शङ्कां निराक-र्तुं भेदश्च तस्याज्ञानकृत इत्युक्तं न हि वस्तुन अन्यस्यान्यात्मत्वं ज्ञान-सहस्रेणापि भवति ततश्च भेदप्रतिभासः प्रागविद्याविलसितोऽभेदश्च तिरोहित इति गम्यते, अनन्तरं च तर्हि ज्ञाने नष्टे पुनरपि भेदोन्म-ज्जनमाशङ्क्य भेदनिदानाज्ञानस्य निर्लेपं नष्टत्वाच्च पुनस्तत्प्रसक्तिरि-त्युक्तं ' विभेदजनकेऽज्ञाने नाशमात्यन्तिकं गते । आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यतीति ' तथा ' ऋतेऽर्थं यत्प्रतीयेत न प्र-तीयेत चात्मनि । तद्विद्यादात्मनो मायां यथा भासो यथा तम'इत्या-दिनाऽऽवरणावक्षेपहेतुमायाविषया स्मृतिरादिपदार्थः, प्रसिद्धनीहा-रस्य स्वविरोधिस्वावभासकसूर्यमण्डलाच्छादकत्वदर्शनेन श्रुतौ नी-हारपदेन स्वविरोधिस्वावभासकचैतन्यात्मब्रह्मावरकमज्ञानं विव-क्षितं मुख्यनीहारस्यात्मस्वरूपावरकत्वादेरसम्भवात् तत्कृतावरण-विक्षेपौ प्रावृता जल्प्या चेत्युक्तौ, अहरहः सुषुप्तिसमये ब्रह्मस्वरूप-विरुद्धरूपादर्शनेन प्रत्यगभिन्नस्वप्रकाशब्रह्मसम्पत्तौ सत्यामपि त-दलाभे हेतुरुच्यते श्रुत्याऽनृतेन हि प्रत्यूढा ' इति, अनृतमनिर्वच-नीयमज्ञानं तेन स्वरूपभूतब्रह्मणस्तदाऽप्यावृतत्वाद्विक्षेपाभावे ऽपि न तत्प्राप्तिरित्यर्थः । एवं तावन्मनसः प्रत्यग्ब्रह्माभेदग्रहणयोग्यत्वं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भेदी भेदश्च तस्याज्ञानकृतो भवे ' दित्यादिस्मृत्या ' नीहारेण प्रावृता जल्प्या च ' ' अनृतेन हि प्रत्यूढा' इत्यादिश्रुत्या चाज्ञानेनावृतत्वप्रतीतेर्जीवब्रह्माभेदस्य नानुपलम्भः सत्वविरोधी, किं च मनो न जीवब्रह्माभेदयोग्यं ' यन्मनसा न मनुत ' इत्यादिश्रुतेः, किं तु 'तन्त्वौपनिषदं पुरुषं' 'सर्वे वेदा यत्पदमामनन्ती'त्यादिश्रुत्या वेदैकगम्यं ब्रह्मेति न मनसोऽनुपलम्भाद्धर्मादिवत्तदभावसिद्धिः । किं च किमिदमीश्वरत्वं यद्विशिष्टाभेदाद्यनुपल-

स्वीकृत्य सत्यपि तस्मिन् सहकारिविरहात्तत्सत्वं नानुपलम्भाविरोधीत्युक्तं, सम्प्रति स्वीकृतं परित्यजन् वेदान्तारम्भात् प्राक्तद्ग्राहकाभावेनैव तदनुपलम्भसम्भवान्न योग्यानुपलम्भो ऽस्तीत्याह * किं च मन इति * न मनुत इत्यादिश्रुतेरित्यत्रादिपदेन 'नावेदविन्मनुते तं बृहन्त' मित्यादि गृह्यते, यत्पदमामनन्तीत्यादिश्रुत्येत्यत्रादिपदेन 'वेदान्तविज्ञानसुनिश्चितार्थाः' 'वेदैश्च सर्वैरहमेव वेद्य' इत्यादिर्गृह्यते । मनसा इति पञ्चमी, अयोग्यान्मनसोऽनुपलम्भमात्रेण आत्मनि परमते धर्माद्यदृष्टस्येव तस्य ब्रह्माभेदस्याभावो नेत्यर्थः । न च ' यन्मनसा न मनुत ' इत्येतदशुद्धमनोविषयमिति वाच्यम् । तथाऽप्यस्मदादेस्तदनुपलम्भसम्भवादिति भावः । पुनरपि जीवेश्वराभेदग्रहयोग्यत्वं मनसोऽभ्युपेत्य योग्यानुपलब्धिमेव निराकरोति * किं चेति * किमात्मनीश्वरत्वविशिष्टाभेदानुपलम्भस्तद्भेदसाधक उतात्ममात्राभेदानुपलम्भ, आद्ये ऽपि किमीश्वरत्वं जातिरुत द्व्यणुकादिकर्तृत्वं नित्यज्ञानवत्वं वा सर्वज्ञत्वं वा नित्यसर्वज्ञानवत्वं वेति विकल्पमभिप्रेत्याह *किमिदमिति* आद्यं निराकरोति *न तावज्जातिरिति* न च ब्रह्मविष्ण्वादिभेदेनेश्वरनानात्वाद्व्यक्त्यभेदो ऽसिद्ध इति वाच्यं । नानात्वे सति तेषामीश्वरत्वायोगात् ' यतो वा इमानि भूतानि जायन्ते' इत्यादिनैकस्यैव सृष्ट्यादिकर्तृत्वाभिधानात्तत्कर्तृब्रह्मादिभेदानुपपत्तेः 'स ब्रह्मा स शिव' इत्यादिश्रुतिविरोधाच्च न वास्तवस्त-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

म्भाद्भेद इत्युच्यते न तावज्जातिः एकव्यक्तौ तदभावात् । न च लौकिकेश्वरसाधारणेश्वरत्वं जातिरिति वाच्यम्।समयभेदेन चेतनमात्रे तदस्तीत्यात्मत्वाद्भेदानुपपत्तेः लौकिकेश्वराणां तद्भेदाननुभवप्रसङ्गाच्च । नापि द्व्यणुकादिकर्तृत्वं तद्विशिष्टस्यान्तीन्द्रियतया तदभेदस्य सतोऽप्यनुपलम्भोपपत्तेः, नापि नित्यज्ञानवत्वं स्वनित्यताया इव ज्ञाननित्यताया अपि प्रत्यक्षायोग्यत्वात् । नापि सर्वज्ञत्वं सर्वविषयज्ञानवत्वमात्रस्य जीवेऽप्यनुभवात् । नित्यसर्वज्ञ-

भेदः औपाधिकस्तु व्यक्तिभेदो न जात्युपपादकः गगनादावदर्शनादिति भावः । तथा ऽपि देवमनुष्यादीश्वराणामिन्द्रययातिप्रभृतीनां परमेश्वरस्य च परस्परभेदात्कथमीश्वरत्वं न जातिरित्याशङ्क्य तेषामैश्वर्य्यस्यागन्तुकत्वादागन्तुकस्य च जातित्वायोगात् सर्वजीवेषु पर्य्यायेणापेक्षिकैश्वर्य्यसम्भवेनात्मत्वेन तुल्यव्यक्तिकत्वाच्च नेश्वरत्वं जातिरित्याह * न च लौकिकेश्वरेत्यादिना * लौकिकेश्वरसाधारणेश्वरत्वजातिस्वीकारे च लौकिकेश्वराणां तद्विशिष्टात्माभेदानुपलम्भाभावात्तेषामीश्वराद्भेदो न सिद्ध्येदित्याह * लौकिकेश्वराणामिति * द्वितीयमपवदति * नापि द्व्यणुकादीति * जीवं प्रति द्व्यणुकादेरतीन्द्रियतया तत्कर्तृत्वस्य तदभिन्नेश्वरे सत्वेऽपि अतीन्द्रियत्वात्तद्विशिष्टाभेदस्य सतोऽपि धर्मादिविशिष्टाभेदवदनुपलम्भोपपत्तेर्न ततस्तदभावसिद्धिरित्यर्थः । तृतीयं निराकरोति * नापीति * परमते जीवे सत्यपि नित्यत्वे तस्य प्रत्यक्षत्वायोग्यत्वात्तद्विशिष्टाभेदाननुभववत्तदभिन्नेश्वरे सत्यपि नित्यज्ञाने तन्नित्यत्वस्यानुभवायोग्यत्वान्नित्यज्ञानवदभेदस्य सतोऽप्यनुपलम्भोपपत्तिरित्यर्थः । चतुर्थमपाकरोति * नापि सर्वज्ञत्वमिति * सर्वं वेद्यमित्यादिरूपस्य शब्दादिजनितसर्वविषयज्ञानमात्रस्य जीवे दर्शनान्न तद्वदभेदानुपलम्भोऽस्तीत्यर्थः। न च सर्वविषयप्रत्यक्षज्ञानवत्वं तदिति वाच्यम् । यो-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्वं नानुभूयते इति चेन्न, जीवज्ञाने नित्यताभ्रमदशायां तद्वैशिष्ट्यस्याप्यात्मन्यनुभूयमानत्वात् । ज्ञानार्थयोः स्वरूपमात्रं सम्बन्धश्चेत्सर्वं ज्ञानं सर्वविषयमेवेति निश्चयदशायां तदनुपलम्भाभावेन भेदग्रहो न स्यात् अस्ति च तदाऽपि सः। किं च ज्ञानस्याव्याप्यवृत्तित्वात्सर्वज्ञत्वादेर्जीवात्मप्रदेशावृत्तित्वेनाप्यनुपलम्भोपपत्तेर्न तदधिकरणे भेदग्रहः सम्भवति, न हि मूलावच्छेदेनाग्रत्वं नानुभूय-

गिषु तस्याऽप्यनुभवादिति भावः।पञ्चममुत्थापयति *नित्यसर्वज्ञत्वमिति * जीवज्ञानस्योक्तविधया सर्वविषयत्वे सति परमते 'अविनाशी वा अरेऽयमात्माऽनुच्छित्तिधर्मा' इत्यादिवचनात्तस्य नित्यत्वभ्रमसम्भवान्नित्यसर्वज्ञत्वमात्मन्यनुभवतस्तद्वदभेदानुपलम्भोऽसिद्ध इत्यर्थः । ननु नित्यसर्वविषयापरोक्षज्ञानवत्त्वमीश्वरत्वमित्याशङ्क्य परमते ज्ञानस्य स्वरूपातिरिक्तविषयसम्बन्धाभावान्नियामकाभावेन सर्वस्य सर्वविषयत्वापत्त्योक्तरीत्या ज्ञाने नित्यत्वभ्रमवतां घटादिज्ञानदशायां नित्यसर्वविषयापरोक्षज्ञानवत्त्वस्याप्यनुभवात्तदनुपलम्भादिति चेन्न जीवेशभेदग्रहसिद्धिरित्याह *ज्ञानार्थयोरिति *माऽस्तु तदाभेदग्रह इत्याशङ्क्याह * अस्ति चेति * अपि च सर्वगतात्मवादे शरीराद्यवच्छिन्नात्मप्रदेशतद्धर्मयोरेव प्रत्यक्षयोग्यत्वान्नित्यसर्वज्ञत्वादिरूपेश्वरत्वस्य तदवच्छिन्नात्मप्रदेशावृत्तित्वेनाप्यनुपलम्भोऽपपत्तिः न चानित्यात्मविशेषधर्माणामेव प्रदेशवृत्तित्वं लाघवेन विभुविशेषगुणमात्रस्यैव तथात्वात्तत्रात्मनि तदधिकरणाभेदस्य सतोऽप्यनुपलम्भसम्भवान्न ततस्तद्भेदसिद्धिरित्याह * किं च ज्ञानस्येति अत्र दृष्टान्तमाह * न हि मूलेति * मूलप्रदेशे चक्षुः सन्निकर्षादवच्छेदेन वृक्षानुभवेऽपि तत्राग्रत्वस्याभावादेवानुपलम्भोपपत्तौ तद्विशिष्टवृक्षाभेदानुपलम्भसम्भवान्न ततो मूलाग्रयोर्वृक्षभेदसिद्धिः एवमत्रापि इतरथा तत्रापि भेदः स्यादित्यर्थः । ननु मूलावच्छेदेन वृक्षेऽग्रत्वावच्छिन्नवृक्षाभेदानुपलम्भेपि वृक्षमात्राभेदोपलम्भात्

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त इति तदुभयाधिकरणभेदप्रमा सम्भवति वृक्षाभेदवदा-
त्माभेदमात्रस्यानुपलम्भाभावात् । तत्रैकवृत्तित्वमनुभूय-
ते यथा न तथाऽत्रेति चेत्तत्संशयदशायामपि योग्यानु-
पलम्भासम्भवेन स्वस्य विभुत्वविशिष्टभेदवत्तद्भेदस्य ग्र-
हासम्भवात् । किं चाहमिहेति परिच्छिन्नतयाऽनुभूयमाने
जीवे भेदोऽनुभूयते नाहमीश्वर इति, न च निरुपाध्या-

रूपेण न भेद इत्याशङ्क्य जीवेऽपि चिदात्माभेदानुपलम्भाभावान्न तद्रू-
पेश्वरभेदसिद्धिरित्याह *वृक्षाभेदवदिति * एतेनात्ममात्राभेदानुप-
लम्भो जीवे परभेदसाधक इति कल्पोऽप्यपास्तो वेदितव्यः। नन्वामू-
लाग्रमेको वृक्ष इति मूलाग्रयोरेकवृक्षसम्बन्धावगमान्मूलावच्छेदेना-
ग्रत्वानुपलम्भमात्रान्न वृक्षभेदसिद्धिः जीवत्वेश्वरत्वयोस्तु नैकध-
र्मिसम्बन्धोऽवभासते ततश्च जीवत्वावच्छेदेन सर्वज्ञत्वाद्यनुपलम्भो
बाधकाभावाद्धर्मिभेदसाधक इत्याशङ्क्यते * तत्रैकवृत्तित्वमिति *
आत्मनो वियदादिवद्विभुत्वादुद्रव्यत्वापरजातिरहितत्वे सति वस्तुतो
जीवात्मपरात्मभेदायोगेन जीवत्वेश्वरत्वाधिकरणाभेदनिश्चयोऽस्त्ये-
व उक्तयुक्त्यनवतारदशायामपीश्वरत्वस्य जीवे विभुत्वादिवद-
योग्यत्वादनुपलम्भः । किं वाऽन्यधर्मत्वादिति साधकबाधकाभावेन
संशयस्यैवावसरो न तद्धर्मिभेदनिश्चयस्य इतरथाऽऽत्मनि विभुत्वा-
दिवैशिष्ट्यस्य सर्वमूर्त्तद्रव्यसंयोगसमवायादिरूपस्यानवगमादात्म-
नि तद्विशिष्टाभेदानुपलम्भात्तद्भेदापात इत्याशयेनाह * तत्संशयद-
शायामपीति * तस्माज्जीवेश्वराभेदे योग्यानुपलम्भाभावात्तदभाव-
रूपतद्भेदे न प्रत्यक्षप्रमाणसम्भव इति भावः । एवमयोग्यानुपलब्धिक-
मित्येतत्प्रपञ्चय सोपाधिकस्थो भेदोऽयमित्येतत्प्रपञ्चयितुमापाततो भेद-
प्रतिभासं स्वीकरोति *किं चाहमिति* जीवात्मा किं स्वरूपेण विभुरु-
ताणुर्मध्यमपरिमाणो वा आद्येऽहमिहैवास्मि सदने इति प्रतिभासमान-
परिच्छेदस्य तस्मिन्स्वाभाविकत्वायोगात्परिच्छिन्नाहङ्कारशबलात्मन ए-
वाहंप्रत्ययालम्बनतया तत्र परिच्छेदप्रतिभासः औपाधिक उपपादनीयः
एवं चाहमीश्वरो नेत्यहम्प्रत्ययावसेयभेदस्योपाधिशबलात्मनिष्ठतया

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्मनः परिच्छेदः सम्भवति अणुत्वे आत्मनः सर्वशरीरव्यापिसुखाद्यनुपलम्भप्रसङ्गात् विरुद्धदेशद्वये युगपत्प्रयत्नाद्यनुपलम्भप्रसङ्गाच्च, स्वाभाविकमध्यमपरिमाणे चानित्यत्वाद्यापत्तिः अनन्तरपरिमाणे च गगनवन्न सजातीयभेद इत्यात्मैक एव ततो घटाकाशवदौपाधिक एव परिच्छेद इति तद्गतो भेदोऽप्यौपाधिक इति न तस्य सत्यत्वं न वा निरुपाधिकता। अपि चाहङ्कारोऽनात्मा द्व-

तत्प्रतिभासो रक्तोऽयं स्फटिको न शुक्ल इति प्रतिभासवदाभास इत्यर्थः। द्वितीयस्त्वनुपपन्न इत्याह *अणुत्व इति* नन्वणवात्मन एकदेशस्थत्वेपि तद्गुणानां गन्धादिवच्छरीरादिव्यापितोपपन्नेति चेन्न, गुणानां गुणिव्यतिरेकेण रूपादिवद्देशान्तरव्यापित्वायोगात् जलादावौष्ण्यवत्साश्रयस्यैव गन्धादेर्देशान्तरव्याप्तिकल्पनादन्यथैकशरीरसम्बन्धिकरद्वयेऽप्येकैकाङ्गुलिमात्रे युगपत् प्रयत्नद्वयस्यैकस्मिन्नात्मन्यसम्भवात्, न चैकशरीरेऽनेक आत्मानो युगपत् भोक्तारो भवन्ति ततश्च तत्र युगपत् चलनद्वयमनुभूयमानमनुपपन्नं स्यादित्याह * विरुद्धदेशेति * तृतीयोऽप्यनुपपन्न इत्याह *स्वाभाविकेति* अनित्यत्वमुत्पत्त्यादिमत्वं ततश्च कृतहानादिरादिपदार्थः। आत्मनः स्वतोऽणुत्वमध्यमपरिमाणत्वनिरासफलमाह * ततो घटाकाशवदिति * औपाधिकस्यापि सत्यत्वं मन्वानं प्रत्याह * न तस्येति * शङ्खायःपिण्डादौ पीतदग्धृत्वादेर्यावद्द्रव्यभाविशुक्लत्वानुष्णत्वादिविरोधेन सत्यत्वानुपपत्तेः प्रतिबिम्बादिष्वौपाधिकस्य मिथ्यात्वदर्शनाच्चौपाधिकभेदस्य न सत्यतेत्यर्थः। तर्ह्यनौपाधिक एवात्मभेदोऽस्त्वित्याशङ्क्य तस्य परिच्छिन्नोपाधिपरामर्शे सत्येव प्रतिभासान्नास्य स्वाभाविकतेत्याह * न वा निरुपाधिकतेति * एवं तावत्परिच्छिन्नाहङ्कारशबलात्मन एवाहम्प्रत्ययं प्रतिभासात्तत्प्रत्याय्यपरभेद आत्मनि परिच्छेदवत्तदुपाधिक एव न स्वाभाविक इत्युक्तम्। ननु दुःखादिधर्म्यहङ्कार एवाहमनुभवालम्बनं स एवात्मा तदनालम्बनस्य घटादेर-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्यत्वाद्घटवत् । न चाप्रयोजकत्वं, लाघवेन दृश्यत्वस्यैवानात्मत्वेन व्याप्तत्वादिति पक्षधर्मताबलादतिरिक्तात्मसिद्धिः । स च सुखादिसाधकः स्वप्रकाशो नित्या-

नात्मत्वनियमात् तस्मिंश्च स्वतः सर्वगते प्रतिभासमानः परिच्छेद एव शरीरतादात्म्यारोपनिबन्धनस्तदुपाधिकः परभेदस्तु तत्र प्रतिभासमानः तस्य परस्मादभेदस्यासम्भवात् स्वाभाविक एवेत्याशङ्क्याहङ्कारस्यानात्मत्वं साधयति * अपि चेति * दुःखादिसमसत्ताकस्तद्धर्मी प्रतियोगिसमसत्ताकात्मत्वप्रतियोगिकात्यन्ताभाववान् चैतन्यविषयत्वात् घटवदिति प्रयोगो विवक्षितः तथा च किमहङ्कारोऽन्तःकरणं तदतिरिक्तो वा, आद्ये सिद्धसाधनं द्वितीये बाध (१) इत्यादेर्दोषस्यानवकाशः ।सिद्धान्ते चिदात्मनि कल्पितात्मत्वप्रतियोगिकवास्तवाभावसत्वेऽपि तत्प्रतियोगिकतत्समसत्ताकाभावस्य घटादाविवाभावादनात्मत्वाभावः सिद्धः तद्वदहङ्कारेऽप्यर्थान्तरत्ववारणाय प्रतियोगिसमसत्ताकेत्यभावविशेषणम् । नन्वनात्मत्वे न दृश्यत्वं प्रयोजकं किन्तु दर्शनाना(२)श्रयत्वं घटादावनात्मनि नियमेन दर्शनादतोऽप्रयोजको हेतुरित्याशङ्क्य तस्याभावघटिततया गुरुत्वाल्लाघवेन दृश्यत्वमेव तद्व्याप्यत्वेन प्रयोजकमित्याह * न चाप्रयोजकत्वमिति * अहङ्कारस्यानात्मत्वेऽपि कथं तदतिरिक्तात्मसिद्धिरित्याशङ्क्यानात्मनि पक्षे दृश्यत्वहेतोरतिरिक्तद्रष्टारं विनाऽनुपपत्तेरर्थात्तत्सिद्धिरित्याह * इति पक्षधर्मतेति * नन्वहङ्कारातिरिक्तात्मकल्पने गौरवात्तस्यैव स्वद्रष्टृत्वकल्पने लाघवं तदतिरिक्तात्मनि दृश्यत्वे हेतोर्व्यभिचारश्च अदृश्यत्वे वा तदसिद्धिरित्याशङ्क्याह * स चेति * परेषामपि तावदन्तःकरणातिरिक्तात्मा सम्मतः ततो नालौकिकात्मकल्पनागौरवं प्रत्युत तस्य मनसः प्रमाणत्वभङ्गसमये दुःखादेः स्वप्नादेश्च साक्षित्वेन प्रमाणयुक्तिभ्यां साधितैकनित्यस्वप्रकाशानुभवमात्रत्वकल्पनादात्मनानात्वस्याभावाल्लाघवं परमते तु त(३)

(१) प्रमाणान्तरेण यस्य साध्याभावो निश्चितः स बाधः ।
(२) दर्शनाभावाश्रयत्वम् ।
(३) आत्मनोनित्यत्वैकत्वस्वप्रकाशत्वनानात्वादि ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नुभवः प्रागुक्तः स एवेति न दृश्यः तथा चानात्माह-ङ्कारविशिष्ट एव भिन्नतया प्रतीयत इति नाहमीश्वर इति प्रत्यक्षं न निरुपाधिकजीवभेदे प्रमाणम् ॥ ८ ॥

अनुमानमपि न जीवपरभेदे प्रमाणम् ।
सिद्धसाध्यत्वतो भेदो व्याप्यत्वासिद्धतो ऽथवा ।
बाधाज्जडत्वोपाधित्वान्नानुमानस्य गोचरः ॥ ९ ॥

तत्र न तावज्जीवो ब्रह्मधर्मिकभेदप्रतियोगी ब्रह्मप्रति-

त्कल्पनीयमिति गौरवं स्वप्रकाशानुभवात्मनि श्रुतः सिद्धे तद्विषयत्व-रूपदृश्यत्वाभावान्न व्यभिचारो न वा तदसिद्धिरिति भावः । यच्चो-क्तमहङ्कारे परिच्छिन्नदेहतादात्म्यारोपादेव परिच्छेदावभास इति तदप्ययुक्तं, उक्तविधयाऽनात्मनोन्तःकरणरूपाहङ्कारस्योत्पत्त्यादिमत्त्वे सर्वगतत्वे प्रमाणाभावात्तत्र प्रतिभासमानपरिच्छेदस्य स्वाभाविक त्वोपपत्तेस्तस्य स स्वाभाविको न त्वौपाधिकः आत्मनि तु तदुपा-धिक एव स प्रतिभासते एवं भेदोऽपि तदुपाधिक एवात्मनि प्रति-भासते न स्वाभाविक इत्युपसंहरति * तथाचेति * ॥ ८ ॥

एवं तावन्मानाभावादयुक्तेश्चेति जीवेशभेदे सामान्येन सर्वं प्रमाणाभावं प्रतिज्ञाय तत्र प्रत्यक्षाभाव आक्षेपसमाधानाभ्यामुपपा-दितः इदानीमनुमानाभावं प्रपञ्चयितुं वक्ष्यमाणानुमाने दूषणगणं सङ्गृह्णाति *सिद्धसाध्यत्वत इत्यादिना* भेदो जीवेशभेदो नानुमानस्य गोचर इत्युक्तेऽर्थेऽर्थादनुमानं तत्र न प्रमाणमित्युक्तं तत्र हेतवः सिद्ध साध्यत्वादयः तेचानन्तरमेव स्पष्टीकरिष्यन्ते ।भेदो नानुमानस्य गो-चर इत्येतद्विवृणोति*अनुमानमपीति*जीवपरभेदसत्यत्वे किं जीवध-र्मिकानुमानं प्रमाणं, ब्रह्मधर्मिकानुमानं वा, आद्ये ऽपि किं जीवे ब्रह्म भेदमात्रं साध्यं ज्ञानाबाध्यत्वविशिष्टो वा पारमार्थिको वा ऽनौपाधिकं वा तद्भेदः साध्य इति विकल्पानभिप्रेत्याद्यमनूद्य सिद्धसाध्यत्वेन नि राकरोति * तत्र न तावदित्यादिना * पद्यत इतिपदं ब्रह्म तदर्थत्वा च्छेषत्वात्तन्नियम्यत्वादिति यावत्, ततश्च जीवस्य ब्रह्माभिन्नत्वे त

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यौगिकभेदवान्वा पदार्थत्वादसर्वज्ञत्वाद्घटवदित्यनुमानं प्रमाणं सिद्धसाधनत्वात् । न च स्वज्ञानाबाध्यभेदवानिति साध्यं ज्ञानाबाध्यभेदश्च परमार्थ इति न सिद्धसाधनमिति वाच्यम् । असत्यस्यापि भेदस्य घटादिज्ञानेनेव जीवज्ञानेनाप्यबाध्यत्वात् । न चात्मज्ञानाबाध्यत्वं तेन विवक्षितमिति वाच्यम् । दृष्टान्ते साध्याप्रसिद्धेर्व्याप्यत्वासिद्धेश्च । अत एव पारमार्थिकभेदवानिति साध्यं निरस्तम् । न

दनुपपत्तिर्बाधिका पदार्थत्वादित्यस्य ब्रह्मणि न व्यभिचारश्च । अत्र यद्यपि नियम्यत्वमात्रमव्यभिचारि तथापि तन्नियामकसापेक्षं तेन विना न पर्यवस्यतीति ब्रह्मनियम्यत्वादित्युक्तमिति द्रष्टव्यम् *सिद्धसाधनत्वादिति* जीवब्रह्मणोः परस्परप्रतियोगिकाविद्यकव्यावहारिकभेदस्य सिद्धान्तिनाऽपि स्वीकारादित्यर्थः । एतेन जीवस्य ब्रह्मणो भेदाभावे तन्नियम्यत्वानुपपत्तिरपि प्रत्युक्ता, नियम्यत्वादेः स्वसमानसत्ताकनियन्त्रादिभेदसापेक्षत्वात्तस्य च स्वीकारादिति द्वितीयं निराकरोति * न चेति * अस्य वाच्यमित्यनेनान्वयः । स्वज्ञानाबाध्यभेदस्य साध्यत्वेऽपि कथं सिद्धसाधनतापरिहार इत्याशङ्क्य शङ्कितैवाह * ज्ञानाबाध्येति * तत्र किं स्वपदोक्तजीवपदवाच्यकर्त्रादिरूपात्मज्ञानाबाध्यत्वं भेदस्य साध्यमुत तदुपलक्षिताखण्डचिदात्मज्ञानाबाध्यत्वं ज्ञानमात्राबाध्यत्वं वा आद्ये व्यावहारिकानिर्वचनीयभेदस्यापि संसारिजीवज्ञानाबाध्यत्वेनेष्टतया सिद्धसाधनमित्याह * असत्यस्यापीति * द्वितीयतृतीयौ तु श्लोकोक्तव्याप्यत्वासिद्धिमवतार्यन्निराकरोति * नचात्मज्ञानेति * अत्र चेन तृतीयकल्पनिरासः समुच्चीयते, सर्वस्य द्वैतस्य जडतया शुद्धचिदात्मनि अविद्याविलसितत्वेन तज्ज्ञानबाध्यत्वस्वीकारात्तज्ज्ञानाबाध्यस्य ज्ञानमात्राबाध्यस्य वा भेदस्य काप्यनभ्युपगमात् घटादावपि व्याप्यभावेन व्याप्यत्वासिद्धिरित्यर्थः । पारमार्थिकभेदः साध्य इति तृतीयोऽपि व्याप्यत्वासिद्धत्वादेवायुक्त इत्याह * अतएवेति * चतुर्थमपवदति * न

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चानौपाधिकभेदः साध्यते दृष्टान्तेऽपि तत्सत्वात् जीवे चानौपाधिकभेदसिद्धौ केवलस्यैव भेदः सिध्यतीति सत्यभेद इति वाच्यम् । नाहमीश्वर इति भेदस्यौपाधिकत्वेनानहङ्कारजीवभेदाननुभवेन च बाधितत्वात् । ननु ब्रह्म जीवप्रतियोगिकधर्मिज्ञानाबाध्यभेदवत् पदार्थत्वादसंसारित्वात् घटवत्, ततश्च भेदस्य ब्रह्मज्ञानाबाध्यत्वे स-

चाऽनौपाधिकेति * अत्रापि न चेत्यस्य वाच्यमित्युत्तरेण सम्बन्धः यत्राभेदः प्रामाणिकस्तत्र भेद औपाधिक इति हि स्थितिः ततश्च घटादिभेदे निरुपाधिकत्वस्योभयसम्मतत्वादत्र न साध्याप्रसिद्धिरिति शङ्कितुरेवाशयमाह * दृष्टान्तेऽपीति * जीवेशभेदस्य निरुपाधिकत्वेऽपि घटादिभेदवन्मिथ्यात्वोपपत्तेः सिद्धसाधनतात्राऽपि तदवस्थेत्याशङ्क्य तस्यैवाशयमाह * जीवे चेति * अनादेर्जीवेशभेदस्याविद्याद्युपाधिकत्वाभावे सिद्धे तत्त्वज्ञानादविद्यादेर्निवृत्तावपि तत्कार्यघटादिभेदवत्ततस्तन्निवृत्तेरयोगात्तत्सत्यत्वसिद्धिरित्याशयः । अस्यापि बाध्यत्वे हेतुमाह * नाहमीश्वर इति * अत्र किं नाहमीश्वर इत्यनुभूयमानस्य भेदस्य निरुपाधिकत्वं साध्यते उत तदतिरिक्तस्य, नाद्यः अहम्प्रत्ययस्यानात्माहङ्कारशबलात्मविषयत्वोपपादनात्तत्प्रत्याय्यभेदस्य तदुपाधिकत्वनिश्चयेन तन्निरुपाधित्वस्य बाधितत्वात्। न द्वितीयः तस्योपलब्धुं योग्यत्वेऽनुपलम्भविरोधात् तस्य तदयोग्यत्वे च हेतोरप्रयोजकत्वं संसारित्वासंसारित्वादिव्यवस्थाया औपाधिकहृष्टभेदादप्युपपत्तेरिति भावः । इदानीं ब्रह्मपक्षकानुमानं प्रयुञ्जन्सिद्धिसाध्यत्वादिपरिहारं शङ्कते * ननु ब्रह्मेति अत्र पदार्थत्वादिति यथाश्रुत एव हेतुः । न च जीवेन व्यभिचारः तस्यापि जीवान्तरप्रतियोगिकभेदोपगमेन पक्षसमत्वात् । ननु रूपादिधर्मिघटादिज्ञानाबाध्यजीवप्रतियोगिकभेदस्य ब्रह्मणि सिद्धान्तिनापि स्वीकारात् सिद्धसाधनमित्याशङ्क्याह * ततश्चेति * धर्मिणा देन समभिव्याहृतभेदधर्मिण एव विवक्षितत्वात् प्रतिज्ञावचने ब्रह्म

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्यत्वमिति चेन्न । जीवप्रतियोगिकभेदस्य ब्रह्मणि घटादौ चैकत्वेन स्वधर्मिघटज्ञानाबाध्यतया सिद्धसाधनात् । न च यावद्धर्मिज्ञानाबाध्यत्वं भेदविशेषणमितिवाच्यम् । दृष्टान्ते तदभावात् । न च स्वज्ञानाबाध्येति विशेषणान्नोक्तदोष इति वाच्यम् । ब्रह्मादिपदवाच्यस्य ब्रह्मणो यत्किञ्चिद्धर्मविशिष्टत्वेन तज्ज्ञानाबाध्यत्वेऽपि भेदे सत्य-

णस्तद्धर्मित्वावगमात् तद्धर्मिकभेदस्य तज्ज्ञानाबाध्यत्वे तद्वदेव सत्यत्वसिद्धिरिति भावः । धर्मिपदेन जीवप्रतियोगिकभेदधर्मिविवक्षायामपि किं यत्किञ्चित्तद्धर्मिज्ञानाबाध्यत्वं तत्र सिषाधयिषितं यावत्तद्धर्मिज्ञानाबाध्यत्वं वा ब्रह्मज्ञानाबाध्यत्वं वा, नाद्यः स्वरूपातिरिक्तभेदवादिमते ब्रह्मणि घटादौ च जीवभेदस्यैकत्वात्तद्धर्मिघटज्ञानाबाध्यजीवभेदस्य ब्रह्मणि सिद्धान्तिनाऽपि स्वीकारेणात्रापिसिद्धसाध्यत्वादिति दूषयति * न जीवप्रतियोगिकेति * द्वितीयं निराकरोति * न च यावदिति * दृष्टान्ते तदभावादिति घटगतजीवभेदस्यापि स्वधर्मिब्रह्मज्ञानबाध्यत्वस्वीकारेण यावद्धर्मिज्ञानबाध्यत्वस्यासम्प्रतिपत्तेरत्रापि व्याप्यत्वासिद्धिरित्यर्थः, अतएव न तृतीयोपीति भावः । ननु ब्रह्म जीवप्रतियोगिकधर्मिज्ञानाबाध्यभेदवदिति प्रतिज्ञायां धर्मिपदं त्यक्त्वा तत्स्थाने स्वपदं प्रयुज्यते तस्य च समभिव्याहृतपरत्वस्य व्युत्पत्तिसिद्धत्वात्प्रतिज्ञायां पक्षपरत्वमुदाहरणे तु घटादिपरत्वमिति न सिद्धसाधनं न वा व्याप्यत्वासिद्धिरिति नेत्याह * न च स्वज्ञानेति * प्रतिज्ञायां ब्रह्मपदसमभिव्याहृतस्वपदेन किं ब्रह्मेशादिपदवाच्यमनवच्छिन्नत्वसर्वज्ञत्वादिविशिष्टं विवक्षितत्वात्तज्ज्ञानाबाध्यत्वं भेदे साध्यते उतात्र ब्रह्मपदेन वेदान्ततात्पर्यगोचरं निर्विशेषं सत्यज्ञानादिरूपं वस्तु लक्षयित्वा तत्समभिव्याहृतस्वपदेनापि तत्परामृश्य तज्ज्ञानाबाध्यत्वं साध्यते, आद्ये सिद्धसाध्यत्वं तदवश्यं तद्भेदे विशिष्टब्रह्मज्ञानाबाध्यत्वस्य सिद्धान्तिनापि स्वीकारादित्याह * ब्रह्मादिपदेति * यत्किञ्चिद्धर्मविशिष्टत्वेन अपरिच्छिन्नत्वादिविशिष्टत्वेन हेतुना तद्विशि-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्वासिद्धेः । वेदान्ततात्पर्यगोचरब्रह्मपरत्वे च ब्रह्मश-
ब्दस्य धर्मिग्राहकमानबाधो हेतोरसिद्धिश्च, जडत्वं चो-
पाधिः तच्चास्वप्रकाशत्वं स्वप्रकाशत्वं चात्मनः श्रु-
तिन्यायसिद्धमिति न तदसिद्धिर्न वा साधनव्यापक-
ता । सर्वेषां चोक्तहेतूनामप्रयोजकत्वं, कल्पितभेदेनापि

ष्टज्ञानाबाध्यत्वेऽपीत्यर्थः। द्वितीये तत्त्वमस्यादिवेदान्तानां ब्रह्मादिपद-
लक्ष्यस्याद्वयानन्दस्य प्रत्यग्बोधात्मजीवाभेदे तात्पर्यस्य समन्वया-
दिसूत्रैर्निर्द्धारितत्वादत्राप्यनन्तरं वक्ष्यमाणत्वाद्धर्मिग्राहकवेदान्त-
बाधितविषयं जीवाद्ब्रह्मणो भेदानुमानमाभास इति सङ्ग्रहश्लोकोक्तं
बाधमवतारयति * वेदान्ततात्पर्य्येति * किं च पक्षीकृतस्य वे-
दान्ततात्पर्यगोचरब्रह्मणो निर्विशेषत्वेन तत्र धर्ममात्राभावात् पदा-
र्थत्वादिहेतोरसिद्धिरित्याह * हेतोरिति * किं च घटादेर्जडतया
दृश्यत्वेन मिथ्यात्वात्तद्विषयज्ञानस्य घटतद्भेदहेत्वविद्यानिवृत्त्ययो-
ग्यत्वात्तत्र स्वज्ञानाबाध्यभेदवत्त्वं जाड्यप्रयुक्तामिति जडत्वमुक्तसा-
ध्यव्यापकं साधनवति स्वप्रकाशात्मनि अभावात्साधनाव्यापकं च
ततश्च सोपाधिकत्वादयं हेत्वाभास इत्याशयेन जडत्वोपाधित्वादि-
त्येतदवतारयति * जडत्वं चेति * ननु प्रमेयत्वातिरिक्तजडत्वा-
भावात्तस्य च केवलान्वयित्वात्साधनव्यापकत्वादिना नोपाधित्वमि-
त्याशङ्क्याह * तच्चास्वप्रकाशत्वमिति * ननु स्वप्रकाशत्वस्य ग-
गनकमलिनीकल्पत्वात्तदभावात्मकास्वप्रकाशत्वमपि तादृशमेवेति
नेत्याह * स्वप्रकाशत्वं चेति * स्वप्रकाशत्वं हि विनैव प्रकाशान्वि-
षयत्वं स्वमहिम्नैव स्वसत्ताप्रकारकसंशयाद्यगोचरत्वं 'अत्रायं पु-
रुषः स्वयं ज्योतिरात्मैवास्य ज्योति' 'रन्यदेव तद्विदिता' दित्या-
दिश्रुत्या सुखमहमस्वाप्समिति परामर्शानुपपत्त्याऽऽत्मन्यवस्थात्रये-
ऽपि सत्ताप्रकारकसंशयाभावानुपपत्त्या च मनसः प्रमाकरणत्वनि-
रासार्थमुक्तन्यायेन च सिद्धं, घटादौ तु तदभावरूपं जडत्वं सिद्ध-
मित्यनवद्योऽयमुपाधिरित्यर्थः । जीवगतो ब्रह्मभेदः स्वप्रतियोगि-
ज्ञानाबाध्यः अज्ञातसत्ताकत्वे सति भेदत्वात् सप्रतियोगिकत्वाद्वा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

निखिललौकिकवैदिकव्यवस्थितव्यवहारोपपत्तेर्वक्ष्यमाण-
श्रुतिर्बाधश्च(१) तस्मान्नानुमानं भेदे प्रमाणम् ॥ ९ ॥
एवं श्रुतिरपि न भेदे प्रमाणम् ।

घटे पटप्रतियोगिकभेदवदित्यादिहेतूनां पूर्वोक्तानां च विपक्षे बाधकाभावात्सन्दिग्धानैकान्तिकतामप्याह * सर्वेषां चेति * चकारोऽनुक्तसमुच्चयार्थः । जीवानां परस्परमीश्वराच्च भेदाभावे स्वर्गनरकसंसारित्वादिव्यवस्थानुपपत्तिर्बाधिकेत्याशङ्क्याह * कल्पितेति * अस्या व्यवस्थाया व्यावहारिकत्वात्तादृशभेदं विनाऽनुपपत्तावपि न भेदसत्यत्वं विना का चिदनुपपत्तिरस्ति केवलव्यतिरेकाभावादिति भावः । शुद्धब्रह्मपक्षकानुमानविशेषस्योपजीव्यश्रुतिविरोधः प्रागुक्तः सम्प्रति 'नान्योतो द्रष्टा' 'एषते आत्मान्तर्याम्यमृतः' 'तत्त्वमेव तत्' 'अयमात्मा ब्रह्म' 'तत्त्वमसीत्यादिभि' र्निरपेक्षाभिरुत्तरभावितया प्रबलाभिः श्रुतिभिर्विरोधात्सर्वे हेतवो बाधितविषया इत्याह * वक्ष्यमाणेति * जीवेशभेदविषयानुमाननिराकरणमुपसंहरति * तस्मादिति * एवं मानाभावादित्यत्र सङ्गृहीतमनुमानप्रमाणाभावं प्रपञ्चयागमप्रमाणाभावं प्रपञ्चयितुं जीवपरभेदस्यागमाप्रतिपाद्यत्वे हेतून्सङ्गृह्णाति * मानान्तरेति * अत्र भेदग्राहिप्रत्यक्षस्य प्रमाणत्वं परमतेनानूदितं न तु वस्तुवृत्तेन तत्प्रमाणत्वस्य प्राङ्निरासात् तथा चानुभवसिद्धत्वादिति तदर्थः । अतएव नाहमीश्वर इति भेदप्रतीतिरस्तीति तद्विवरणसमये वक्ष्यति 'ऋतं पिबन्तौ' 'द्वा सुपर्णे'त्यादिश्रुतिर्न जीवेशभेदे प्रमाणं अनुपलब्धेऽर्थे तत्प्रमाणमित्यज्ञातेऽर्थे जैमिन्यादिभिः श्रुतिप्रामाण्यस्य न्यायतो निर्धारितत्वेनान्यतोऽवगते भेदे तत्प्रामाण्यायोगात् श्रुत्यापि दुःखादिधर्मी संसारीश्वरो नेत्यादिरूपेणैव भेदप्रतीतेस्तस्य चौपाधिकत्वेन मिथ्यात्वोपपादनादहङ्कारारिक्तात्मभेदस्य परेषामपि श्रुत्यर्थत्वेनानभ्युपगमात् श्रुतिजन्यभेदज्ञानस्य स्वर्गापवर्गाख्यप्रयोजनानङ्गतया श्रुतेरध्ययनविधिप्रापितप्रयोजनवत्त्वव्याघातात् 'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यती'त्यादिना भेदज्ञानाज्जन्ममरणाद्यनर्थस्यैव श्रवणाद्वक्ष्यमाणविधया

(१) श्रुतिर्बाधका चेति क० पु० पा० ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मानान्तरप्रसिद्धत्वान्मिथ्यात्वादप्रयोजनात् ।
श्रुत्यन्तरविरोधाच्च न श्रुतिर्भेदगोचरा ॥ १० ॥

अस्ति हि श्रुतिप्रतिसन्धानविरहिरणामपि नाहमीश्वर इति भेदप्रतीतिः परं तु स वर्णितरीत्या योग्यानुपलब्धेरभावाद्बिम्बप्रतिबिम्बभेदवन्मायिकः साक्षिमात्रसिद्ध इति (१) ब्रूमः ततश्चानुभवसिद्धे न श्रुतितात्पर्य्यं, विनाऽपि प्रमाणाभावप्रयुक्ततदसत्वशङ्काया-(२)व्यावर्त्तितत्वात् । न च श्रुतिजन्यज्ञानमात्रेण तत्तात्पर्य्यमिति नियमः, तात्पर्य्याभावेपि शब्दशक्त्यादिभिरर्थ-

भेदपरानेकश्रुतिविरोधाच्चेति श्लोकार्थः । मानान्तरप्रसित्वादित्येत द्विवृणोति * अस्तिहीति * तर्हि तत एव भेदः सिद्ध इति मदि सिद्धिरित्याशङ्क्याह * परन्तु स इति * भेदे प्रत्यक्षप्रतिपन्नत्वमा स्वीक्रियते तत्र श्रुतिप्रामाण्यवारणाय न तु तत् प्रमाणं तदसम्भव स्योक्तत्वादनुभवमात्रस्य शुक्तिरजतादिसाधारणत्वात्तन्मात्रात्तस्य सत्वसिद्धिरित्यर्थः । भेदस्यान्यतः सिद्धावपूर्वत्वाभावान्न श्रुतिता त्पर्य्यगोचरत्वमित्याह * ततश्चेति * अपूर्वत्वरहिते शब्दतात्प र्य्यं नेत्यत्र न्यायमाह * श्रुतितात्पर्य्यमिति * येन वाक्येन य प्रतीत्युत्पादनेन मानाभावप्रयुक्तासत्वशङ्का निवर्त्यते तस्य तत्र ता त्पर्य्यमन्यथा तस्य तदर्थत्वायोगात् यत्परः शब्दः स शब्दार्थ इ न्यायात् । यथा ज्योतिष्टोमादिवाक्यस्य यागादिगतस्वर्गसाधन त्वादौ भेदे त्वन्यतो निश्चितेऽसत्वशङ्काया एवाभावाच्छ्रुतितात्प र्य्यकल्पनं विफलमित्यर्थः । अर्थप्रतीतिमात्रमेव वाक्यतात्पर्य्यनि यामकं किं न स्यादित्याशङ्क्य तस्यान्यथाप्युपपत्तेर्न तत्कल्पकतेत्या ह * न च श्रुतीति * प्रतीतिमात्रस्यार्थे तात्पर्य्यकल्पकत्वे ऽतिप्र सङ्गमप्याह * अन्यथेति * ग्रहं सम्मार्ष्टीत्यत्रोद्देश्यग्रहविशेष

(१) वयं इति ख० पु० पा० (२)व्यावृत्तत्वादिति ख० पु० पा०

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रतीत्युपपत्तेः अन्यथा ग्रहैकत्वादावपि तात्पर्यप्रसङ्गः । श्रुतिसिद्धमेव भेदं प्रत्यक्षादिरनुवदतीति विपरीतमेवास्तीति(१)चेन्न । यस्य यत्प्रमाणाधीनासत्त्वशङ्काव्यावृत्तिस्तत्तत्प्रमेयं भेदश्च निरपेक्षानुभवव्याप्तिबलप्रवृत्तानुमानाभ्यामेवासद्व्यावृत्ततया सिद्धो न बहुसापेक्षविलम्बितश्रुत्येति श्रुतिरनुवादः । न चानुभवाद्यगो-

गतया प्रतिपन्नैकत्वेपि तात्पर्य्ये तत्र ग्रहमात्रस्योद्देश्यत्वसम्भवेपि तद्विशिष्टस्योद्देश्यत्वकल्पनायां गौरवात्तस्य पृथगुद्देश्यता स्यात् ग्रहं संमार्ष्टि तच्चैकमिति, ततश्च प्रत्युद्देश्यं ,वाक्यपरिसमाप्तेर्विध्यावृत्तिरूपवाक्यभेदः स्यादिति शब्दावगते तत्र तत्तात्पर्य्यकल्पनमयुक्तं तवापतेदित्यर्थः । नन्वेवमपि भेदस्य प्रत्यक्षादिप्रवृत्तेः प्रागपूर्वतया निरपेक्षश्रुतिप्रमेयत्वाच्छ्रुतेस्तत्र तात्पर्य्योपपत्तिरिति शङ्कते * श्रुतिसिद्धमेवेति * प्रत्यक्षादेरपि निरपेक्षतया प्रथमप्रवृत्तिसम्भवाच्छ्रुतिसिद्धभेदानुवादित्वनियमस्तावदयुक्त इत्याह * नेति * तर्हि कस्य चित्प्रथमप्रवृत्ता श्रुतिर्भेदे प्रमाणमित्याशङ्क्य तस्या नियमेनोत्तरभावित्वेन भेदस्य तत्प्रमेयत्वं निराकर्त्तुं प्रमेयत्वनियामकं तावदाह * यस्येति * प्रमाणाभावादिदमसदिति शङ्का यस्य येन प्रमाणेन व्यावर्त्यते तत्तत्प्रमेयमित्यर्थः । श्रुतेर्वाक्यार्थविषये मानान्तरानपेक्षत्वेपि पदपदार्थव्युत्पत्तिसापेक्षत्वात्तस्याश्च प्रत्यक्षानुमानसापेक्षत्वात्तयोः पूर्वं प्रवृत्तिरवश्यमभ्युपेया ततश्चात्मभेदविषययोरपि प्रत्यक्षानुमानयोर्निरूपितरूपयोः स्वसामग्रीतः प्रथमप्रवृत्तेः श्रुत्यनभिज्ञेष्विव तदभिज्ञेष्वप्यावश्यकत्वात्तत एवात्मभेदासत्त्वशङ्कानिवृत्तेस्तत्सिद्धभेदानुवादिनी श्रुतिरतत्परेत्याह * भेदश्चेत्यादिना * ननु प्रत्यक्षसिद्ध आत्मभेदो व्यावहारिकोऽस्तु, वास्तवस्तु तद्भेदो ऽपूर्वः श्रुतिगम्यो भवत्वित्याशङ्क्य श्रुतेरनुवादत्वनिराकरणायैवमपूर्वार्थकल्पने वेदे सर्वत्र मानान्तरसिद्धविधिष्टार्थानुवादभङ्गप्रसङ्गेन भे-

(१) वास्त्विति ख० पु० पा० ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चरतात्त्विकभेदः श्रुतिगोचर इति वाच्यम् । जीवे भे
दद्वयस्य बाधितत्वात् । नचास्यैव तात्त्विकत्त्वं श्रुत्य
इति वाच्यम् । पामराणामपि तत्तात्त्विकबुद्धेः सत्वात
परं तु साऽधिष्ठानचैतन्यनिष्ठेत्यस्माभिरुच्यते त्वया तु भे
दस्यैवेति किं श्रुत्या । न च श्रुतिबलाद(१)स्माभिर्भेदप्रत्य
क्षस्य तात्त्विकविषयत्त्वं कल्पितमिति न श्रुतिवैयर्थ्यमि

दान्तरस्य बाधितत्वान्नैवमित्याशयेनाह * न चानुभवाद्यगोचर
त्यादिना * तर्हि प्रत्यक्षादिसिद्धभेदानुवादेन तस्य तदसिद्धं वास्तव
श्रुत्या प्रतिपाद्यते इत्याशङ्क्याति प्राकृतानामपि बाधानुदयेनोत्सर्गत
त्सत्यत्वस्यापि सिद्धेर्नैवमित्याह * न चास्यैवेति * भेदे पामराण
मपि तात्त्विकत्वबुद्धिस्वीकारे परस्येष्टापत्तिमाशङ्क्याह * परन्ति
ति * सा तात्त्विकबुद्धिः अधिष्ठानचैतन्यनिष्ठा वस्तुतस्तत्तात्त्वि
त्वविषयेत्यर्थः । अनिदमि रजतादाविदन्ताप्रतिभासवद्वस्तुतः
द्विलक्षणेपि भेदे सदधिष्ठानतादात्म्यादेव घटादाविव सत्वबुद्धि
स्ततो भेदादिसत्तायाः श्रुत्यादिबाधितत्वादिति सिद्धान्तिभिः स्व
क्रियते परंण तु सा स्वत एव तत्सत्तागोचरेति, नचैतावता त
तात्त्विकत्वसिद्धिः न वा तस्यापूर्वत्वं येन श्रुतिप्रमेयता स्यादि
भावः । ननु भेदप्रत्यक्षस्य तात्त्विकातात्त्विकसाधारणविषयस्य
तिवाक्यस्येव श्रुतिमुपजीव्य तात्त्विकविषयत्वरूपं प्रामाण्यं परैः
ऽप्यते ततश्च स्मृतिसमानविषयश्रुतेरिव प्रत्यक्षसिद्धभेदविषयश्रु
रपि नानुवादित्वेनाप्रामाण्यमित्याशङ्क्याह * न च श्रुतिबलादित्य
दिना * स्मृतिवाक्यस्य हि पौरुषेयतया मूलप्रमाणापेक्षत्वात्तद
स्यालौकिकतया श्रुतिरेव तन्मूलमिति तदपेक्षं तत्प्रामाण्यमिति
क्तं, प्रत्यक्षादेस्तु श्रुतेरिव स्वार्थप्रवृत्तमानान्तरनिरपेक्षत्वान्न
दपेक्षं तत्वावेदनप्रामाण्यं किन्तु स्वतोऽर्थक्रियाकारित्वाद्वेद
दिति परेषामभ्युपगमात्तद्विरुद्धं भेदप्रत्यक्षस्य श्रुत्यपेक्षया तत्व

(१) बलादेवा इति ख० पु० पा० ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वाच्यम् । श्रुतेरिव प्रत्यक्षादीनामपि परस्य स्वतः प्रमाणत्वात् यावद्व्यवहारं घटादिवद्बाधाभावाच्च । अत एव सिद्धान्त्यभिमतस्य(१) मिथ्यात्वं श्रुतिर्बाधत इति निरस्तम् । परस्य श्रुति(२)प्रामाण्यप्रत्यक्षेणैवतत्सिद्धेः अन्यथाऽद्वैतवाक्यानां प्रत्यक्षादिबाधोपन्यासस्तवासङ्गत एव स्यात् तस्मान्न प्रत्यक्षादिसिद्धे श्रुतेस्तात्पर्य्यम् । किं चाहमर्थे प्रतीयमानभेदस्योक्तरीत्या सोपाधिकतया मिथ्यात्वेन न तत्र तत्वावेदकश्रुतितात्पर्यम् । न च सो-

वेदकत्वाभिधानमिति भेदश्रुतेः स्मृतिमूलश्रुतिवन्न प्रामाण्यसिद्धिरित्यर्थः । भेदसत्यत्वस्य प्रत्यक्षादिसिद्धत्वेऽपि तस्यानादिवादिपरम्परापरिकल्पितस्य प्रतिपन्नोपाधौ बाद्ध्यत्वरूपमिथ्यात्वस्यासद्बाधिप्राप्तासत्वस्येवाभावोऽपूर्वः श्रुतितात्पर्य्यगम्य इति कस्य चित्कल्पनामपवदति * अत एवेति * एतद्विवृणोति * परस्येति * भेदस्य तात्त्विकत्वं नाम बाधायोग्यत्वं तथा च तद्ग्राहकत्वेनाभ्युपेतप्रत्यक्षादिनैव बाद्ध्यत्वरूपमिथ्यात्वस्य निषेधसिद्धिः परमते श्रुतेरिव प्रत्यक्षादेरपि तत्वावेदकत्वात्ततश्च न तस्याप्यपूर्वतेत्यर्थः । परस्य प्रत्यक्षादिना द्वैतसत्यत्वसिद्ध्यनभ्युपगमे बाधकमाह * अन्यथेति * भेदस्यापूर्वत्वाभावाच्छ्रुतिर्न तत्परेत्युपसंहरति * तस्माद्धिति * सिद्धे भेदे इति शेषः । इदानीं मिथ्यात्वादिति श्लोकोक्तहेतुं प्रपञ्चयति * किं चाहमर्थे इति * उक्तरीत्येति * परिच्छिन्नाहङ्कारपरामर्शे सत्येवात्मनि भेदप्रतीतेस्तत्परिच्छेदवद्भेदोऽप्यौपाधिकत्वान्मिथ्येत्युक्तयुक्त्येत्यर्थः । सोपाधिकस्याप्यात्मभेदस्य वास्तवत्वमङ्गीकुर्वाणमेकदेशिनं प्रत्याह * न च सोपाधिकमपीति * घटाकाशादिगतभेदचलनादेर्दर्पणमुखादिगतश्यामत्वादे-

(१) भिमतमिथ्यात्व मिति ख० पु० पा० ।
(२) श्रुतिसमानप्रामाण्येति ख० पु० पा० ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पाधिकमपि किं चित्सत्यं, अर्थक्रियाप्रयोजकत्वलक्षण-
सत्यत्वस्य मिथ्यात्वाविरोधिनः श्रुत्यर्थत्वायोगात् ।
अनुपहिताभिन्ने तस्मिन्नबाध्यतद्भेदासम्भवात् भेदज्ञा-
नादनवद्यपुमर्थाभावेन तस्य तत्परश्रुतिजन्यत्वायोगाच्च
प्रत्युतो 'दरमन्तरं कुरुतेऽथ तस्य भयं भवति' 'मृत्यो
समृत्युमाप्नोति य इह नानेव पश्यतीति' भेदज्ञानस्या

रौपाधिकस्य नियमेन मिथ्यात्वस्य सर्वजनीनत्वात्क चिदपि त
सत्यता न घटत इत्यर्थः । नन्वात्मभेदस्य लौकिकवैदिकव्यवहा
तव्यवहारप्रयोजकतयाऽर्थक्रियाहेतुत्वात्तल्लक्षणत्वाच्च सत्यस्य क
मिथ्यात्वमित्याशङ्क्याह * अर्थक्रियेति * न तावदर्थक्रियाकारित्वं
व सत्त्वं चरमकार्यस्य तदभावेनासत्वापत्त्या पूर्वपूर्वस्याप्यसत्वे
सर्वशून्यत्वापातादर्थक्रियातोऽप्यवच्छिन्नार्थक्रियाऽभावेन तस्या
प्यसत्वापातात्, नाप्यर्थक्रियायोग्यत्वं सत्त्वं परमते नित्यपरिम
तस्याऽप्यभावेनासत्वापातात् । नापि तत्सत्वव्याप्तं स्वप्नादा
व मायिकत्वेपि मायामयार्थक्रियाहेतुत्वोपपत्तौ व्याप्यभावात् स्व
प्नादिवैधर्म्ये च जाग्रद्दशायां मायिकत्वेऽप्यविद्यातिरिक्तदोषा
न्यतया सति प्रमातर्यबाध्यत्वादेवोपपद्यते ततश्च नैतावता सत्
बाध्यत्वरूपसत्वसिद्धिरिति भावः । किं चोपहितोऽनुपहितादीश्व
रादत्यन्तभिन्नः भिन्नाभिन्नो वा, आद्ये भेदस्यौपाधिकत्वकल्पना
यर्थ्यं, द्वितीयस्त्वसम्भवादयुक्त इति तस्य ततोऽत्यन्ताभेद एव वा
इति कथं तद्भेदस्य वास्तवत्वमित्याह * अनुपहितेति * अप्रयो
नादित्येतद्विवृणोति * भेदज्ञानादिति * अध्ययनविध्युपात्तवेदान्त
नां फलपर्यवसायित्वमावश्यकं ततश्च स्वर्गादेः क्षयादिदोषग्रस्तत
मुमुक्ष्वभिलषितत्वायोगात् प्रत्यक्षादिजन्यभेदज्ञानादपि तदुपपत्ते
नौपनिषदाभेदज्ञानस्य तत्प्रयोजनं, मोक्षस्य तु 'तमेव विदित्वाऽति
मृत्युमेती' त्यात्ममात्रज्ञानाधीनत्वश्रवणात्सोऽपि न तत्फलमित्यि
प्रेत्य भेदज्ञानादनवद्यत्युक्तम् । न केवलं भेदज्ञानादर्थाभावः अनर्थ
ततः श्रूयते ततोपि श्रुतिर्न तत्परेत्याह * प्रत्युतेति * एतस्मिन्न

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नर्थहेतुत्वं श्रूयते ' अथ येऽन्यथाऽतोविदुरन्यराजानस्ते-ऽक्षय्यलोका भवन्ति ' 'अथ योन्यां देवतामुपास्ते अन्यो ऽसावन्यो ऽहमस्मीति न स वेद यथा पशु'रित्यादिना भेद-स्य निन्दितत्वाच्च न तत्र श्रुतितात्पर्य्यम् । ' नान्योऽतोस्ति द्रष्टा नान्योऽतोस्ति श्रोता नात्र का चन भिदाऽस्ती-त्यादिना' वाक्येनानधिगताबाधितप्रयोजनवद्भेदाभावस्य

त्मनि उत अपि अरं अल्पं अन्तरं ईषदपि भेदं यः कुरुते भेदाभेदम-पि जानाति तस्य जन्मादि भयं भवति इह आत्मनि नानेव मिथ्या-भूतं नाना वस्तु सत्यत्वेन यः पश्यति स मृत्योर्मरणानन्तरं पुनः पुनः जन्ममरणं प्राप्नोतीत्यर्थः । भेददर्शिनिन्दया भेदस्य श्रुत्या निन्दित-त्वादपि न तस्यास्तत्र तात्पर्य्यमित्याह * अथ इति * ' आत्मैवेदं सर्वं ' मित्यद्वैतात्मानमुपसंहृत्य ' सवा एष एवं पश्य ' न्नित्यादिना तज्ज्ञानान्निरतिशयानन्दावाप्तिरूपममृतत्वमुक्त्वा 'अथ येऽन्यथाऽतो विदु' रित्यादिना भेददर्शिनो निन्दति अत उक्तरूपाद्वैतादन्यथा भेदे-न भूमानं ये विदुस्तेऽन्यराजानः अन्यो राजा स्वामी येषां तेऽन्य-राजानोऽस्वतन्त्राइति यावत् ते भिन्नदेवतोपासनादिना क्षयिष्णुलो-का भवन्ति इत्यर्थः। 'तमेवैकं जानथ आत्मानमन्या वाचो विमुञ्चथे' त्यनात्मज्ञाननिषेधश्चशब्दार्थः । एवं मानान्तरप्रसिद्धत्वादित्यादि-हेतूनामसिद्धिं युक्तितो निरस्य श्रुतार्थापत्त्यापि तां निराकुर्वन् श्रु-त्यन्तरविरोधादित्येतद्विवृणोति * नान्योऽतोऽस्तीति * अतोऽन्तर्य्या-मिणो ऽन्यो द्रष्टा नास्तीत्यादिनिषेधानां पारमार्थिकद्रष्टृस्वरूपवि-षयत्वायोगात्तद्विशेषणान्यत्वनिषेधपरत्वं तद्वाक्यानां गम्यते तस्या-ज्ञातत्वे सत्यत्वे वा प्रयोजनवत्वे वा निषेधायोगादर्थात्तस्य ज्ञातत्व-मिथ्यात्वाप्रयोजनत्वानि सिद्धानीति तदुपोद्बलितनिषेधश्रुतिविरो-धाद्भेदश्रुतिरन्यपरतया नेतव्या इति भावः । ननु ' नान्योतो-स्ति द्रष्टेति ' श्रुतिर्द्रष्टृपदेनेश्वरं परामृश्य तस्यैवान्तर्य्यामि-णःसकाशाद्भेदं प्रतिषेधतीति न तस्या जीवेशभेदश्रुतिविरोधितेत्या-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रतिपादितत्वाच्च न भेदः सत्यो न वा श्रुत्यर्थः। न चेदं वाक्यमीश्वरस्यैव भेदं प्रतिषेधतीति वाच्यम्। द्रष्टृसामान्यभेदस्यैव प्रतिषिद्धत्वात् श्रोत्रादिभेदनिषेधस्य प्रसिद्धजीवं विहायान्यत्रासम्भवाच्च, भेदं प्रतिषिध्यै'ष त आत्मान्तर्याम्यमृत' इत्यभेदप्रतिपादनाच्च, ईश्वरनानात्वस्याप्रसक्तत्वाच्च न निषेधः। किं च ' द्वा सुपर्णेति' न जीवेश्वरभेदपरम्। तथा हि तद्धि 'तयोरन्यः पिप्पलं स्वाद्वत्ती' त्यहङ्कारतादात्म्यविशि(१)ष्टजीवमनूद्य 'नश्नन्नन्यो अ-

शङ्क्य द्रष्टृपदेन चेतनसामान्यवाचिना जीवस्याप्युपात्तत्वेनावधारणायोगाच्चेतनमात्रभेदनिषेधपरेयमिति तावदाह * न चेदमिति * वस्तुतस्तु ' नान्योतोस्ति श्रोता नान्योतोस्ति मन्तेत्यादिना श्रोत्रादिजन्यज्ञानवत एव ततो भेदप्रतिषेधादीश्वरस्य शरीरेन्द्रियादिरा तस्य तद्वत्तायोगाज्जीवस्यैवान्तर्य्यामिणः ईश्वराद्भेदनिषेधपरोऽसन्दर्भ इत्याह * श्रोत्रादीति * अपि चानन्तरवाक्ये प्रष्टुरुद्दालकस्य जीवस्यान्तर्य्याम्यात्मा स्वरूपमिति जीवेश्वराभेदमभिधातोऽन्यदार्त्तमित्यन्तर्याम्यतिरिक्तस्य नश्वरत्वाभिधानाज्जीवेशभेद प तत्र निषेध्य इत्याह * भेदं प्रतिषिद्ध्येति * किं चात्मैकत्वाभववादिमते ऽपि धर्मिग्राहकमानेनेश्वरस्यान्तर्य्यामिरूपेणैव सिद्धत्व सद्भेदस्याप्रसक्तस्य निषेधोऽनुपपन्न इत्याह * ईश्वरनानात्वस्येति एवं पूर्वोक्तहेतुभ्यः सर्वासां भेदश्रुतीनां सामान्यतस्तत्परत्वं निरप्रत्येकमपि तन्निराकरोति * किं च द्वासुपर्णेति * वाक्यमिशेषः। अस्यान्यपरतां दर्शयन् भेदे तात्पर्याभावमुपपादयति * तथहीत्यादिना * अहङ्कारेण तादात्म्यं यस्य स चासौ जीवश्चेति तथोक्तः। अयं हि मन्त्रो जीवस्य पराभिन्नस्यैव बुद्धिविशिष्टरूपेण

(१) विशिष्टेति ख० पु० नास्ति।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भि चाकशीतीति' तमेव ततो निष्कृष्याभोक्तृतया दर्शयति विशिष्टानुवादश्च निष्कृष्टाहङ्कारस्य तस्याप्यभोक्तृत्वं प्रतिपादयितुमेव, तथासत्यनुभवविरोधः परिहृतः स्यादन्यथा 'कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञात' मित्युपक्रमस्य 'अन्या वाचो विमुञ्चथेति' भेदवाङ्निषेधस्य 'ब्रह्मैवेदमिति' पूर्ववाक्यस्य 'ब्रह्म वेद ब्रह्मै-

लिपतभेदस्य भोक्तृत्वमनूद्य तस्यैव तदविशिष्टरूपेणान्यस्य सतस्तदभावं प्रतिपादयति इतरथा'ऽनीशया शोचति मुह्यमानः' 'निरञ्जनः परमं साम्यमुपैती' त्यादिवाक्यशेषविरोधापातात् । न च साम्यमुपैतीति मुक्तौ भेदस्य सूचितत्वात्तस्य सत्यत्वमिति वाच्यम् । परमसाम्यस्याभेद एव पर्यवसानादन्यथा 'न तत्समश्चाभ्यधिकश्च दृश्यते' 'न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्य' इत्यादिवचनविरोधात् । अपि चायं मन्त्रः पैङ्गिरहस्यब्राह्मणेन 'तयोरन्यः पिप्पलं स्वाद्वत्तीति सत्त्वं अनश्नन्नन्योऽभि चाकशीतीत्यनश्नन्नन्योऽभि पश्यति ज्ञस्तावेतौ सत्वक्षेत्रज्ञौ तदेतत्सत्वं येन स्वप्नं पश्यति अथ योऽयं शारीर उपद्रष्टा स क्षेत्रज्ञ' इत्यादिना चित्स्वभावो जीवो जडस्वभावबुद्धितादात्म्यापन्नः सत्वशब्दवाच्य स्तदुपाधिकभेदेन शुद्धचिदात्मनो भिन्नो भोक्तृत्वादिविकारमनुभवति केवलजडस्य भोक्तृत्वायोगात् केवलस्तु तद्रहितः शुद्धबोधात्मनाऽभितः प्रकाशत इति बुद्धिकृतभेदाद्यनुवादेन शुद्धजीवस्वरूपपरतया व्याख्यात इति नास्य जीवेशभेदपरतेति भावः । शुद्धजीवस्वरूपे प्रतिपादयिषिते तयोरन्य इति विशिष्टे भोक्तृत्वानुवादः किमर्थ इति वीक्षायामाह * विशिष्टानुवादश्चेति * अनुभूयमानभोक्तृत्वस्य शबलात्मधर्मत्वेऽवगते केवले तन्निषेधः शक्यो वक्तुमनश्नन्न्य इति, इतरथाऽनन्यथासिद्धानुभवविरोधेन तन्निषेधायोगात् तदर्थमेव तदनुवाद इत्यर्थः । आथर्वणागतस्यास्य मन्त्रस्य जीवेशभेदपरत्वे-तद्गतोपक्रमादिविरोधश्च स्यादित्याह *अन्यथेति * कस्मिन् हि भग-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

व भवति ' इत्युपसंहारस्य च बाधः स्यात्, 'तयोरन्यः पिप्पलं स्वाद्वत्तीति सत्वं अनश्नन्नन्योऽभि चाकशीतीत्यनश्नन्नन्यो अभि पश्यति ज्ञ ' इत्यादिवाक्यविरोधश्च स्यात्। नापि 'सो ऽश्नुते सर्वान्कामान्त्सहेति' मुक्तौ भेदश्रवणात्तस्य तात्विकत्वम्। ब्रह्मरूपेण युगपत्सर्वानन्दानुभवस्यैव तदर्थत्वान्मुक्तौ तदितरभोगस्यासम्भवात

व इति' वाक्यमात्मैव सर्वस्य स्वरूपमित्येतत्परं अन्यथा तज्ज्ञानात्स
र्वतत्वज्ञानोपन्यासायोगात्ततश्चेदं भेदविरोध्येव अन्येषां तद्विरोधित
स्पष्टमेव *भेदवाङ्निषेधस्येति* तमेवैकं जानथ आत्मानमित्यद्वित
यात्मन एव ज्ञातव्यत्वाभिधानात् ततोऽन्या भेदविषया वाचो हे
इति प्रतीतेः भेदे विवक्षिते तद्विरोधः स्यादित्यर्थः । पूर्ववाक्यस
द्वा सुपर्णेत्यस्मात्पूर्ववाक्यस्येत्यर्थः। श्रुत्यन्तरगतस्याप्यस्य भेदप
त्वे पूर्वोक्तपैङ्गिब्राह्मणविरोधो दुष्परिहर इत्याह * तयोरन्य
त्यादिना * एवं ऋतं पिबन्ता ' वित्यत्रापि पिबदपिबतोरौपाधि
एव भेदो ऽनूद्यत 'आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिण ' इ
तत्रैवोपाधिशबलस्य ' भोक्तृत्वाभिधानानात् ' एकस्तथा सर्वभूत
न्तरात्मा रूपं रूपं प्रतिरूपो बभूवेति ' प्रतिबिम्बादिभावेन
दस्याप्यौपाधिकत्वाभिधानादिति द्रष्टव्यम । ननु तैत्तिरीयकश्रु
विदुषो मुक्तौ ब्रह्मणा सहभावश्रवणात्तस्य भेदं विनाऽनुपप
त्तस्य च सत्यत्वं विना मुक्तिकालीनत्वानुपपत्तेः सत्य
भेदसिद्धिरिति नेत्याह * नापि सोऽश्नुत इति * अत्र स विद्व
न् ब्रह्मणा सह सर्वान्विषयानाप्नोतीत्यर्थो न सम्भवति ' ब्र
वेद ब्रह्मैव भवति ' ' यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं
श्ये ' दित्यादिबहुश्रुतिविरोधात्, सहयोगे ब्रह्मणेति तृती
यास्वीकारे ' सहयुक्तेऽप्रधाने ' इति पाणिनीयवचनाद्भोगे तत्स
हित्यस्वीकारप्रसङ्गाच्च ब्रह्मणो भोगाप्राधान्ययोरापत्तेश्च तस्माद्
ब्रह्मणेति तृतीयेत्थम्भावे ततश्च तदावरकाविद्यानिवृत्तौ तद्भावं गत

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अन्यथा 'सह युक्ते ऽप्रधान' इति ब्रह्मणो गुणत्व-भोगयोः प्रसङ्गात् तदुक्तं स्कान्दे 'सोऽश्नुते सकलान्कामानक्रमेण सुरर्षभाः। विदितब्रह्मरूपेण जीवन्मुक्तो न संशय' इति। नापि जीवब्रह्मणोर्द्रष्टृद्रष्टव्यभावादिश्रुतिर्भेदविषया तस्याः कल्पितभेदेनैवोपपत्तेः तत्तात्पर्य्यगोचरब्रह्मणः सत्यत्वेन तत्प्रामाण्योपपत्तेः। नचाभेदश्रुतिरेव कल्पिताभेदविषयेति वाच्यम्। अनुभूयमानभेदवि-

विद्वांस्तदन्तर्भूतान् सर्वान्कामान् मानुषानन्दादारभ्योत्तरोत्तरशतगुणितान् ब्रह्मानन्दावसानान्सह युगपदनुभवतीत्येवैतदर्थो ग्राह्य इत्याह * ब्रह्मरूपेणेत्यादिना * किं चोक्तार्थपरतया श्रुतिरियं ब्रह्मगीतायां ब्रह्मणा देवान्प्रति व्याख्याता ततो नात्र विवदितव्यमित्याह * तदुक्तमिति * नन्वात्मा द्रष्टव्यः' 'य आत्मानमन्तरो यमयती' त्यादिश्रुतिभिर्जीवपरयोर्दर्शनादौ कर्तृकर्मभावस्य, नियमनादौ तु कर्मकर्तृभावस्य चाभिधानात्तस्य च तात्त्विकभेदं विनाऽनुपपत्तेस्तत्सिद्धिरित्याशङ्क्य न तत्पराभेदश्रुतिविरोधाद्भेदस्य वास्तवत्वानुपपत्तेरतत्परश्रुतिप्रतीतकर्मकर्तृत्वादिभावस्य च व्यावहारिकभेदेनैवोपपत्तेरित्याह * नापि जीवेति * कर्तृकर्मभावादिपरत्वाभावेऽन्यस्याप्यर्थस्याभावाच्छ्रुतेरप्रामाण्यापात इत्याशङ्क्य ब्रह्मप्रतिपादकवाक्यैकवाक्यतया तत्परत्वात् प्रामाण्योपपत्तिरित्याह * तत्तात्पर्य्येति * नन्वभेदश्रुतिविरोधाद्भेदश्रुतिः कल्पितविषयेति कथं वैपरीत्यमेव किं न स्यादिति नेत्याह * न चाभेदेति * कल्पितत्वं ह्यभेदस्यानिर्वचनीयत्वं तच्च तस्य प्रातिभासिकत्वेन व्यावहारिकत्वेन वा स्यात्तत्र नोभयमपि घटते भेदप्रतिभासविरोधेनाभेदप्रतिभासासम्भवात् तदधीनव्यवहाराभावाच्चेत्याह * अनुभूयमानेति * श्रुत्यनभिज्ञानामभेदप्रतिभासाभावेपि तदभिज्ञानां तत्प्रतिभासात्तत्प्रा-

(१) तत्रतत्रभां भयमपीति खपु० पा०।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रोधेन प्रातीतिकस्य व्यावहारिकस्यवाऽभेदस्यासम्भवात्
श्रुतिपरिचयहीनानामभेदज्ञानाभावेन तदेकवेद्यस्य मि
थ्यात्वे तदप्रामाण्यप्रसङ्गात्। श्रुतेस्तत्र न तात्पर्य्यमिति चे
न अज्ञाते पुमर्थसाधने तस्मिन्तात्पर्य्यस्यावश्यकत्वात्
न चान्यपराऽभेदश्रुतिरुपासनापरा वा ऽस्त्विति वाच्यम्
श्रुतपरित्यागाश्रुतकल्पनाप्रङ्गात् एकविज्ञानात्सर्वविज्ञा
वाचारम्भणमृदादिदृष्टान्तपरमात्मप्रवेशादिभिरभेदोपपा
नवैयर्थ्यात् अभेदोपक्रमादिभिस्तत्प्रतिपादनं च न स्या
तस्मान्निरवकाशत्वात्तत्परत्वाच्चाद्वैतश्रुतिर्बलवती। अत

तिभासिकत्वमित्याशङ्क्य किं श्रुतिस्तत्परा उत नेति विकल्प्याद्ये
त्यवन्दनादिवाक्यवत्तदप्रामाण्यापात इत्याह * श्रुतिपरिचयेति
ज्ञानाभावेनेत्येतदनन्तरं श्रुतिपरिचयवतामपीति शेषः । द्वितीयं
ङ्कते * श्रुतेरिति * अभेदे तात्पर्य्यलिङ्गस्यापूर्वत्वादेः सत्वाच्च
भावो न युक्त इत्याह * न अज्ञातेति * भेदश्रुतिविरोधादभेद
निर्जीवे ब्रह्मसादृश्यपरा तदुपास्तिपरा वाऽस्त्वित्याशङ्क्य तस्या व
वहारिकभेदानुवादित्वेनाविरोधस्यांक्तत्वादिच्छामात्रेणाभेदश्रुतेर
परत्वकल्पनायां श्रुतहान्यादिदोषापात इत्यभिप्रेत्याह * न चा
परत्वादिना * न केवलमभेदश्रुतेरन्यपरत्वे श्रुतहान्याद्यापत्तिः
तु तत्रार्थवादोपपत्तिश्रुतीनामुपक्रमोपसंहारपरामर्शफलश्रुतीनां
वैय्यर्थ्यापात इत्याह *एकविज्ञानादित्यादिना* 'येनाश्रुतं श्रुतं
ति' 'वाचारम्भणं विकारो नामधेयं' 'अनेन जीवेनात्मनाऽनु
विश्य' त्यादिभिरभेदोपपादनादित्यर्थः । प्रवेशादिभिरित्यादिप
प्रविष्टस्य दर्शनश्रवणादिव्यवहारो गृह्यते । अभेदश्रुतेः कल्पिता
दविषयत्वान्यपरत्वनिरसनफलमाह * तस्मादिति * सत्यमे
विनोक्तरीत्यार्थान्तरासम्भवान्निरवकाशत्वं ततश्च भेदश्रुतेर्दुर्बला
त्तद्विरोधान्न भेदे प्रामाण्यमितिभावः। एवं भेदसत्यत्वे श्रुतिप्रामा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वार्थापत्तिरपि न भेदे प्रमाणं सत्यभेदं विनाऽनुपपन्नार्थाभावात् भेदे जीवादीश्वरस्यानात्मत्वापत्तिश्च अहमनुभवेऽप्रकाशमानस्य घटादिवदनात्मत्त्वात् । परमतेऽप्यात्मत्वस्य

निरस्यार्थापत्तिमपि निराकरोति * अत एवेति * एतद्विवृणोति * सत्यभेदमिति * 'यत्र वा अन्यदिव स्यात्तत्रान्योऽन्यत्पश्येत्' दित्यादिश्रुतिपर्य्यालोचनया सत्यपि वास्तवाभेदेऽनिर्वचनीयव्यावहारिकभेदादेव तादृशाखिललौकिकवैदिकव्यवहारोपपत्तेराश्रयणीयत्वादर्थापत्तेरनुत्थानाद्भेदसत्यत्वे न तत्प्रमाणमित्यर्थः । एवं वास्तवभेदाभावेऽनुपपत्त्यभावमुक्त्वा जीवात्परमात्मानः स्वतो भेदे तस्यात्मत्वानुपपत्तिरिति बाधकमाह * भेदे जीवादिति * जीवाद्भेदे सतीत्यर्थः । किं भेदिमते लोकप्रसिद्ध्यनुरोधेनाहमनुभवालम्बनयोग्यत्वमात्मत्वमुत ज्ञानाश्रयत्वं जातिविशेषो वा आद्ये मनोजन्यानुभवे कदापीश्वरस्याप्रकाशमानस्य तदालम्बनत्वयोग्यत्वाभावादनात्मत्वापात इत्याह * अहमनुभव इति * अप्रकाशमानस्येति छेदः । नचेश्वरस्य स्वकीयाहमनुभवे प्रकाशमानत्वसम्भवात्तदभावोऽसिद्ध इति वाच्यं । तस्य दुःखादिधर्म्यहङ्कारगोचरतया क्लृप्तस्य तद्रहिते परमेश्वरेऽसम्भवात् तत्र तत्रेश्वरप्रयुक्ताहंशब्दस्य निरहङ्कारस्वरूपमात्रपरतया वक्ष्यमाणत्वेन तादृशानुभवे प्रमाणाभावाच्चेति भावः । एतेन द्वितीयोऽपि कल्पो निरस्तो वेदितव्यः अहमनुभवागोचरस्य घटादिवत् ज्ञानाश्रयत्वायोगात् । किं च स्वप्रकाशज्ञानस्य तत्स्वरूपत्वेन तदाश्रयत्वाभावादवृत्तेश्च तस्मिन्नसम्भवाल्लाघवेन ज्ञानस्यैवात्मपदाभिलप्यत्वेन तत्र तद्व्यवहारोपपत्तेरन्यथा दुःखाद्याश्रयत्वमेवात्मत्वं किं न स्यादिति, तृतीयेऽपीश्वरस्यात्मत्वानुपपत्तिमाह * परमतेपीति * परैर्ह्यनुगतप्रत्ययालम्बनतया कार्य्यतावच्छेदकतया वा कारणतावच्छेदकतया वा जातिः स्वीक्रियते इति आत्मत्वे चाद्यद्वयासम्भवात्तृतीय एव वाच्यः तत्र चात्मत्वस्य दुःखादिसमवायिकारणमात्रवृत्तित्वे सा सम्भवति अवच्छेदकस्यावच्छेद्यानधिकवृत्तित्वनियमात्तस्य तदसमवायिनि तटस्थेश्वरे वृत्त्ययोगा-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सुखसमवायिकारणतावच्छेदकस्य तदनधिकरणे वृत्त्यभा
गात्।एवं जीवा अपि न भिद्यन्ते तथाहि ध्वंसाप्रतियोगिदे

त्। न च जीवत्वमेव दुःखादिसमवायितावच्छेदकं तस्य चेश्व
ऽनुपपत्तिरिष्टैव आत्मत्वं तु तत्रापि जीवसाधारणात्मपदप्रवृत्ति
मित्ततयोपेयमिति वाच्यम्। जीवत्वस्य दुःखादिमत्वरूपोपाधि
गौरवादसम्भवाच्च तदवच्छेदकत्वायोगात् जातिविशेषरूपस्य
स्यानुपदमेव जीवभेदनिरासेन निरसिष्यमाणत्वात् अपरिच्छि
चिद्रूपत्वस्यैवोभयत्रात्मपदप्रवृत्तिनिमित्तत्वाच्च न जीवेशानुगता
त्वजातिसिद्धिरिति भावः। जीवेशभेदे प्राग्योग्यानुपलम्भनिरा
देव षष्ठप्रमाणमपि न तस्य सत्वसाधकमिति सिद्धम्। एवं प्र
णाभावाज्जीवेशभेदे तात्विकत्वाभावमुपपाद्य जीवानां कथमेकेन
क्षणाऽभेद इत्याशङ्क्य तद्भेदस्याप्यवास्तवत्वं प्राक्प्रतिज्ञातमुपपाद
तुमुपक्रमते * एवं जीवा इति * परस्परमिति शेषः। जीवानां
स्परभेदाभावेऽनुभवविरोध इत्याशङ्क्याहमसौ नेत्याद्याकारेणाह
राद्युपाधिकानिर्वचनीयो भेदोऽनुभवगोचरो, निरुपाधिकवास्तव
भेदो निरस्यत इत्यभिप्रेत्य निरुपाधिकभेदाभावं तावदनुमानेन
धयति * ध्वंसाप्रतियोगीति * अत्र ध्वंसाप्रतियोगी यो देवदत्त
मनुभवविषयभूतो विशेष्यः स पक्षः तस्य भौतिकदेहाद्यतिरिक्तो
यज्ञदत्ताहमनुभवविशेष्यस्तत्प्रतियोगिको निरुपाधिको भेदो घट
प्रसिद्धः पक्षेपि परैः स्वीकृतस्तद्राहित्यं साध्यं, सिद्धान्ते देहादेर
हमनुभवविशेष्यत्वात्तत्र बाधवारणाय ध्वंसाप्रतियोगीति पक्षवि
षणम्। यज्ञदत्ताहमनुभवविशेष्ये तदीयात्मनि सिद्धसाधनताव
णाय पक्षे देवदत्तपदं प्रयुक्तम्। घटे घटत्वमित्यादिपरोपेतदेवदत्ता
भवविशेष्ये घटत्वादौ बाधवारणायाहमनुभवेत्युक्तम्। तद्विषयमा
स्य पक्षत्वेऽहन्त्वस्यापि तद्विषयत्वेन तत्र बाधः स्यात्तन्निवारणाया
मनुभवविशेष्य इत्युक्तम्। देवदत्तात्मनि यज्ञदत्ताहमनुभवविशेष्य
दीयदेहेन्द्रियादिप्रतियोगिकनिरुपाधिकभेदस्वीकारात्तद्राहित्यसा
बाधः स्यात्तद्वारणाय साध्ये भौतिकातिरिक्तेत्युक्तम्। देवदत्ता
मनुभवविशेष्ये तदीयात्मप्रतियोगिकनिरुपाधिकभेदस्य परमते

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वदत्ताहमनुभविशेष्यो न भौतिकातिरिक्तयज्ञदत्ताहमनुभ-
वविशेष्यप्रतियोगिकानौपाधिकभेदवान् कार्य्यकारणा(१)

तत्राभावात्सिद्धसाधनतावारणाय यज्ञदत्तेति विशेषणम् । यज्ञदत्तानु-
भवविशेष्यघटत्वादिप्रतियोगिकनिरुपाधिकभेदस्य पक्षे सत्वात्तद-
भावसाधने बाधः स्यात्तद्वारणाय साध्येऽप्यहमनुभवेत्युक्तम् ।(२)आ-
त्मत्वस्यापि तद्विषयत्वात्तत्प्रतियोगिकभेदाभावसाधने बाधः स्यात्त-
द्वारणायाहमनुभवविशेष्येत्युक्तम् । तद्विशेष्ययज्ञदत्तात्मप्रतियोगि-
कसोपाधिकभेदस्य पक्षे स्वीकारात्तन्निषेधे बाधः तद्वारणायानौपा-
धिकेत्युक्तम् । तत्र हेतुद्वयमाह * कार्य्यकारणेति * स्थूलसूक्ष्म-
शरीरे कार्य्यकारणपदार्थः । सिद्धान्ते शरीरेन्द्रियादिषु व्यभिचारवा-
रणाय तद्व्यतिरिक्तत्वविशेषणम् । घटादावात्मत्वे च तद्वारणायाह-
मनुभवविशेष्यत्वादित्युक्तम् । द्वितीयहेतौ पक्षदृष्टान्तयोरसिद्धिसाध-
नवैकल्यपरिहाराय स्ववृत्तीति विशेषणम् । नन्वेवमपि तयोः स्ववृ-
त्तिपरोक्षज्ञानविषयत्वादीश्वरज्ञानविषयत्वाच्च स दोषस्तदवस्थ एव । न
च स्ववृत्तिर्लौकिकप्रत्यक्षाविषयत्वादिति विवक्षितमिति वाच्यम् ।
तथा सति परमते नित्यातीन्द्रियेषु सिद्धान्ते वाहङ्कारे व्यभिचारा-
पत्तेरिति चेत् न । ज्ञानपदेन प्रकृताहमनुभवस्य विवक्षितत्वात् तथा
चाहमाकारानुभवविषयत्वे सति स्ववृत्त्यहमनुभवाविषयत्वादिति
हेतुर्विवक्षितः । तत्र धर्मादौ व्यभिचारवारणायाहमाकारानुभवावि-
षयत्वे सतीत्युक्तम् । तत्र यद्यप्यहंधर्मीत्याकारानुभवोऽस्ति तथाप्य-
हमाकारांशविषयत्वाभावान्न व्यभिचारः । ज्ञानं च विषयभेदप्रयु-
क्तांशभेदः परैरभ्युपेयते तावन्मात्रस्य भेदादौ व्यभिचारवारणाय
स्ववृत्त्यहमनुभवाविषयत्वादित्युक्तम् । तत्रानुभवाविषयत्वस्याहमनु-
भवाविषयत्वस्य च पक्षदृष्टान्तयोरप्रसिद्धिवारणेन व्याप्तिग्रहोपयो-
गाय स्ववृत्तीत्युक्तम् । न च सिद्धान्तेऽहङ्कारेण व्यभिचारः तन्मते त-
स्याहमाकारवृत्तिविषयत्ववत् स्ववृत्त्यहमाकारसाक्षिरूपानुभवावि-
षयत्वस्वीकारेण तत्र हेत्वभावादित्यादि द्रष्टव्यम् । नन्वङ्कराद्यक-

(१) देहादा विति खपुपा० ।
(२) व्यतिरिक्तेति खपु० पा० ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तिरिक्तत्वे सत्यहमनुभवविशेष्यत्वात्स्वावृत्तिज्ञानाविषयत्वाद्वा यज्ञदत्त (१) वत्, व्याप्तिग्रहोपयुक्तत्वाच्च स्वावृत्तीति न व्यर्थम् । सर्वेषामप्यास्तिकानां सङ्घातद्वयातिरिक्त आत्मा सिद्ध इति न पक्षहेत्वसिद्धिः वृत्तिरप्यात्माध्यस्तैवात्मविषयेति न सिद्धान्ते द्वितीयहेत्वसिद्धिरपि । न च यज्ञदत्तसुखाद्यभावानधिकरणत्वं तदी-

तैकं शरीराजन्यत्वादित्यत्र शरीरपदवदत्रापि स्वावृत्तिपदमभिद्रि मात्रवारकत्वाद्व्यर्थमिति नेत्याह * व्याप्तिग्रहेति * हेत्वप्रसिद्धि निवारणेन यद्विशेषणं व्याप्तिग्रहोपयोगि तद्धेतुविशेषणं परैरप्यु दीयते शरीरपदं तु नैवं यथा चक्षुस्तैजसं रूपादिपञ्चसु रूपस्यैव भिव्यञ्जकत्वादालोकवदित्यत्र रूपादिष्विति विशेषणं तथेदमपी न व्यर्थमित्यर्थः। ननु ध्वंसाप्रतियोगित्वं कार्यकारणातिरिक्तत्वं च त्मनः सुगतानां लोकायतानां चासम्मतं ततश्च पक्षहेत्वोरसिद्धिरि त्याशङ्क्य तद्व्यतिरिक्तपरीक्षकान् प्रत्येवायं प्रयोग इति नोक्तदो इत्याह * सर्वेषामिति * ननु सिद्धान्तेऽहमाकारवृत्तेरन्तःकरण रिणामत्वेन तदेकवृत्तित्वात्तद्विषयस्यात्मनः स्वावृत्त्यहमनुभववि यत्वात्तदविषयत्वरूपो हेतुरसिद्ध इत्याशङ्क्यान्तःकरणधर्माणां त वच्छिन्नात्मन्यध्यासात्तदवच्छिन्नात्मनोऽपि वृत्त्यधिष्ठानतया तद श्रयत्वस्वीकारात्तस्याऽपि स्ववृत्त्यहमनुभवगोचरत्वमेव । न च तर स्वावृत्तिस्वरूपानुभवगोचरत्वामिति वाच्यम् । स्वस्य स्वविषयत्व योगादित्यभिप्रेत्य न स्वमतेपि हेत्वसिद्धिरित्याह * वृत्तिरपीति तथापि यज्ञदत्तसुखाद्यभावानधिकरणत्वादिना सोपाधिकत्वाद्धे द्वयं व्याप्यत्वासिद्धमित्याशङ्क्योपाधिं निराकरोति * न च यज्ञद त्तेति * यस्मिन् यज्ञदत्तात्मनि स्वप्रतियोगिकभेदराहित्यं तत्र त्सुखाद्यभावानधिकरणत्वतत्सुखाद्यधिकरणत्वयोः सत्वात्साध्यव्या

(१) यज्ञदत्तअनुभवविशेष्यवत् इति गपु०पा० ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यसुखाद्यधिकरणत्वं वोपाधिः, सुप्तिकालीने तच्छरीरानवच्छिन्ने च तस्मिन्साध्याव्यापकत्वात् यदवच्छेदेन साध्यं तदवच्छेदेनोपाध्यनङ्गीकारे पक्षे साध्यसत्वेऽप्यविरोधात् । न च देवदत्तसुखाद्यनधिकरणत्वमुपाधिः घटादावपि सत्वात् सुखादेरव्याप्यवृत्तित्वभावतया पक्षे

पकत्वं साधनवति देवदत्तात्मन्यभावात्साधनाव्यापकतेति तयोस्तत्रोपाधितेति न च वाच्यं । तत्र हेतुमाह *सुषुप्तीति* यज्ञदत्तस्वापकालीने तदात्मन्युक्तसाध्यवत्यपि तदीयसुखप्रागभावाद्यधिकरण उक्तोपाध्योरभावात् साध्याव्यापकत्वं यज्ञदत्तसुखाभावानधिकरणत्वमित्यत्राभावपदेनात्यन्ताभावविवक्षायां यज्ञदत्तशरीरानवच्छिन्ने तदात्मनि तदीयसुखात्यन्ताभावसत्वात्तदनधिकरणत्वसुखाद्यधिकरणत्वयोरभावात्तत्र साध्याव्यापकत्वं दुर्वारमित्यर्थः । ननु साध्यवति यज्ञदत्तात्ममात्रे उक्तोपाध्योरभावेपि तच्छरीरावच्छिन्नात्मनि सत्वात्तयोः साध्यव्यापकत्वमित्याशङ्क्याह * यदवच्छेदेनेति * एकावच्छेदेन हि साध्योपाध्योः साहचर्य्यं वाच्यं इतरथा साध्यस्यावच्छेदभेदेनाप्युपाध्यभावेन साहचर्य्यस्वीकारे साध्यवति पक्षेऽवच्छेदभेदेनापि तदभावोपपत्तौ तत्रोपाध्यभावेन साध्याभावानुमानायोगादुपाधेर्दूषकता न स्यादित्यर्थः । तर्हि यज्ञदत्तात्ममात्रे साध्यव्यापकं देवदत्तसुखाद्यनधिकरणत्वं तत्रोपाधिरित्याशङ्क्याह * न च देवदत्तेति * किं साध्यसमव्याप्तिकोयमुपाधिः विषमव्याप्तिको वा, नाद्यः साध्याभाववत्यपि घटादावस्य सत्वेन समव्याप्तयभावादित्युक्त्वा द्वितीये आह *सुखादेरिति* देवदत्तसुखानधिकरणत्वं नाम किं तदधिकरणभिन्नत्वं तदभावाधिकरणत्वं वा, नाद्यः यज्ञदत्तात्मनि तदसम्प्रतिपत्तेः द्वितीये देवदत्तात्मा यज्ञदत्तात्मनो भिद्यते देवदत्तसुखाभावाभाववत्वात् व्यतिरेकेण यज्ञदत्तात्मवदिति प्रतिपक्षोन्नायकत्वं वक्तव्यं तत्रास्य हेतोरवच्छेदभेदेन स्वाभावसामानाधिकरण्यस्य देवदत्तसुखाभाववद्यज्ञदत्तात्माभेदेपि सम्भवादप्रयोजकत्वमिति न प्रतिपक्षतेत्यभिप्रेत्याह * सुखादेरिति * पर-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

साध्ये सत्यपि तदुपपत्तेश्च । न च ब्रह्मणि वि-
ष्णुमित्रादौ च व्यभिचारः पक्षसमत्वात् ब्रह्मणि प्रथम-
हेतोरभावाच्च अन्वयव्यतिरेकाभ्यामहमित्यनुभवस्याह-
ङ्कारविषयतया क्लृप्तस्यानहङ्कारे तस्मिन्नयोगात् । न च
ब्रह्मण्यहङ्कारे किञ्चित्प्रमाणमस्ति क्वचित्तस्मिंस्तच्छ-
ब्दप्रयोगस्य लाक्षणिकत्वात्, नापि बाधः प्रत्यक्षतोनौ-

मते ब्रह्मणो जीवान्तरस्य च यज्ञदत्तात्मभिन्नस्य स्वस्याहमनुभवगो
चरत्वात्तत्र हेतुद्वयस्य व्यभिचार इत्याशङ्क्याह * न च ब्रह्मणीति
तत्रापि साध्यस्य सन्दिग्धतया पक्षतुल्यत्वात्ततश्च पक्ष इव पक्ष
ल्येऽपि न व्यभिचार इत्यर्थः। एतेनास्य विरुद्धत्वमपि निरस्तं वि
क्षावृत्तित्वादेव पक्षविपक्षमात्रवृत्तित्वरूपविरुद्धत्वस्याप्यसम्भवा
किं च दुःखादिधर्म्यहङ्कारस्य स्वतोऽहमनुभवविषयत्वं तत्तादात्म्य
दात्मनस्तद्विषयत्वमिति तद्रहिते ब्रह्मणि तद्विषयत्वरूपहेतोरभाव
व्यभिचार इत्याह * ब्रह्मणीति * द्वितीयहेतोरपि यथाश्रुतस्य
वक्षितस्य च ब्रह्मण्यभावात्प्रथमेति प्रदर्शनार्थमिति द्रष्टव्यं। ननु
घवाच्चेतनमात्रस्याहमनुभवविषयत्वाद्ब्रह्मणि तदभावोऽसिद्ध इत्य
शङ्क्याह * अन्वयव्यतिरेकाभ्यामिति * जाग्रत्स्वप्नयोरहङ्कारे सत्य
हमित्याकारानुभवदर्शनात्सुषुप्तौ तल्लये तददर्शनादहङ्कारस्याह
नुभवविषयत्वमावश्यकं तस्य च परमप्रेमास्पदादिस्वभावप्रत्यगात्म
तयाऽनुभवादहङ्कारतादात्म्यापन्नप्रत्यगात्मनोपि तद्विषयत्वं तदृद्ध
कमित्यहङ्काररहितं ब्रह्मणि तद्विषयत्वं न सम्भवतीत्यर्थः। ब्रह्मण्य
हङ्कारत्वमसिद्धमित्याशङ्क्याह * न च ब्रह्मणीति * न तावज्जीवा
ब्रह्माहङ्कारे किंचित्प्रमाणमस्ति परकीयाहङ्कारस्य परं प्रत्यप्रत्य
त्वात् ब्रह्मण्यहङ्कारसाधकलिङ्गाद्यभावाच्च, प्रत्युत अनह
र्त्तयितव्येनैवच तस्य लिङ्गं अनामरूपं निरहं प्रपद्यते इत्या
वचनात्तदभावनिश्चयाद्ब्रह्मण्यहङ्कारो नास्तीत्यर्थः । नापि 'अ
मात्मा गुडाकेश' 'अहमादिश्च मध्यं चे' 'त्यादौ परमेश
रप्रयुक्ताहंशब्दानुमिततदीयप्रत्यक्षं तदहङ्कारे प्रमाणमिति युक्तं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पाधिकात्मभेदाप्रतीतेः । नापि तस्मिन्किं चिल्लिङ्गमस्ति, सुखाद्यनुसन्धानानुसन्धानव्यवस्थाया अनुपदमेव वक्ष्यमाणत्वात्।नापिश्रुतिबाधः अन्तःकरणाद्यविशिष्टात्मभेदस्य श्रुतौ क्वाप्यदर्शनाद्बन्धमुक्तव्यवस्था कर्मण्यधिकारानधिकारादिव्यवस्था चान्तःकरणादिविशिष्टभेदेनाप्युपपद्यत इति न बाधिका । ननुदेवदत्तात्मा यज्ञदत्तात्मप्रतियोगिकानौपाधिकभेदवान् तद्दुःखाननुसन्धातृत्वात् सम्मतवत् अन्यथा हेतूच्छित्तिः।न चौपाधिकभेदे(१)प्युपप-

क्तविधया तत्र मुख्यार्थासम्भवान्मायाशबलब्रह्मस्वरूपमेवाहङ्कारकारणं तेन लक्षणया बोद्ध्यत इत्याशयेनाह * क्वचिदिति * एवमुक्तहेत्वोरनैकान्तिकतां निरस्य कालातीततां निराकरोति *नापीति* किमत्र प्रत्यक्षं बाधकमनुमानं वाऽर्थापत्तिर्वाऽऽगमो वा तदनुपपत्तिरिति विकल्प्य क्रमेण निराकरोति * प्रत्यक्षत इत्यादिना न बाधिकेत्यन्तेन * देवदत्तो यज्ञदत्तो नेत्याद्याकारेण शरीराद्युपाधिकभेदस्यैव प्रतीतेर्न निरुपाधिकस्तद्भेदः प्रत्यक्षगोचर इत्यर्थः । * नापि लिङ्गमिति * निष्कृष्टाहङ्कारे निर्विशेषात्मनि लिङ्गस्यासम्भवात् सम्भावितस्याप्यनन्तरमेव प्रतिपक्षनिरासावसरे निरसिष्यमाणत्वाच्चेति भावः । अर्थापत्तिनिरासाय सुखादीत्याद्युक्तं तत्र प्रथममौपाधिकभेदेनैवेति प्रयोक्तव्यं अस्य सत्प्रतिपक्षतां निराकर्तुं प्रथमं प्रतिपक्षानुमानं शङ्कते * नन्विति * तस्य यज्ञदत्तस्य यद्दुःखं तत्स्मरणशून्यत्वादिति हेत्वर्थः।न च यज्ञदत्तदुःखविषयपरोक्षज्ञानतो देवदत्तस्य तत्स्मरणसम्भवादसिद्धोहेतुरिति वाच्यम्। तद्दुःखविषयपरोक्षज्ञानशून्यस्यैव पक्षत्वेनोक्तदोषाभावादिति भावः। ननु तस्य तदनुभवाभावादेवास्मरणं न भेदादित्यप्रयोजकत्वमित्याश-

(१) भेदादपीति ख० पु० पा० ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्तेरप्रयोजकता, उपाधिभेदातिरिक्तौपाधिकभेदस्याननु
वात् असम्भवाच्चेति चेन्नौपाधिकभेदाभावे कस्य तर्ह्यनुस

ङ्ग्याभेदे तदनुभवस्याप्यावश्यकतया तत्स्मरणापत्तिरिति बाधक
ह * अन्यथेति * स्वतोऽभेदेऽप्यन्तःकरणाद्युपाधिकभेदादन्य
सतोऽन्यदुःखाननुभवितृत्वोपपत्तेरप्रयोजकता तदवस्थेत्याशङ्क्याह
न चौपाधिकेति * किमुपाधिगतभेद एवान्यत्रात्मनि प्रतीतेरौ
धिक इत्युच्यते तदतिरिक्तभेदो वा ,आद्ये तव देवदत्तयज्ञदत्तात्म
दाभावादनुसन्धानादिव्यवस्थाऽनुपपन्नेत्यभिप्रेत्य द्वितीय आह *
पाधिभेदेति * घटाकाशादौ जलचन्द्रादौ चौपाधिकभेदानुभव
'सविशेषणे हि विधिनिषेधाविति' न्यायेनोपाधिभेदविषयतया
थासिद्धेस्तदतिरिक्ताकाशादिभेदे मानाभावादात्मन्यपि तदभावः
द्ध इति न तदधीनानुसन्धानादिव्यवस्थेत्यर्थः । किं च किं भेद
पाधिकत्वमुपाधिजन्यत्वं तज्ज्ञाप्यत्वं तदधीनसम्बन्धवत्वं वा, न
भेदस्यानादित्वात्तदानीमपि स एवायमिति प्रत्यभिज्ञाप्रमिता
सति तद्भेदासम्भवाच्च, द्वितीये भेदज्ञानस्य प्रमात्वे तद्विषयसत्य
दस्यात्मन्यावश्यकत्वान्मदिष्टसिद्धिः, तवाप्याकाशादौ तत्प्रसङ्
तस्य भ्रमत्वे च भ्रमविषयभेदस्याऽऽत्मन्यभावात्तदधीनव्यवस्थाया
सम्भवादन्यथा तस्य भ्रान्तित्वायोगात्, न तृतीयः भेदे स्वरूपा
क्तसम्बन्धासम्भवात्तस्य चानादित्वेनोपाद्ध्यधीनत्वायोगात् त
दौपाधिको भेदो न सम्भवतीत्याशयेनाह * असम्भवाच्चेति *
मनुसन्धानादिव्यवस्थानुपपत्त्या पूर्ववादिना प्रतिपक्षहेतोरप्रयोज
त्वे निरस्ते सिद्धान्ती तावदनुसन्धानादेरात्मधर्मत्वमुपेत्य सोप
कभेदेनाप्युक्तव्यवस्थोपपत्तेरप्रयोजकत्वं तदवस्थमिति प्रतिपक्षानु
दूषयति * नेति * औपाधिकभेद एवासम्भवत्युक्तमित्याशङ्क्
त्विकस्य तस्यासम्भवेऽप्यनिरूपितरूपः सोऽभ्युपेयः अन्यथा त
यव्यवस्थाया एवासम्भवात्तदनुपपत्तेर्दूरापेतत्वादित्याह * औ
धिकेति * अनुसन्धातृत्वतदभावयोर्व्यवस्था नाम परस्परभिन्नाधि
रणकत्वं तत्त्वात्मैकपक्षवादिनो ऽसम्प्रतिपन्नमिति देहाद्यतिरिक्तात्म
त्वस्य सर्वदुःखानुसन्धानापादनमिष्टमित्यर्थः । देवदत्तादिशरी

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

न्धानमापाद्यते सिद्धान्ते देवदत्तयज्ञदत्तात्माभेदेन यज्ञदत्तानुभवस्यैव तदीयत्वात्, न च देहस्यानुसन्धातृत्वमस्ति।देवदत्तात्मशरीरेणापि तज्ज्ञानात्प्रवर्तेतेति चेन्न। तच्छरीरप्रवृत्तौ हि तदवच्छिन्नात्मप्रदेशसमवायि ज्ञानं कारणं मृतशरीरे प्रवृत्यदर्शनात्।न च यज्ञदत्तशरीरावच्छिन्नं ज्ञानं देवदत्तशरीरावच्छिन्नात्मप्रदेशवृत्ति, न वा परमते ज्ञानं व्याप्यवृत्ति। न च मृतशरीरे मनःसंयोगविरहान्न प्रयत्नादिकमिति वाच्यम्। प्रेतशरीरावच्छिन्ने तस्मिंस्तस्य

देन व्यवस्था किं न स्यादित्याशङ्क्याचेतनस्य तस्य स्मर्तृत्वाद्यभावात्तदुपाधिकात्मभेदाभावे शिरःपादादिवत्तस्य तद्व्यवस्थायामप्रयोजकतेत्याह * न च देहस्येति * ऐकात्म्यमतेऽपि प्रवृत्तिसाङ्कर्य्याभावसिद्धये तद्धेतुप्रयत्नादेरप्यसाङ्कर्य्यरूपा व्यवस्थाऽऽस्थेया ततश्च तदधिकरणात्मभेदसिद्धिरितरथा यज्ञदत्तशरीरोत्पन्नज्ञानादिना देवदत्तशरीरेऽपि प्रवृत्तिः स्यादिति शङ्कते * देवदत्तेति * प्रवर्त्तेतेति * यज्ञदत्तज्ञानगोचर इति शेषः। किं परमते ज्ञानादिकमव्याप्यवृत्ति व्याप्यवृत्ति वा, आद्ये ऐकात्म्येऽपि यज्ञदत्तशरीरावच्छिन्नात्मप्रदेशसमवायिज्ञानस्य परमत इव तत्रैव प्रयत्नजनकत्वात् प्रयत्नवदात्मसंयोगकारणिका क्रिया यज्ञदत्तशरीर एव जायते देवदत्तशरीरावच्छिन्नात्मप्रदेशे तु तज्ज्ञानादेरभावादेव तत्कारणकप्रवृत्तेरप्यभावोपपत्तावात्मभेदो न कल्प्य इत्याह * न तच्छरीरेति * विपक्षे बाधकमाह * मृतशरीर इति * एवं सति मरणानन्तरमेव प्रेतशरीरं प्राप्तस्य तत्रत्यज्ञानादिना मृतशरीरप्रवृत्त्याद्यापत्तिर्न तथा दृश्यत इत्यर्थः। न द्वितीयः अपसिद्धान्तापत्तेरित्याह * न वा परमते इति * ज्ञानस्य व्याप्यवृत्तित्वेऽपि मृतशरीरवदात्मनि मनः संयोगाख्यकारणाभावादेव तत्र प्रयत्नाद्यभावो न ज्ञानाभावादित्याशङ्क्याह * न च मृतेति * किं मृतशरीरवदात्ममात्रे मनःसंयोगाभावः उत तदव-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सत्वात् यज्ञदत्तज्ञानजनकमनःसंयोगादेर्देवदत्तशरीरेऽ
भावात्, तस्य च मनःसंयोगस्य स्वजन्यज्ञानगोचर
प्रवर्त्तकत्वात्, ज्ञानस्य स्वजनकमनसाऽसन्निकृष्टशरी
न्तरावच्छिन्नात्मधर्मागोचरत्वात्। अत एव बालादिशरी
भेदेऽपि यथाऽनुसन्धानं तथा देवदत्तयज्ञदत्तयोरपि स
दिति प्रत्युक्तम्। येन मनसा यदनुभूतं तेनैव तत्स्मरणं

च्छिन्नात्मप्रदेशे नाद्य इत्याह * प्रेतेति * द्वितीये तद्वदेव यज्ञ
देहोपहितात्मवृत्तिज्ञानजनकमनः संयोगस्य देवदत्तदेहोपहित
न्यभावात्तत्र यज्ञदत्तस्य न प्रवृत्त्यादिप्राप्तिरित्याह *यज्ञदत्तेति
वदत्तशरीरावच्छिन्नात्मनि यज्ञदत्तज्ञानजनकमनःसंयोगाभावे
न्यमनःसंयोगस्य सत्वात्तत एव यज्ञदत्तज्ञानगोचरे देवदत्तस्य
वृत्तिःस्यादित्याशङ्क्याह * तस्य चेति * देवदत्तादिदेहावच्छि
त्ममनः संयोगस्येत्यर्थः। मनःसंयोगस्य स्वजन्यज्ञानद्वारा तद्ग
एव प्रवर्त्तकत्वादेतज्जन्यज्ञानस्य यज्ञदत्तज्ञानगोचरविषयत्वाभ
नायं तत्र प्रवृत्तिहेतुरित्यर्थः। ननु कृतिसाध्यत्वज्ञानस्य प्रवर्त्तक
त्तवमते शरीरान्तरोत्पन्नतज्ज्ञानस्य स्वसमानाधिकरणशरीरा
सम्बन्धिकृतिविषयत्वसम्भवात्ततः शरीरान्तरेपि प्रवृत्तिः स्या
नेत्याह * ज्ञानस्येति* प्रवर्त्तकज्ञानस्येत्यर्थः। असन्निकृष्टो यः
रान्तरावच्छिन्न आत्मा तद्धर्मस्तद्गता कृतिस्तदविषयत्वादित्यर्थः
नःसन्निकर्षस्य ज्ञानद्वारा स्वाश्रयात्मप्रदेशे एव कृतिजनका
तस्या एव स्वसमानप्रदेशवृत्तिप्रवर्त्तकज्ञानविषयत्वात्प्रदेशान्त
र्त्तिकृतेः प्रदेशान्तरवर्त्तिज्ञानजन्यत्वायोगात्सा न तद्गोचरेति नो
तिप्रसङ्ग इत्यर्थः। एवमेकस्यैवात्मनः स्वरूपेण सर्वसुखाद्यनुस
तृत्वेऽप्यवच्छेदभेदेन व्यवस्थिता प्रवृत्तिर्घटत इत्युक्तं सम्प्रत्येका
शरीरभेदेपि बालादिशरीरेणानुभूतस्य स्थविरशरीरेऽनुसन्धान
वदत्तादिशरीरेणानुभूतस्य शरीरान्तरेऽप्यनुसन्धानं स्यादित्याश
निराकरोति *अत एवेति* अतःशब्दार्थमेवाह *येनेति* उभय

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ति स्थितावनतिप्रसङ्गात् । ननु सर्वस्मिञ्जन्मनि मन एकमित्यत्र प्रमाणाभावात्कथं जातमात्रस्य जन्मान्तरानुभूतस्मरणमिति चेत् । न तद्भेदेऽपि प्रमाणाभावात्, संशये तु स्मरणबलादेकमिति कल्प्यतां आत्मभेदकल्पनायां गौरवात् करणगणवेष्टितस्यैवात्मनः परलोकगम-

दिसम्मतान्तःकरणैक्यतदभावाभ्यामेवोभयत्रापि देहभेदेपि देहान्तरानुभूतानुसन्धानाननुसन्धानव्यवस्थोपपत्तेर्गौरवादप्रयोजकत्वाच्च नात्मभेदोऽपि कल्प्य इत्यर्थः । येन मनसेत्युक्तनियमस्य व्यभिचारं शङ्कते * नन्विति* *प्रमाणाभावादिति* मनस आनन्त्येन जन्मान्तरेऽन्यस्य मनसः सम्भवादिति शेषः । जातमात्रस्य गोवत्सादेः स्तन्यपादौ प्रवृत्तिदर्शनात्तद्धेतोरिष्टसाधनताज्ञानस्य जन्मान्तरानुभूतेष्टोपायत्वस्मरणान्यस्यासम्भवात्तत्स्मरणे मनोन्तरजन्यत्वसम्भवात्कथमुक्तनियम इत्यर्थः । परमते बालादिदेहभेदेऽप्यन्तःकरणैक्याभ्युपगमात्तद्वदेव जन्मान्तरेपि तदभेदोपपत्तेरुक्तनियमसिद्धिरिति परिहरति * न तद्भेद इति * देवदत्तादिदेहभेदे मनोभेददर्शनाद्भिन्नकालीनदेहभेदेऽपि मनोभेदः सम्भवतीत्याशङ्क्योभयथा सम्भवेपि बाल्याद्यनुभूतस्मरणादाविव जातमात्रस्य स्मरणेपि तन्मूलानुभवजनकमनोजन्यत्वमेव युक्तं तस्य क्लृप्तत्वादित्याह * संशय इति * आत्मैक्यादेव स्थविरादौ जन्मान्तरे च देहान्तरानुभूतस्मरणं नान्तःकरणैक्यादिति किं न स्यादित्याशङ्क्य तथा सत्यात्मभेदः स्मरणाभावप्रयोजको वक्तव्यः तथा च गौरवमित्युक्तमित्याह * आत्मभेदेति * जन्मान्तरेऽन्तःकरणभेदाभेदसंशयं स्वीकृत्य लाघवादभेद उक्तः सम्प्रति 'समानः सन्नुभौ लोकावनु सञ्चरति' 'तमुक्रामन्तं प्राणोऽनु उक्रामति प्राणमनूक्रामन्तं सर्वे प्राणा अनूक्रामन्ती' त्यादिना पूर्वलिङ्गपरिवेष्टितस्यैव जीवस्य लिङ्गाश्रितविद्याकर्मादिवशाद्देहान्तरप्राप्तिश्रवणात्तद्भेदे न संशय इत्याह * करणगणेति * तस्यान्तःकरणाभेदस्य। नचैवं सिद्धान्ते सुषुप्तौ मनसो नष्टत्वेनाद्य-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नादिप्रतिपादकश्रुत्या तस्य सिद्धत्वाच्च । वस्तुतस्तु न बा-
लादिशरीरं भिद्यते प्रत्यभिज्ञानात् तज्जनकादृष्टे सति
तन्नाशायोगात् नाशकान्तराभावाच्च, प्रथमशरीरे क्लृप्तज-
नकादिव्यापाराभावात् द्वितीयादिशरीरस्य ब्राह्मण्यादेरनु-
त्पत्तौ जातिकुलगोत्रादिव्यवस्थाऽसम्भवात्परिमाणभेद-

ह्यस्तनवस्तुगोचरस्मरणानुपपत्तिरिति वाच्यम्। 'तदापीतेः संसारव्य
पदेशा' इति न्यायेन स्वापादावनिर्वचनीयसूक्ष्मरूपेणावस्थितस्यै
लिङ्गस्य पुनर्जाग्रदादावुद्भवस्वीकारेण स्मरणाद्यभावप्रयोजकतद्भंग
भावादिति भावः । एवं बाल्याद्यवस्थासु देहभेदमङ्गीकृत्य मन
एकत्वादनुसन्धानादिव्यवस्थोपपत्तिरित्युक्तं इदानीमङ्गीकारं पा
त्यजति *वस्तुतस्त्विति* स एवाहं चैत्रपुत्रः स एवायं ब्राह्मण इ
स्वपरप्रत्यभिज्ञादर्शनादित्यर्थः । उपपत्तितोऽपि बाल्यादिशरीरैक्यम्
पपादयति * तज्जनकेति * एकस्य न युगपदनेकदेहयोगः अदर्शना
दप्रयोजकत्वादसम्भवाच्च, क्रमेण च देहभेदे पूर्वपूर्वनाशे सत्येवोत्त
रोत्तरोत्पत्तिर्वक्तव्या तत्र किं प्रारब्धकर्मनाशः पूर्वनाशे कारणं स
मवाय्यसमवाय्यन्यतरनाशो वा, नाद्यः तस्य यावज्जीवभोगसुखाद्य
त्पादनाय शरीरारम्भकत्वेन तत्पूर्वं तन्नाशायोगादित्यर्थः । द्वितीय
स्त्वनुपलब्धिपराहतः । न च बाल्यादिशरीरसंस्थानभेदात्तदारम्भ
कावयवसंयोगभेदे पूर्वसंयोगनाशः कल्प्य इति वाच्यं । सत्यपि पूर्व
संयोऽगेवयवान्तरसंयोगान्तरादेव संस्थानभेदोपपत्तेरित्याशयेना
* नाशकान्तरेति * उत्तरदेहस्यापि प्रथमदेहे क्लृप्तकारणादेवोत्प
त्तिः कारणान्तराद्वा नोभयथापीत्याह * प्रथमशरीर इत्यादिना
द्वितीयादिशरीरस्येत्यस्य काकाक्षिन्यायेन पूर्वोत्तरवाक्याभ्यामन्वयः
अत्र प्रथमेऽनुपलम्भविरोधः द्वितीये विशिष्टपित्रादिजन्यत्वस्य ब्रा
ह्मण्यादिप्रयोजकत्वाद्द्वितीयादिदेहे पित्रादिव्यापाराभावात् ब्राह्म
ण्यादिव्यवस्थाभावापत्तौ तदधीनव्यवहारनियमो न स्यादित्यर्थः
ननु बाल्याद्यवस्थापन्ना देहाः परस्परं भिद्यन्ते भिन्नपरिमाणत्वात्

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्यानिर्वचनीयस्याङ्गुल्यग्रहृदयाद्यवच्छिन्नशरीरे सङ्कुचितविस्तृतपटादिपरिमाणभेदवदाश्रयभेदानियतत्वाच्च, तस्मात्पररीत्याऽप्यैकात्म्ये नानुसन्धानादिप्रसङ्गः। वस्तुतस्त्वच्छेदकभेदादवच्छिन्नभेद इति न कोपिदोषः स्थूलसूक्ष्मादिघटाद्यवच्छिन्नस्य दशविंशतिपदार्थाश्रयस्य नभसः स्वरूपकार्यभेदानुभवात् नभोमात्रस्य श्रोत्रत्वे सर्वश-

कुचलामलकबिल्ववदित्याशङ्क्य व्यभिचारेण दूषयति * परिमाणेति * एकस्मिन्नपि शरीरे मूले स्तम्भः स्थूलोग्रे सूक्ष्म इति वत्तत्तदवयवावच्छिन्ने युगपन्नानापरिमाणदर्शनादेकत्र जलूकादौ क्रमेण नानापरिमाणदर्शनाच्च न परिमाणभेदो द्रव्यभेदव्याप्तः । न च तत्रावयवपरिमाणानामेव नानात्वं न त्ववयविपरिमाणस्येति वाच्यम्। शरीरत्वसामानाधिकरण्यानुभवविरोधात् शिरःपाणिपादाङ्गुल्याद्यवच्छिन्नावयविन्येकविधपरिमाणान्तराननुभवादसम्भवाच्च वेष्टितप्रसारितकटादावुपविष्टोत्थितदेहादौ च परिमाणभेदानुभवस्य बाधकाभावात्, क्व चित्परिमाणेऽप्ययावद्द्रव्यभावित्वाव्याप्यवृत्तित्वयोः पार्थिवरूपादिविशेषवदुपपत्तेश्च परिमाणभेदो न द्रव्यभेदनियत इति भावः । पराभिमतात्मन एकत्वेऽप्यन्तःकरणभेदादेवानुसन्धानादिव्यवस्थावत्तदधीनकर्तृत्वभोक्तृत्वव्यवस्थाया अप्युपपत्तेरात्मभेदो न कल्प्य इति उपसंहरति * तस्मादिति * नानुसन्धानादिप्रसङ्गोऽनुभवरहितस्येति शेषः । एवं पररीत्येह परमतेऽप्यात्मभेदं निरस्य वस्तुतत्त्वमाह * वस्तुतस्त्विति * एवं च देवदत्तादीनां शरीराद्यवच्छेदभेदेन भिन्नत्वान्नान्यानुभवादिनाऽन्यस्य स्मरणादिप्रसङ्ग इति भावः । यदवाद्यवच्छेदकभेदं विनाऽवच्छिन्नभेदाननुभवादित्यादि तत्राह * स्थूलेति * घटभेदेन द्वे छिद्रे इत्यवच्छिन्ननभसः स्वरूपतो भेददर्शनात् स्थूलसूक्ष्मघटाद्यवच्छिन्नाकाशयोर्भेदाभावं प्रेक्षावतां सूक्ष्मावकाशं परित्यज्य बहुपदार्थस्थापनाय स्थूलावकाशान्वेषणाद्यनुपपत्तेश्च तयोर्भेदोऽवश्यमभ्युपेयः स च यद्यप्य-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ब्दोपलम्भप्रसङ्गश्च तज्जातीयस्य ग्रहणेनादृष्टविशेषस्यापि सत्वाच्च, नियमेन शब्दोपलम्भस्यादृष्टसाध्यत्वे तदनुपलम्भस्य शब्दे सत्यपि सम्भवेन तदभावानुभवायोगाच्च चक्षुर्गोलकादावदर्शनेन श्रोत्रगोलकसम्बन्धस्य साक्षात्कारा-

भेदसमसत्ताको न सम्भवति एकत्राबाधितप्रत्यभिज्ञासिद्धवास्तव भेदे सति तत्समसत्ताकतद्भेदस्य विरोधात् तथाप्याकाशधर्मिप्रति योगिकभेदसाक्षात्कारस्य सविषयत्वाय स्थूलसूक्ष्मच्छिद्रेषु नियत संङ्कुचाकसमानपरिमाणपदार्थस्थितिनियमाय चानिर्वचनीयः सो ऽभ्युपेयः अत एव सविशेषणो हीत्यादिन्यायोऽनिर्वचनीयवादिनां स्यसम्मतत्वादुपाधेर्विशेषणादन्यत्वाच्च नोदाहर्त्तव्यः। एतेनोपाधि न्यत्वादिविकल्पासहत्वादौपाधिको भेदो दुर्निरूप इति निरस्तम्। निर्वचनीये निरूपणानर्हत्वस्य भूषणत्वात्। वस्तुतस्तु उपाधिसम्बन्धस्यागन्तुकत्वे तदधीनोत्पत्तिस्थितिकत्वमेव भेदस्यानिर्वचनीयस्य पाधिकत्वं अनाद्यविद्योपाधिकजीवेशभेदस्य त्वनादितया जन्यत्वाभावादनादेरपि कार्य्यप्रागभावस्य परमते कारणाभावाधीनास्थितिकत्वमुपाध्यधीनस्थितिकत्वमेवौपाधिकत्वमित्यनिर्वचनीयौपाधिकभेदावानिर्वचनीयसकलव्यवस्थोपपत्तिरिति भावः।उपाधिभेदव्यतिरेकेऽप्यौपाधिकभेदानङ्गीकारे बाधकमाह*नभोमात्रस्येति*कर्णवलयावच्छिन्नं नभः श्रोत्रं तच्च स्वसमवेतशब्दग्राहकमिति हि परैरुपेयते तस्य यद्यपि तदनवच्छिन्नान्नभसो न भेदस्तदा नभोमात्रं श्रोत्रमिति तेनैकस्य त्समवेतसर्वशब्दोपलम्भप्रसङ्ग इत्यर्थः। सर्वशब्दानां श्रोत्रसमवायेऽपि तदुपलम्भकादृष्टविशेषाभावान्न सर्वोपलम्भ इत्याशङ्क्याह * तज्जातीयस्येति * दृष्टसामग्रीसम्पादनद्वारैवैतादृशकार्य्येऽदृष्टस्य योगादन्यथा पराभिमतमनआद्यसिद्धिप्रसङ्गादिति भावः। अदृष्टस्य साक्षाच्छब्दोपलम्भहेतुत्वे बाधकान्तरमाह * नियमेनेति * सत्यपि शब्द इत्यस्यानन्तरमदृष्टाभावेनेति शेषः। यत्राभावाधिकरणे तद्विशेषतप्रतियोगिसत्वं तदनुपलब्धिविरोधतया तर्कितुं शक्यं तत्र तदनुपलब्धिरभावग्राहिकेति परैरभ्युपेयते श्रोत्रे सत्यपि शब्दसमवायेऽदृष्टाभावात्तदनुपलम्भे सति श्रोत्रे तर्कितस्यापि शब्दस्यानुपलब्धिविरोधित्वेन तर्कितुमशक्यत्वात्तदनुपलब्ध्या तत्र तदभावनिश्चयो न स्या

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

हेतुत्वाच्च । संयोगतदभावाधिकरणयोरौपाधिकभेदाभावे मूलत्वाग्रत्वयोरुभयोरप्युभयसामानाधिकरण्यनियमेनैकतरावच्छेदेनैकतरानु(१)भवो न स्यात् स चावच्छिन्नभेदोऽबाधितस्वरूपप्रत्यभिज्ञानाद्वास्तवो न भवति अनिर्वचनीयस्तु परस्य नास्त्येवेति सर्वोपि व्यवहारो दत्तंजला-

दित्यर्थः । ननु श्रोत्रवत्तद्गोलकसम्बन्धस्यापि शब्दोपलब्धिहेतुत्वात्सर्वशब्दस्य च तत्सम्बन्धाभावादप्रतीतिरित्याशङ्क्याह * चक्षुर्गोलकादाविति * गोलकस्य साक्षात् ग्राह्यसम्बन्धो न तद्ग्रहणहेतुः चक्षुर्गोलके तदभावेऽपि दूरस्थवस्तुदर्शनात् श्रोत्रादिगोलकं साक्षाच्छब्दादिसम्बन्धासम्भवाच्च, परम्परासम्बन्धस्तु श्रोत्रगोलके सर्वशब्दसाधारण इति सर्वग्रहणं दुर्वारमिति भावः । किं च मूले वृक्षः कपिसंयोगी अग्रे नेति मूलत्वावच्छेदेनैव संयोगस्याग्रत्वावच्छेदेनैव तदभावस्यानुभवाद्विरुद्धयोस्तयोर्युगपदेकवृत्तित्वायोगाच्च मूलाग्रवृक्षयोर्भेदोऽभ्युपेयः मूलत्वाग्रत्वावच्छिन्नवृक्षभेदाभावे च तयोरुभयोरपि संयोगतदभावोभयसमानाधिकरणत्वाद्वृक्षत्वादिवदेकैकमात्राधिकरणतावच्छेदकत्वायोगात् भावाभावयोरसाङ्कर्य्यानुभवो न स्यादित्याह * संयोगेति * एवमौपाधिकभेदं प्रसाध्य तस्य सत्यत्ववादिनमेकदेशिनं प्रत्याह * स चेति * अबाधितेति च्छेदः । भेदाभेदयोर्विरुद्धयोरेकत्र सत्वायोगेनैकत्रापरस्याध्यस्तता वाच्या तत्राभेदस्य स्वरूपत्वेन निरपेक्षस्य प्रत्यभिज्ञासिद्धस्य त्रैकालिकत्वेनाधिष्ठानत्वसम्भवात्तत्राध्यस्तभेदस्य धर्म्यादिसापेक्षस्य न सत्यतेत्यर्थः । एवं स्वमतेऽनिर्वचनीयभेदेन तादृशव्यवहारव्यवस्थामुपपाद्य परमते तदनङ्गीकाराद्भावाभावादेर्व्यवस्थितत्वायोगात्तदधीनव्यवस्थितव्यवहारविप्लवः स्यादित्युपसंहरति * अनिर्वचनीयस्त्विति * नास्त्येवेत्यत्र तन्मत इति विशेषः । एवं तावदेकात्मन एव सुखदुःखाद्याश्रयत्वं स्वीकृत्यावच्छेदकान्तःकरणादिभेदेन तदुपाधिकात्मभेदेन वा तदनुभवानुसन्धाना-

(१) कतरस्यानु इति खपु० पा० ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ज्ञलिरेवान्तःकरणस्यैव सिद्धान्ते सुखाद्युपादानत्वादपि
नातिप्रसङ्गः। अत एव न पदार्थत्वादिकमपि भेदसाधकं,
सर्वेषामेव भेदहेतूनां 'नान्योऽतोऽस्ति द्रष्टा' 'एको देव'
इत्यादिश्रुत्या 'आकाशमेकं हि यथा घटादिषु पृथग्भवे
त्। तथाऽऽत्मैकोऽप्यनेकः स्याज्जलाधारेष्विवांशुमानिति
याज्ञवल्क्यवचनेन 'ममान्तरात्मा तव च ये चान्ये दे
हिसंज्ञिताः। सर्वेषां साक्षिभूतो ऽसौ न ग्राह्य
केन चित्क्वचि' दित्यादिभारतादिवचनेन बाधश्च

दिव्यवस्थेत्युक्तम्। सम्प्रति 'कामः सङ्कल्प' इत्यादिश्रुतेः परिशेषा
मानाच्च सुखादेर्मनोधर्मत्वे सिद्धे परमतवदाश्रयभेदेन तदुपाधि
साक्षिभेदेन च सर्वव्यवस्था घटत इत्याह * अन्तःकरणस्यैवेति
उक्तविधया कल्पितभेदेनापि सर्वव्यवस्थोपपत्तेर्जीवो ब्रह्मप्रतियो
कभेदवान् पदार्थत्वादित्याद्यनुमानं भेदमात्रसाधने सिद्धसाधनं
स्तवभेदसाधने चाप्रयोजकमित्याशयेनाह * अत एवेति * आ
बाधितत्वाच्च प्रतिपक्षानुमानदौर्बल्यमाह * सर्वेषामिति * या
ल्कीयवचनं दृष्टान्तद्वयमवच्छिन्नरूपः प्रतिबिम्बरूपो वा जीव
मतद्वयेपि भेदो मिथ्यैवेत्यभिप्रायेणोपात्तमिति द्रष्टव्यम्। एवं
वभेदसत्यत्वे प्रमाणाभावमुपपाद्य जीवस्वरूपपर्यालोचनयापि
सम्भवं वक्तुं तस्य तावदणुत्वं निराकरोति * किं चेति
देवदत्तात्मा जीवो नाणुः तत्प्रत्यक्षविषयत्वात् घटादिवदित
प्रेत्य विपक्षे बाधकमाह * सर्वाङ्गेति * गन्धवत्सुखादे
स्वाश्रयसम्बन्धं विनाऽप्यन्यत्र प्रसराच्छरीरान्तरव्यापिनेत्याशङ्क्य
युगपदिति * एकस्मिन्देहे अणुजीवबहुत्वे तेषामेकमत्यस्य
यमेनासम्भवाद्युगपद्विरुद्धदिक्क्रियतया देह उन्मथ्येत तद
त्वे तु तस्य व्यवहितावयवद्वये युगपत्सम्बन्धासम्भवात् ह
द्वयाङ्गुलिमात्रे युगपदनुभूयमानानेकप्रयत्नस्य शिरोमात्रे पाद
त्रे च युगपद्व्यवस्थितसुखदुःखयोश्च सर्वजनीनानुभवो न स्या

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

किञ्च जीवो नाणुः सर्वाङ्गव्यापिसुखादेर्युगपद्विच्छिन्न देशद्वये चत्नादेरननुभवप्रसङ्गात् । नापि विभुर्विभुत्वे गगनादिवदवान्तरजात्यनुपपत्तेः सर्वशरीरेषु युगपद्भोगप्रसङ्गात् । न च तददृष्टारब्धशरीरे एव तस्य भोग इति वाच्यम् । अदृष्टं हि स्वाश्रय एव भोगं जनयतीति नियमः न त्वदृष्टकार्य्यमप्यदृष्टाश्रय एव स्वकार्य्यमिति देवदत्तशरीरक्रिया आत्मान्तरे संयोगादिवदपूर्वभोगोपपत्तेः देवदत्तप्रयत्नार्जितगृहादिवद-

दृष्टान्तोऽप्यसम्प्रतिपन्न एव 'उपलभ्याप्सु चेद्गन्धं के चिद्ब्रूयुरनैपुणाः। पृथिव्यामेव तं विद्यादपो वायुं च संश्रित' मितिन्यायमूलबादरायणवचनाद्गन्धस्य जलादावाश्रयानुवृत्तिकल्पनवदन्यत्रापि तत्कल्पनादिति भावः। एवं जीवस्य ब्रह्मात्मतां विना स्वतो विभुत्वमप्यनुपपन्नमित्याह * नापीति * विभुत्वस्य द्रव्यत्वावान्तरजात्यनाश्रयत्वेन गगनादौ व्याप्तिदर्शनाज्जीवस्यापि विभुत्वे तदभावप्रसङ्गान्न स्वतो विभुत्वमिति ब्रह्मात्मनैव तद्वक्तव्यं तथा च मदिष्टसिद्धिरित्यर्थः। किं चैकात्म्यवादे भोगसाङ्कर्य्यं परिहृतमेव अनन्तविभ्वात्मवादे तु सर्वेषां सर्वे भोगाः स्युरिति भोगसाङ्कर्य्यं दुष्परिहरमित्याह * सर्वशरीरेति * नन्वेकैकस्य सर्वशरीरसंयोगेऽपि तत्तद्दृष्टारब्धे शरीरे तस्य तत्तद्भोगनियमान्नातिप्रसङ्ग इति नेत्याह * न च तददृष्टेति * एकैकदेहस्यैकैकात्ममात्रादृष्टारब्धत्वमङ्गीकृत्य तस्य देहस्य स्वारम्भकादृष्टाश्रयजीवे एव भोगहेतुत्वनियमो न युक्त इत्याह * अदृष्टं हीति * स्वकार्य्यमित्यत्र जनयतीत्यनुषङ्ग इतीत्यत्र नियमः इत्यनुषङ्गः। तत्र हेतु * देवदत्तेति * संयोगादिवदिति * तत्क्रियाश्रयशरीरसंयोगादिवदित्यर्थः। विभागादिरादिपदार्थः। * अपूर्वभोगोपपत्तेरिति * देवदत्तशरीरेणात्मान्तरगतादृष्टफलभोगोपपत्तेरित्यर्थः। देवदत्तशरीरगततत्तत्तीर्थस्नानादिक्रिय-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

न्यस्यापि तत्र स्वादृष्टाद्भोगसम्भवान्मृतशरीरेऽपि प्र-
सङ्गाच्च । प्रदेशान्तरवर्तिमनःसंयोगाद्युगपद्दशाङ्गु-
ल्यवच्छेदेन दशप्रयत्नवन्मनुष्यशरीरावच्छिन्नात्मवृत्त्य-
दृष्टादन्यत्र भोगवन्मृतशरीरेऽपि तत्सम्भवात् । पुत्रादि-
शरीरजीवनयोः पित्राद्यदृष्टायत्तत्वाच्च, प्रतिशरीरं भिन्न-

याऽऽत्मान्तरेऽप्यपूर्वभोगयोरुपपत्तेरिति वार्थः । तदुक्तमदृष्टानियमा-
दिति ' । स्वभोगाय देवदत्तोपार्जितदेहेऽन्यस्य भोगादिर्न युक्त
त्याद्यव्याख्यामाशङ्क्याह *देवदत्तेति* देहे तददृष्टारब्धत्वस्य तद्भो-
गनियामकत्वमङ्गीकृत्याप्याह *मृतशरीर इति* न च तत्र मनः सं-
योगादिकारणाभावादेव न भोग इति वाच्यम् । मरणानन्तरभावि-
यातनादेहादौ तत्सत्वात् । एवमपि प्रदेशान्तरवर्त्तिहेतोर्न
देशान्तरे फलोदय इत्याशङ्क्याह * प्रदेशान्तरेति * हृदया-
दिप्रदेशवृत्त्यणुमनसः आत्मसंयोगादित्यर्थः । एवमेकैकदेशसं-
कैकादृष्टारब्धत्वमङ्गीकृत्य तस्य भोगनियमं प्रत्यप्रयोजकत्वमु-
क्त्वाऽङ्गीकारं परित्यजति * पुत्रादीति * प्रजाकामो यजे-
त पशुकामो यजेतेत्यादिशास्त्रात्पुत्रादिदेहस्य पित्राद्यदृष्टेनापि अ-
न्यत्वावगमात् पुत्रपश्वादिदेहेष्वपि विभोः पित्राद्यात्मनो भोग
स्यात् पुत्रादेश्च तत्र भोगो न स्यात् तद्देहस्य स्वादृष्टमात्रारब्धत्व-
भावात् । वस्तुतस्तु विभ्वात्मनानात्वमते सर्वात्मसंयुक्तशरीरादि
तक्रियाजनितादृष्टस्य तद्धेतुप्रयत्नादेर्वा नियामकाभावादेकात्ममात्र
वृत्तित्वानुपपत्तिः । न च तन्मात्राश्रितप्राक्तनादृष्टारब्धदेहादिजा
तप्रयत्नादि तस्यैवेति नियमोपपत्तिरिति वाच्यम् । पुत्रादिदे
तन्मात्रादृष्टजन्यत्वासम्भवस्योक्तत्वात्प्राक्तनादृष्टमेतदीयमेवेत्यत्रापि
नियामकाभावाच्च । न च तदीयदेहादृष्टयोः प्रवाहानादित्वात्सर्व
नियमोपपत्तिरिति वाच्यम् । तयोः क्वचिदपि कार्य्यकारणभावनियम
स्याक्लृप्तत्वेनान्धपरम्परादोषापातात् 'रमणीयचरणा रमणीयां यो
निमापद्यन्त' इत्यादिश्रुतिरपि 'यथाह्ययं ज्योतिरात्मा विवस्वान्' 'य
एव हि भूतात्मेति' श्रुत्यनुरोधेनोपाधिपरिच्छिन्नजीवेष्वन्यतः प्राप्त

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्यात्मनो विभुत्वे प्रमाणाभावाच्चाहमिहैवास्मि सदने जानान इति तत्परिच्छेदस्यैवाबाधितानुभवसिद्धत्वात्सर्वदा स्पर्शरहितद्रव्यत्वादित्यादिहेतूनां प्रत्यक्षबाधाददृष्टस्याश्रयसम्बन्धं विनैव स्वमहिम्ना शब्दवत्कार्य्यान्त-

त्वनुवादेन फलनियमविधिपरा तस्माद्विश्वात्मस्वदृष्टाधीना भोगव्यवस्थेति मनोरथमात्रमिति भावः । एवं भिन्नात्मनां विभुत्वेऽनुपपत्तिमुक्त्वा तत्र प्रमाणमपि नेत्याह *प्रति शरीरमिति* किं तत्र प्रत्यक्षं प्रमाणमुतानुमानं नाद्यः, तेन जीवे परिच्छेदस्यैवानुभवादित्याह *अहमिहैवेति* न चायमनुभवो देहादिविषय इति शङ्क्यं तस्य प्राङ्निरस्तत्वादित्यभिप्रेत्याबाधितेत्युक्तम् । जीवो विभुः सर्वदा स्पर्शरहितद्रव्यत्वा न्नित्येन्द्रियग्राह्य (१) गुणाश्रयत्वाद्वा स्वद्वितीयक्षणनियतस्वविनाशसामग्रीकविशेषगुणवत्वाद्वा आकाशवदित्यनुमानं तत्र मानमिति द्वितीयं कल्पं निराकरोति * सर्वदेति * प्रत्यक्षमहमिहैवेत्यनुभवः । न च प्रत्यक्षस्य भ्रमत्वान्नानुमानबाधकतेति वाच्यम् । बाधकाभावेन तस्य भ्रमत्वासिद्धेः । न चोक्तानुमानं बाधकं परस्पराश्रयापत्तेः विपक्षे बाधकाभावेनाप्रयोजकत्वाच्च, आद्यहेतोश्च केषां चिन्मते मनसि तमसि च व्यभिचाराद्द्वितीयतृतीययोस्त्वस्मिन्मते पक्षदृष्टान्तयोरसिद्धत्वाच्चेति भावः । नन्वस्मदादिभोग्यवस्तुनो देशान्तरादावुत्पद्यमानस्यास्मददृष्टजन्यत्वादृष्टस्य च स्वाश्रयानुवृत्तिं विना देशान्तरीयेण स्वतः सम्बन्धायोगात् सम्बन्धाभावे वाऽदृष्टस्य जनकत्वायोगात्तदाश्रयस्याविभुत्वे तस्य देशान्तरादौ कार्य्यजनकत्वानुपपत्तिरिति नेत्याह *अदृष्टस्येति* परमते विभोरप्यात्मनो विभुनाऽऽकाशेन सम्बन्धाभावेपि स्वरूपसम्बन्धादेवात्मगतादृष्टाद्यथाऽऽकाशे शब्दादि जायते तद्वत्परिच्छिन्नात्मगतादृष्टादपि स्वरूसम्बन्धमहिम्नैव देशान्तरादौ कार्य्यजन्म सम्भवति न चाकाशेऽप्यात्मसंयुक्तभर्य्यादिद्वारा परम्परया ऽदृष्टप्रत्यासत्तिरस्तीति वाच्यम् । परिच्छिन्नात्मसंयुक्ताकाशादिद्वारापि सा

(१) गुणः सुखादिः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रेपि जनकत्वसम्भवाच्च, कायव्यूहशास्त्रस्य प्रत्यक्ष-सिद्धपरिच्छेदानुरोधेन परमतेऽभेदश्रुतेरिवान्यार्थत्वात् तस्माज्जीवाणुत्वविभुत्वयोरयोगात्स्वतो मध्यमपरिमाणत्वेऽनित्यत्वापत्तेः सर्वात्मनो ब्रह्मणः श्रुतिस्मृत्यादिसिद्ध औपाधिकप्रदेश एव जीव इति न जीवानामपि भेदः। एतेनेदं निरस्तं क्लृप्तप्रमाणासम्भवे हि प्रमाणान्तरं कल्पनीयं न त्वनुभवसिद्धभेदपरित्याग इति, श्रुतिविरोधेऽभिन्नेऽपि भेदसम्पादकतया क्लृप्ताज्ञाने च सति

सुलभेति मुधा विभुत्वोपगम इति भावः। जीवस्याविभुत्वे 'स एकधा भवति त्रिधा भवति पञ्चधे'त्यादिश्रुते' 'रात्मनो वै शरीराणि बहूनि भरतर्षभ। योगी कुर्य्यादूबलं प्राप्य कैश्चित्सर्वां महीं चरेत्। प्राप्नुयाद्विषयान्कैश्चित्कैश्चिदुग्रं तपश्चरेत्। सङ्क्षिपेत्तु पुनस्तानि सूर्य्यो रश्मिगणानिवेति' स्मृतेश्च युगपदनेकदेहपरिग्रहाविषययोः का गतिरित्याशङ्क्य तयोर्भूमविद्यायोगविधिस्तुत्यर्थतया 'विरोधे गुणवाद' इति न्यायेन विदुषः स्वच्छन्दतामात्रपरत्वस्य वा सर्वात्मब्रह्मरूपेणोपासनापरत्वस्य वा त्वन्मतं न्याय्यत्वादित्यभिप्रेत्याह * कायव्यूहेति * अभेदश्रुतेः तत्त्वमादिश्रुतेः। एवं जीवानां स्वतो विभुत्वे साधकाभावं बाधकं चोक्त्वा स्वतो मध्यमपरिमाणत्वे सावयवत्वात् नित्यत्वप्रसङ्गेन तन्निराकुर्वन् कल्पितभेदेन ब्रह्मणोंशा एव जीवास्ततस्तद्भेदो ऽपि न वास्तव इत्युपसंहरति * तस्मादिति * जीवपरभेदादौ प्रसिद्धप्रमाणाभावेपि समस्तमहाजनसिद्धतत्प्रतीतिनिर्वाहाय प्रमाणान्तरं कल्प्यमिति ततस्तस्य सत्यत्वसिद्धिरित्याशङ्क्याह * एतेनेति * तद्विवृणोति * श्रुतिविरोधइति * मानान्तरविरोधे सत्येव हि कल्पना प्रवर्त्तते अन्यथाऽतिप्रसङ्गात् महाजनप्रसिद्धेश्च देहात्मप्रत्ययवदुपपत्तेर्भेदप्रतीतिमात्रस्य प्रबलाभेदश्रुतिबाधितविषयत्वेन भ्रमत्वे सति तत्कारणतया क्लृप्ताज्ञानत एव त

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(१)तदयोगात् भेदानुभवस्य देहात्माभेदप्रत्ययवद्यावद्बाधं प्रामाण्योपपत्तेः तस्मान्नास्ति भेदे प्रमाणम् । किं च विभागः पृथक्त्वं वा न जीवश्वरभेदः तयोर्धर्मिद्वयप्रत्यक्षाधीनप्रत्यक्षत्वात् प्रत्यक्षातिरिक्तं च भेदे न किं चित्प्रमाणमित्युक्तम् । नापि वैलक्षण्यं भेदः विविधलक्षण-

वुपपत्तेश्च न मानान्तरं कल्प्यमित्यर्थः । भेदानुभवस्य भ्रमत्वे तदधीनलौकिकवैदिकव्यवहारा विफलाः स्युरित्याशङ्क्य तस्य यावद्बाधं व्यावहारिकप्रामाण्यान्न फलविसंवाद इति दृष्टान्तमाह * भेदानुभवस्येति* तदुक्तं देहात्मप्रत्ययो यद्वत् प्रमाणत्वेन कल्पितः । लौकिकं तद्वदेवेदं प्रमाणं त्वात्मनिश्चयादिति' आत्मनिश्चयात् असंसार्यात्मतत्त्वनिश्चयपर्यन्तमित्यर्थः । एवं मानाभावादयुक्तेश्चेति प्राचीनश्लोकोक्तमानाभावं प्रसाध्य निगमयति * तस्मादिति * इदानीमयुक्तेश्चेत्येतद्विवृणोति * किं चेति * विभक्तादौ सर्वत्र नियमेन भेदव्यवहारदर्शनाद्विभागादेरपि परमते भेदत्वसम्भवाज्जीवेशादिभेदे सत्यत्वं वदन् प्रष्टव्यः किं सर्वत्र विभाग एव भेदः पृथक्त्वं वा वैलक्षण्यं वा अन्योन्याभावो वा वस्तुस्वरूपं वेति, तत्र न प्रथमौ सम्भवतः तयोर्गुणादावसम्भवात् जीवेशयोर्जीवानां च विभुत्वेन विभागासम्भवाच्चेत्यभिप्रेत्याह * विभाग इति * किं च तत्र किं प्रत्यक्षं प्रमाणमन्यद्वा न प्रथम इत्याह * तयोरिति * तयोर्विभागपृथक्त्वयोः। तथा चेश्वरस्याप्रत्यक्षत्वात्तन्निरूपितयोः तयोः प्रत्यक्षत्वायोग इत्यर्थः । द्वितीये प्रागुक्त एव तन्निरासो द्रष्टव्य इत्याह * प्रत्यक्षातिरिक्तमिति * तृतीयं निरस्यति * नापीति * किं विविधलक्षणवत्त्वं वैलक्षण्यं विरुद्धलक्षणवत्त्वं वा, न प्रथमः एकस्मिन्नपि पृथिव्यादावनेकविशेषगुणवति प्रत्येकमनेकलक्षणासत्वादित्याह * विविधेति * न द्वितीय एकाधिकरणकत्वाभावलक्षणस्य नियमेन भिन्नाधिकरणकत्वलक्षणस्य वा विरोधस्य तत्ज्ञानस्य च भे-

(१) तदयोगात्—मानान्तरकल्पनायोगादित्यर्थः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वत्वस्यैकस्मिन्नपि सत्वात्, विरुद्धलक्षणवत्वस्यातिरिक्त-भेदतद्ग्रहाधीनत्वादहङ्कारातिरिक्ते आत्मनि ब्रह्मविल-क्षणत्वे प्रमाणाभावाच्च, अहङ्कारश्च नात्मेत्युक्तं तस्मा-दन्योन्याभावः स्वरूपं वा भेदो वाच्यः तत्र न तावद-न्योन्याभावः सम्भवति तत्प्रतियोगिप्रमाणयोरसम्भवात् तत्र परमते न घटादिः प्रतियोगी अभेदविरोधिभेदस्य तदभावतया तदयोगात्। न च घटादिरेवाभेदः तदधिक-

दान्तरतज्ज्ञानापेक्षत्वादन्योन्याश्रयात् । न च परस्परात्यन्ताभाव-नैयत्यं धर्माणां विरोध इति वाच्यम् । तस्यापि धर्मभेदाधीनत्वात्त-स्मान्नायं भेदो न वा एतज्ज्ञानं भेदज्ञानमित्याशयेनाह * विरुद्धेति * किं च ब्रह्मवैलक्षण्यं चेदात्मनि ततो भेदस्तत्किमहङ्कारातिरिक्तात्म-न्यस्तीत्युच्यतेऽहङ्काररूपे वा, आद्येऽपि किं वस्तुतस्तदुत तन्मात्रं नाद्यः धर्मिग्राहिकमानेनाहङ्कारातिरिक्तात्मनः कूटस्थचिन्मात्रतया सिद्धस्य वास्तवब्रह्मवैलक्षण्याभावात् । द्वितीयस्त्वयुक्तः प्रतिबिम्बा-दौ व्यभिचारात्। नापि प्रथमद्वितीयः दृश्यत्वादिनाऽहङ्कारानात्मत्व-स्य साधितत्वादित्याह* अहङ्कारातिरिक्तेत्यादिना * एवं परेषां का-शकुशावलम्बनसमं पक्षत्रयं निरस्य तत्सम्मतं चतुर्थपञ्चमपक्षद्वयं परिशेषयित्वा चतुर्थं तावदसम्भवेन दूषयति*तस्मादित्यादिना*ननु भूतलादि घटादि-नेति प्रतीतेर्घटाद्येव प्रतियोगीत्याशङ्क्याह*तत्रेति * किं घटाद्येव तत्प्रतियोगि तत्तादात्म्यं वा नाद्यः भेदस्याभेदविरो-धितया तदभावत्वेन घटप्रतियोगिकत्वायोगादित्यर्थः। घटस्यैव त-त्प्रतियोग्यभेदत्वान्नोक्तदोष इत्याशङ्क्याह * न च घटादिरिति * अभावप्रतियोगिनोर्विरोधाभावे तदभावानुपपत्तेस्तयोर्विरोधो वाच्य-स च तयोरेकदैकत्रावस्थानायोग्यत्वमेव तथा च घटाधिकरणे तत्प्र-तियोगिकाभावरूपतद्भेदायोगात् तयोरभेदः स्यात् । न चान्यो-न्याभावातिरिक्ताभावस्यैव प्रतियोगिनोक्तविरोध इति वाच्यम् । लाघवेनाभावत्वस्यैव तत्प्रयोजकत्वात् पक्षादन्यत्रैवायं नियम इति

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रणे तद्भेदाभावप्रसङ्गात् । तादात्म्यं भेदप्रतियोगि इति चेन्नतावत्तादात्म्यं घटस्वरूपातिरिक्तं तत्र न तावत् घट इति बुद्धिः प्रमाणं घटघटत्वतद्वैशिष्ट्यादन्यस्य तदविषयत्वात् । नापि घटो घटाऽभिन्न इति बुद्धिस्तद्विषया, तस्या भेदाभावविषयत्वात्। स एवतादात्म्यमिति चेत्तर्हि भेदतादात्म्ययोरन्योन्यज्ञानाधीनज्ञानतया नैकमप्यनुभूयेत । न च घटाभावाभावो घट इव भेदाभावोऽप्यभावोपस्थितिं विनैव ज्ञायत इति वाच्यम् । घटे घटत्वस्येव विधिरूपस्य भेदाभावेऽन्यस्याभावात्। न च तत्रापि क-

सर्वत्र वक्तुं शक्यत्वेनानुमानकथोच्छेदप्रसङ्गाच्च वक्ष्यमाणविधया प्रतियोग्याद्यनिरूपणेनान्योन्याभावस्याद्याप्यसिद्धत्वाच्चेति भावः । द्वितीयं शङ्कते * तादात्म्यमिति * तदपि घटादिस्वरूपमेव तदतिरिक्तं वा, नाद्यः प्रागुक्तदोषानपायादित्यभिप्रेत्य द्वितीयं निराकरोति *नतावदिति*तत्र प्रमाणाभावं हेतुमाह*तत्रेति * घटातिरिक्ततादात्म्ये घट इत्यनुभव एव मानं घटादयमभिन्न इत्यनुभवो वा, नाद्य इत्युक्त्वा द्वितीयमपवदति*नापीति*घटतादात्म्यं किं तद्भेदाभावादतिरिक्तं स एव वा, आद्येऽभिन्न इति बुद्धेर्भेदाभावगोचराया न तादात्म्यसाधकतेत्याह * तस्या इति * द्वितीयं शङ्कते * स एवेति * तत्र किं भेदाभाव एव तादात्म्यमुत भावस्वभावमपि, आद्ये भेदस्याप्यभेदाभावमात्रस्वभावतयोभयज्ञानस्याप्यन्योन्यज्ञानाधीनतापत्तावेकोपि न सिद्ध्येत् परैर्भावाभावयोः परस्परविरहात्मत्वस्यानभ्युपेतत्वाच्चेत्याशयेनाह * तर्हीति * उक्तदोषं परिहरन् द्वितीयपक्षमाशङ्क्य निराकरोति * न च घटाभावेत्यादिना * अभेदस्य भावस्वभावत्वे बाधकाभावात्सोऽप्युपेय इति कथं तदभाव इत्याशङ्क्य तत्साधकस्याप्यभावान्नैवमित्याह * न च तत्रापीत्यादिना * पृथक्

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्चिद्धर्मोऽस्त्विति वाच्यम् । अभिन्न इति बुद्ध्या भेदविरहविषयया(१) तदसिद्धेः तदन्यस्य तद्विषयज्ञानस्यादर्शनाच्च । न च घटबुद्धे(२)रेव तादात्म्यमपि बाधकाभावाद्विषयोऽस्त्विति वाच्यम्। घटत्वस्मृतिजन्यघटज्ञाने तस्य प्रकारतयाभानायोगात् औपाधिकधर्मस्य निर्विकल्पकायोगात् घटत्वस्मरणजन्यघटज्ञानसमानाकारज्ञानस्य त-

घटतादात्म्यज्ञानादर्शनेपि तस्य घटज्ञान एव प्रकारतया सिद्धिरित्याशङ्क्याह * न च घट इति * किं सर्वस्मिन् घटसविकल्पके स प्रकार उत क्वचिदेव स्वविषयनिर्विकल्पजन्ये नाद्य इत्याह * घटत्वेति * भानायोगादिति * तस्य प्रागनुपस्थिततया प्रकारत्वायोगादित्यर्थः । द्वितीये घटे पृथुबुध्नोदराकारवत्तत्किं सखण्डं तादात्म्यमखण्डं वा आद्ये आह * औपाधिकेति * उपाधिर्निरूपकस्तद्घटितस्वरूपस्य निर्विकल्पकायोगादित्यर्थः । निर्विकल्पकाविषयस्यापि सखण्डस्य सविकल्पकाविषयत्वं घटे विशेषणज्ञानस्य विशिष्टज्ञानाहेतुत्वादिति मन्वानं प्रति तद्विशिष्टज्ञानमेवायुक्तमित्याह*घटत्वस्मरणेति*न च घटत्वस्मरणजन्यघटज्ञानस्याप्यस्मिन्मते तादात्म्यप्रकारत्वसम्भवान्नोक्तदोष इति वाच्यम् । तथा सत्यतिप्रसङ्गात् कल्पकाभावेन निर्विकल्पकस्याप्यसिद्धिप्रसङ्गाच्चेति घटत्वस्मरणजन्यज्ञानं न तादात्म्यप्रकारकमिति भावः। तद्विषयनिर्विकल्पकं तदधीनतत्प्रकारकसविकल्पकान्तरं चाङ्गीकृत्यापि घटत्वमात्रस्मरणजन्यघटसविकल्पकाधीनभेदानुभवे घटतादात्म्याभावरूपभेदो न प्रकाशते तत्प्रतियोगिभूततादात्म्यस्योक्तघटज्ञानाविषयत्वेन प्रतियोगिज्ञानाभावात्। न चैतदेव ज्ञानं तादात्म्यनिर्विकल्पकजन्यमपीति वाच्यम् । निर्विकल्पस्मरणयोर्यौगपद्यायोगात् तयोः क्रमिकत्वे च प्रथमोपस्थितस्यैव सामग्रीबलाद्विशिष्टज्ञानं स्या-

(१) विषयतयेति खपु० पा० ।

(२) घट इति बुद्धेरिति खपु० पा० ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दन्यस्यापि तदधिकविषयत्वायोगात् घटत्वस्मरणजन्य-घटज्ञानाधीनभेदज्ञानस्य तदभावाविषयत्वप्रसङ्गाच्च। अत एव तादात्म्यमप्यखण्डः कश्चिद्धर्मो घटादिनिर्विकल्पक-विषय इति घटप्रत्यक्षे तदपि प्रकारतया प्रतीयत इति प्रत्युक्तम् । शाब्दघटज्ञानाद्भेदज्ञानाभावप्रसङ्गात् त-स्य घटशब्दादनुपस्थितेः जात्यतिरिक्ताखण्डधर्माभ्युप-गमे तेनैव सर्वव्यवहारोपपत्तौ जात्यभावप्रसङ्गाच्च । अ-नित्यस्याखण्डस्य रूपादावयोगात् घटान्यस्याखण्डधर्म-

दिति नोक्तप्रकारसम्भव इत्याशयेनाह * घटत्वस्मरणेति * तादा-त्म्यस्याखण्डधर्मत्वपक्षे दोषमाह*अत एवेति* उक्तदोषादेवेत्यर्थः । दोषान्तरमाह*शाब्देति* तस्य तादात्म्यस्य । घटादिपदस्य घटत्वा-दिजात्यालिङ्गितव्यक्तिमात्रबोधकत्वे नायं घट इत्यादिशब्दात् घटा-दिगततादात्म्याप्रतीतेस्तदभावात्मकभेदावगमो न स्यादित्यर्थः । किं च स्तम्भः कुम्भाद्भिन्न इत्यादिरूपेण प्रतीयमानभेदप्रतियोगितादात्म्यं सर्वकुम्भेष्वेकमनेकं वा, आद्ये पटादावप्येवमेव तत्तत्तादात्म्यस्यैक्य-प्रसङ्गेन तेनैव तत्तदनुगतव्यवहारोपपत्तौ प्रमाणाभावात्तदतिरिक्त-जात्यभ्युपगमः परेषां मुधा स्यादित्याह * जात्यतिरिक्तेति * द्वि-तीये प्रतिकार्य्यं भिन्नस्य तस्य कार्य्यात् प्राक्सत्त्वे मानाभावा त्तज्जन्यता वाच्या तथा च गुणादिषु जन्यधर्मानाश्रयेषु तादात्म्यायोगे-न तद्भेदो न स्यात् तादात्म्यकार्य्यानवस्था च दुर्वारा स्यादित्यभि-प्रेत्याह * अनित्यस्येति*प्रस्तावाभिप्रायेणाखण्डस्येत्युक्तम् । किं च घटतादात्म्यान्योन्याभावः किं घटभेदस्तदत्यन्ताभावो वा, आद्ये तस्य घटेपि सत्त्वात् घटोपि स्वस्माद्भिन्नः, स्यात् द्वितीये घटान्यतादात्म्यात्य-न्ताभावो घटभेदो न स्यात् तदन्यप्रतियोगिकत्वात् पटत्वाभाववत् न स्याच्च काप्यत्यन्ताभावातिरिक्तोऽन्योन्याभाव इत्याशयेनाह * घ-टान्यस्येति * समानतयेत्यत्र घटभिन्नत्वं समानता । विभागादिवदे-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्य घटत्वादिसमानतया तादात्म्यात्यन्ताभावस्य घटाद्यप्रतियोगितया तद्भेदत्वानुपपत्तेश्च न ह्यन्याभावोऽन्यप्रतियोगिकः। एतेन घटत्वात्यन्ताभाव एव भेद इति निरस्तम्। तस्यैव स्वाभावानधिकरणघटभेदानाधारत्वेन घटत्वाधारत्वप्रसङ्गाच्च अभावस्येव भावस्यापि विरुद्धत्वेन स्वाभावानधिकरणत्वात्। न च विरुद्धयोरैकाधिकरण्यमेव विरुद्धं न त्वाधाराधेयत्वमिति वाच्यम्।

कस्यानेकप्रतियोगिकत्वं किं न स्यादित्यत आह * न हीति * भिन्नाकारानेकप्रतियोगिकत्वमेकस्याभावस्य न युक्तं तादृशप्रतियोगिभेदे परैरभावभेदस्वीकारादित्यर्थः। घटत्वमेव घटतादात्म्यं तदत्यन्ताभाव एव स्तम्भादौ घटाद्भेद इति कस्य चित्कल्पनां निराकरोति * एतेनेति * अन्याभावं प्रत्यन्यस्य प्रतियोगित्वाद्ययोगेनेत्यर्थः। दोषान्तरमाह * तस्यैवेति * घटत्वात्यन्ताभावस्यैव घटभेदत्वे घटत्वं वक्ष्यमाणविधया स्वात्यन्ताभावासम्भवेन तस्य घटाद्भेदायोगादभेदः स्यादेवं घटत्वात्यन्ताभावस्यापि घटाद्भेदो न स्यात्तस्य स्ववृत्तित्वायोगादित्यपि द्रष्टव्यम्। अत्यन्ताभावस्य प्रतियोगिवृत्तित्वे बाधकाभावात् घटत्वस्य स्वाभावानधिकरणत्वमसिद्धमित्याशङ्क्याह * अभावस्येति * भावाभावयोः परस्परविरहात्मत्वेन विरुद्धत्वादभावस्य स्वाभावाश्रयत्ववद्भावस्यापि स्वाभावाश्रयत्वं विरुद्धत्वादयुक्तमित्यर्थः। ननु परस्परविरहात्मनोर्भावाभावयोरैकाधिकरण्यमेव विरुद्धं न त्वाधाराधेयभाव इत्याशङ्क्याह * न च विरुद्धयोरिति * अव्याप्यवृत्तिष्वभावसामानाधिकरण्यस्वीकारात् भावाभावयोस्तद्विरुद्धमिति परैर्न शक्यं वक्तुम्। न चावच्छेदभेदेन तदविरुद्धमिति वाच्यम्। लाघवेनैकाधिकरणकत्वस्यैव विरोधप्रयोजकत्वापत्तावच्छेदभेदस्याकिञ्चित्करत्वादणुसंयोगादावच्छेदकभेदस्यापि दुर्निरूपत्वाच्च तस्माद्भावाभावयोः परस्परात्मत्वायोग्यत्वं वा परस्पराश्रयत्वायोग्यत्वं वा विरोधोऽभ्युपेयः। किं चाभावस्य भावेन

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अभावे तदभावस्यापि क्लृप्तत्वात्। किं चाभावाधिकरण-त्वयोग्यस्य भूतलस्य घटाधारतादशायां तदभावा-नाधारत्वं तदनधिकरणत्वयोग्यघटाधारत्वप्रयुक्तमेव। न चैवं घटे घटो नास्तीति प्रतीतिर्न स्यादिति वाच्यम्।अभाव इव तद्बुद्धेराधारत्वांशेऽप्रमात्वात् घटबुद्धिविषये घट-त्वाधिकरणे तदभावविषयतयाऽभावान्तरविषयतया वा प्रतीत्युपपत्तेश्च भूतले घटो नास्तीति बुद्धिस्तु बाधका-

लाघवादभावत्वप्रयुक्ततदाश्रयत्वायोग्यत्वरूपविरोधस्य परमतेऽपि क्लृप्तत्वाद्भावस्यापि तदभावात्मनोऽभावाश्रयत्वायोग्यत्वमेव तेन विरोधोऽभ्युपेयः ततश्च नाभावाश्रयो भाव इत्यभिप्रेत्याह * अभाव इति * अपिरवधारणे सामानाधिकरण्यव्यावृत्त्यर्थः सिद्धान्तिम-तेन समुच्चये वा । इतोपि भावस्याभावाश्रयत्वयोग्यता नेत्याह * किं चेति * घटसंसर्गात्प्राक् भूतले स्वतो विद्यमानस्य तदभावस्य त-त्संसर्गदशायामपि नाशागमनयोरयोगात् तस्य स्वरूपेण सत्वेपि तदा तदनाधारत्वं घटसंसर्गोपाधिकमेवेति घटे स्वाभावानाधारत्वं स्वाभाविकमभ्युपेयं इतरथा तस्य तदुपाधिकत्वानुपपत्तेः रौपाधिक-स्यापि कर्णवलयावच्छिन्ननभोवलयवदर्थक्रियासमर्थत्वाद्घटवति तदभावप्रतीतेर्भ्रमत्वस्याप्युपपत्तिरिति भावः । अभावस्य प्रतियोग्य-वृत्तित्वे घटे घटो नेति प्रतीत्यनुपपत्तिरित्याशङ्क्य स्वस्य स्ववृत्तित्वा-योगात् यथा घटाभावे घटो नेति प्रतीतेराधाराधेयभावांशे भ्रमत्व-मेवमुक्तबाधकेन घटे स्वाभावाधारत्वायोगादनुभूयमानतद्रूपादिवृ-त्तिघटाभावाधारत्वस्य तत्तादात्म्यापन्नघटांशसंसर्गमात्रप्रतीतेर्भ्रम-त्वमित्यभिप्रेत्याह * न चैवं घट इति * तत्प्रमात्वमङ्गीकृत्याप्याह * घटबुद्धीति * अत्र हि घट इति धीगोचरे तदभावो भासते तथा च यथा शुक्ले पटो नास्तीति शौक्ल्य एव शुक्लतन्तुवृत्तिपटाभावः प्र-तीयते एवं घटधीगोचरे घटत्वे घटाभावविषयतया घटे घटो नेति बुद्धेः प्रमात्वोपपत्तिर्घटान्तराभावविषयतया वेत्यर्थः । तर्हि भूतले

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भावात् घटाभावविषया।नचैवं तत्र घटसत्वप्रसङ्गः, घटाभावानधिकरणाभाव इव तत्रापि तदभावाभावेपि तदनधिकरणत्वोपपत्तेः उभयाधिकरणत्वयोग्य एवान्यतराभावेऽन्यतरविधिनियमात् । अपि च घटत्वमिह नास्ति नायं घट इति प्रतीत्योरवैषम्यप्रसङ्गः। किं च घटत्वात्यन्ताभावः पटाधिकरणकोऽपि न पटधर्मिकघटतादात्म्य-

घटो नेत्यादिबुद्धेरपि भूतलादौ घटाभावविषयत्वोपपत्तेर्भूतलादौ घटाभावो न स्यादित्याशङ्क्याह * भूतल इति * घटस्य घटाभावाधिकरणत्वे घटाधिकरणत्वं स्यादभावानाधिकरणस्य प्रतियोग्यधिकरणत्वनियमादित्याशङ्क्य घटाभाव एव व्यभिचारान्नैवमित्याह * न चैवमित्यादिना *न च घटाभावेपि घटाभावोऽस्तीति वाच्यम् । घटाभावान्तराभावात् आधाराधेयभावस्य भेदापेक्षत्वेन स्वस्य स्वावृत्तित्वायोगाच्च प्रमेयत्वादावपि स्ववृत्तित्वासम्प्रतिपत्तेरिति भावः। ननु नित्यत्वानित्यत्वादौ भावाभावयोरन्यतरनिषेधेऽन्यतरविधेरन्तरीयकत्वनियमदर्शनात् घटादेः कथमुभयानाश्रयत्वमित्याशङ्क्याह त्यत्व एव स्वस्वाभावयोरुभयोरप्यभावादुभयोरन्यतराधिकरणत्वयोग्य एवायं नियम इत्याह * उभयेति * अभावस्य प्रतियोग्यात्मत्वं सुरेश्वराचार्यैरप्युक्तं 'घटाभावो विरोधित्वान्न घटेऽर्थान्तरो न। अषष्ठ्यर्थतया तस्माद्विकल्पोऽयं न वस्तुग ' इति । एवं घटत्वात्यन्ताभावस्य घटभेदरूपत्वे घटत्वे तदसम्भवेन तस्य घटाद्भेदो नस्यादित्युक्तं सम्प्रति घटभेदघटत्वात्यन्ताभावयोरेकत्वे विषयभेदाभावात्तज्ज्ञानयोराकारभेदो न स्यादित्याह * अपि चेति*किं च घटत्वात्यन्ताभावः पटे वर्त्तमानोपि किं पटधर्मिकघटाभेदविरोधित्वात्तद्भेद इत्युच्यते उत घटधर्मिकतदभेदविरोधित्वान्नाद्यः पटे घटाभेदे सत्यपि वक्ष्यमाणविधया घटत्वाभावसम्भवेन तदविरोधित्वादित्याह * किं च घटत्वेति * तस्य पटस्य, तद्भेदः घटाद्भेदः । द्वितीये घटधर्मिकपटाभेदविरोधित्वेपि पटधर्मिकघटाभेदविरोधित्वाभावात्

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विरोधीति कथं तस्य तद्भेदः स्यात् तदुभयनिरूपिताभेदविरोधिन एव तद्भेदत्वात् तदभेदश्च तर्कितः परमतेऽतो वृक्षस्याग्रत्वाभाव इव तदधिकरणाभेदेपि घटत्वाभावोऽ(१)नुपपन्नइति न स भेदस्तर्किताभेदविरोधी, तादृशभेदाभावश्रुत्योरेव(२)घटत्वपटत्वाधिकरणाभेदे प्रमाणत्वात् तस्मान्न कथमपि भेदः सिद्ध्यति । ननु घटत्वविशिष्टप्रतियोगिक एवान्योन्याभावः।न चैवं विरोधात्तस्य न प्रतियोगिसा-

तस्य तद्भेदत्वमित्यभिप्रेत्य पटस्य घटभेदस्वरूपमाह* तदुभयेति * परमते घटपटनिरूपिताभेदस्य काप्यभावात्कथं तद्विरोधिता भेदस्येत्यत आह * तदभेदश्चेति * तदुभयनिरूपिताभेदसम्भावनामात्रेण तद्विरोधी तद्भेद इत्यर्थः। एवं सति फलितमाह * अत इति * मूलावच्छेदेन वृक्षेऽग्रत्वात्यन्ताभावसत्वेन तत्राग्रत्वावच्छिन्नधर्मिप्रतियोगिकाभेदाभावेपि तस्य वृक्षमात्रप्रतियोगिकाभेदाविरोधित्ववत् घटत्वात्यन्ताभावस्य पटे घटत्वावच्छिन्नधर्मिप्रतियोगिकाभेदविरोधिनोपि तदधिकरणद्रव्यमात्राभेदविरोधित्वायोगात्स न तद्भेद इत्यर्थः । ननु मूलत्वाग्रत्वयोः प्रत्यभिज्ञया वृक्षैकत्वावगमात् मूलेऽग्रत्वाभावो न तदभेदविरोधी घटत्वपटत्वाधिकरणाभेदे तु न किं चिन्मानमिति कथं घटत्वाभावाधिकरणपटे तदधिकरणाभेदसम्भव इत्याशङ्क्योक्तविधया तद्भेदस्य दुर्निरूपत्वादेकमेवाद्वितीयं नेहनानाऽस्ति किं च न नात्र का चन भिदाऽस्ती त्यादिश्रुतेश्च वास्तवभेदाभावरूपाभेदावगमात्सर्वधर्माधिष्ठानैक्यं सम्भाव्यत इत्याह * तादृशेति * एवं प्रतियोग्यनिरूपणात् न वास्तवभेदसिद्धिरित्युपसंहरति * तस्मादिति * अत्यन्ताभावप्रतियोगिन एवान्योन्याभावप्रतियोगित्वमिति पक्षं निरस्तमप्युक्तदोषपरिहारेणोज्जीवयन् पुनरुत्थापयति * नन्वित्यादिना * तर्ह्यत्यन्ताभाववदेव प्रतियोगिना सहैकदे-

(१ श्रुतेरेवेति खपु० पा० (२) भावोप्युपेति खपु० पा०

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मानाधिकरण्यमिति वाच्यम् । अन्योन्याभावस्य प्रतियोग्यविरोधात्।न च प्रतियोगितदवच्छेदकभेदाभावेन तस्यात्यन्ताभावादभेद इति वाच्यम् । प्रागभावादिवत्तदुपपत्तेः, अन्यथा भूतलं घटो न, भूतले घटो नेति प्रतीत्योर्वैलक्षण्यायोगादिति चेत् न। भूतलं घटो नेति प्रतीत्या हि भूतलस्य तदभेदविरोधी नञर्थो विषयीक्रियते स चाभेदो यदि घटत्वविशिष्टो घट एव तर्हि तद्विरुद्ध एव स

कत्र भेदस्य स्थितिर्न स्यादित्युक्तं परिहरति * नचैवमिति * प्रतियोग्यविरोधादिति * घटाधिकरणेपि भूतले भूतलं घटो नेति घटान्योन्याभावानुभवात् प्रमाणसिद्धे विरोधाभावादिति भावः। अभावभेदस्य प्रतियोगितदवच्छेदकान्यतरभेदनियतत्वेन तदभावे कथमन्योन्याभावस्यात्यन्ताभावाद्भेदस्तदभावे वा कथमुक्ताविरोध इत्याशङ्क्य प्रागभावप्रध्वंसाभावात्यन्ताभावानामेकप्रतियोगिकानामपि परस्परं भेददर्शनान्नोक्तनियम इत्याह * न च प्रतियोगीत्यादिना* प्रागभावादावपि प्रतियोगितावच्छेदकस्य कालविशेषादेर्भेदोऽस्त्येव प्रकृते सोऽपि नास्तीति कथं भेद इत्याशङ्क्याभावभेदाभावे कदाचिदिदमिदं न कदाचिदिदमिह नेति विलक्षणप्रतीतिद्वयायोगात् प्रतियोग्यादिभेदाभावेऽप्यभावभेदोऽभ्युपेयोऽनिच्छद्भिरपीत्याह * अन्यथेति * भेदस्य प्रतियोग्यविरोधित्वं तावदयुक्तमिति द्योतयति * नेति * अन्योन्याभावरूपो भेदः किमभेदविरोधी उत न, उभयथाऽपि भूतले घटो नेति प्रतीतौ किं विरोधो भासते न वा न विरोधं तद्भानं च स्वीकरोति * भूतलं घट इति * तत्र किं भेदविरोध्यभेदः प्रतियोगिभूतो घट एव तदतिरिक्तो वा, तत्राद्ये भेदप्रतियोगिनोर्विरोधात् सामानाधिकरण्यं न स्यादित्याह * स चाभेद इत्यादिना * भेदस्याविरोधित्वपक्षे विरोधभानाभ्युपगमे दोषमाह * अविरोध इति * तथा च भेदप्रतीतेरप्रमाणत्वात् तन्निर्वाहाय विषयभेदो न कल्प्य इति भावः। विरोधो न भासते इति पक्षमनु

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वक्तव्य इति कथं तस्य प्रतियोगिसामानाधिकरण्यम-विरोधे च विरोधप्रतीतिर्बाधिता स्यात् । विरोधो न प्रतीयते इति चेत्तर्हि स भेदोऽस्माभिरनिराकार्यः अभेदप्रमाऽविरोधिनोऽप्रतिकूलत्वात् । यत्तु सत्यं भेदाभेदयोर्विरोधः परस्परविरहरूपत्वात् घटस्तु प्रतियोग्यपि न तद्विरहः प्रतियोगित्वं च स्वरूपसम्बन्धविशेष इति तन्न। घटस्वरूपातिरिक्तस्याभेदस्य तद्विरहरूपस्याभावात् घटस्य स्वाधिकरणकभेदेऽपि प्रतियोगित्वप्रसङ्गाच्च।

वदति * विरोध इति * विरोधप्रतीत्यभावे भेदस्याभेदविरोधित्वासिद्धेः श्रुत्यादिप्रतिपन्नाद्वैते बाधकाभावादस्मदिष्टसिद्धिरित्याह * भेदोऽस्माभिरिति * अविरोधिन इति छेदः । भेदविरोध्यभेदः प्रतियोग्यतिरिक्त इति पक्षमनुवदति * यत्तु सत्यमिति * अभेदवद्घटस्यापि भेदप्रतियोगित्वात्तद्विरहात्मत्वं ततश्च सोऽपि तद्विरोधीति कथं तयोः सामानाधिकरण्यमित्याशङ्क्याह * घटस्त्विति * अभेदस्यैव भेदविरहात्मना प्रतीतेस्तदन्यघटो न तद्विरहात्माऽतो न तद्विरोधीत्यर्थः।ननु घटस्य भेदप्रतियोगित्वं तद्विरहात्मत्वमेवातः कथं तत्र तदभाव इत्याशङ्क्य न तत्प्रतियोगित्वं तद्विरहात्मत्वं अधर्मादिप्रतियोगिधर्मादौ तददर्शनात्किं तु तन्निरूपकस्वरूपविशेषः ततश्च भेदप्रतियोगिनोऽपि घटस्य न तद्विरहात्मत्वमित्याह * प्रतियोगित्वं चेति * निराकरोति * तन्नेति * घटातिरिक्ततदभेदस्य भावरूपस्य अभावरूपस्य च प्रागेव निरस्तत्वात्तस्य भेदविरहात्मत्वं दूरापेतमेव भेदस्याभावत्वेन तत्प्रतियोगिनस्तद्विरहात्मत्वं च दुर्वारमत्यन्ताभावादिप्रयोगिषु तन्नियमदर्शनादिति भावः।किं च घटस्वरूपविशेषस्यैव भेदप्रतियोगित्वरूपत्वे तत्स्वरूपस्य पटादिप्रतियोगिकस्वनिष्ठभेदं प्रत्यप्यविशेषाद्घटस्य तत्प्रतियोगित्वमपि स्यात्तथा च घटः स्वस्मादपि भिन्नः स्यादित्याह * घटस्येति * एवं तावदन्योन्याभावस्य भेदत्वे

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यदपि न भावाभावयोः स्वरूपेण विरोधः अपित्वारोप्य-सम्बन्धपुरस्कारेणान्योन्याभावे वा(१)भेदसम्बन्ध एवारोप्य इति तदपि न। प्रतियोगिस्वरूपातिरिक्ताभेदस्यासम्भवात् तस्य चासंसर्गत्वात्।न च घटत्वमभेदः तद्भिन्नस्य तदात्मत्त्वानुपपत्तेः तस्य संसर्गत्वे प्रमाणाभावाच्च, भूतलं

तस्य प्रतियोगिना सह विरोधापत्त्या तत्सामानाधिकरण्यं न स्यादित्युक्तम्। सम्प्रति विरोधमङ्गीकृत्य सामानाधिकरण्योपपत्तिं शङ्कते * यदपीत्यादिना * अत्यन्ताभावेनापि प्रतियोगिनो न स्वरूपेण विरोधः सर्वत्र तदभावप्रसङ्गात् किं त्वभावाधिकरणे समारोपितसंयोगादिसम्बन्धवत्त्वेनैव तस्य तेन सह विरोध इति तत्सम्बन्धस्य साक्षात्तेन विरोधस्तत्पुरस्कारेण प्रतियोगिनः स इति वक्तव्यं एवमन्योन्याभावेनापि तत्प्रतियोगिनः समारोपिततदधिकरणाभेदसम्बन्ध एव साक्षाद्विरुध्यते प्रतियोगी तु तत्पुरस्कारेण तदभिन्नत्वाकारेणैव विरुध्यत इति सम्बन्धान्तरेण भेदतत्प्रतियोगिनोः सामानाधिकरण्योपपत्तिरित्यर्थः। निराकरोति*तदपीति * कोऽयं प्रतियोग्यभेदसम्बन्धो योऽन्योन्याभावाधिकरणे समारोप्यः सन् तेन विरुध्यते स किं घटादिस्वरूपमेव तद्विरिक्तो वा कश्चिद्धर्मः घटत्वादिर्वा, न मध्यमः तस्य निरस्तत्वादित्यभिप्रेत्याह * प्रतियोगीति * आद्ये प्रतियोगिस्वरूपस्य तत्सम्बन्धत्वाभावादारोप्यसम्बन्धपुरस्कारेण विरोध इत्येतदयुक्तं स्यादित्याह * तस्य चेति * तृतीयं निराकरोति * न च घटत्वमिति * घटभिन्नस्य घटत्वस्य पटादिवत्तदभेदत्वानुपपत्तेरित्यर्थः। घटत्वस्यापि घटसम्बन्धरूपत्वाभावात् प्रथमकल्पोक्तदोषोऽपि तुल्य इत्यभिप्रेत्याह * तस्येति * ननु भूतलं घट इति भूतले घटत्वमारोप्य नेति तत्त्वेन घटनिषेधात् तस्य संसर्गरूपत्वमित्याशङ्क्य सोयमितिवद्भूतलं घट इति सामानाधिकरण्यस्य सत्त्वेनाभेदस्यैवारोप्यमाणत्वात्तत्र तत्तादिवत् घटत्वस्यापि विशेष्य

(१) अन्योन्याभावेनाभेदेति खपु० पा०।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

घट इत्यारोपे सत्यपि तस्य तत्प्रकारतयाऽसंसर्गत्वात् । किं चैवं भूतलं घटो नेति धियः समवायसम्बन्धेनाभावो विषयोऽस्त्विति क्वान्योन्याभावः । न चान्योन्याभावस्य प्रतियोगितावच्छेदकेनैव समं विरोध इति वाच्यम् । अभावमर्यादातिलङ्घनेन तस्य नञर्थत्वायोगात् । न च विलक्षणप्रतीतिसिद्धस्य प्रसिद्धाभाववैलक्षण्यं न दोषायेति वाच्यम् । भूतलं घटो न भूतले घटो नेतिप्रती-

णतयैव भानान्न तत्संसर्गत्वमित्याह * भूतलमिति * अपि च मृत्घट इत्यादिसमानाधिकरणप्रत्ययानां परैः समवायरूपसंसर्गविषयत्वोपगमामाद्भूतलं घट इत्यपि भूतले समवायतया घटमारोप्य नेति तदत्यन्ताभावविषयतया निषेधप्रतीत्युपपत्तेर्न तद्विलक्षणान्योन्याभाव आक्रोशतोऽपि सिद्ध्येदित्याह * किं चैवमिति * अत्र कश्चिदभावान्तरस्यैव प्रतियोगिसादेश्यं विरुद्धं अन्योन्याभावस्य तु तत्प्रतियोगितावच्छेदकेनैव सह विरोधो न प्रतियोगिनेति जल्पति तन्निराकरोति * न चान्योन्याभावस्येति * हेतुमाह * अभावेति* अनेकाभावेषु नञ्पदप्रवृत्तिनिमित्ततयाऽनुगततत्प्रतियोगिविरोधिमात्रात्मकत्वस्यावश्यमाश्रयणीयत्वादितरथाऽन्योन्याभावस्य नञर्थत्वं न स्यादित्यर्थः । ननु भूतलं घटो नेति प्रतीतेर्भूतले घटो नेति प्रतीत्यपेक्षया विलक्षणत्वेनानुभवात्तद्विषयान्योन्याभावस्येतरविषयाभाववैलक्षण्यमवश्यमभ्युपेयं तच्च प्रतियोगितावच्छेदकविरोधित्वमेवेति न तस्य प्रतियोगिसादेश्यानुपपत्तिर्नापि नञर्थत्वानुपपत्तिरभावत्वस्यैव तत्प्रवृत्तिनिमित्तत्वादिति नेत्याह * न च विलक्षणेति * न तावत्प्रतियोगिविरोधिमात्रस्वभावत्वं विना जातिरूपमुपाधिरूपं वाऽभावत्वं शक्येणापि शक्यं वक्तुं यन्नञ्पदप्रवृत्तिनिमित्तं कल्पेतेत्यभिप्रेत्योक्तप्रतीत्योरपि नञर्थरूपाभावांशे न वैलक्षण्यं किं तु नञर्थेनाभावेन सह प्रतियोगितावच्छेदकतया भूतलं घटः भूतले घट इति प्रतिभासमानतादात्म्यतदितरसंसर्गांशे एव वैषम्यमनुभूयते इति न तद्बलात्त्वयुक्त-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्योर्नञर्थेन भूतलघटसम्बन्धवैरूप्येण विना नञर्थांशे कियतोपि वैलक्षण्यस्याभा (१) वात्तदपि तव न स्यात् उभयत्र भूतलस्य घटाभाववत्वप्रतीत्यभ्युपगमात् । न चान्योन्याभावत्त्वमत्र प्रतीयत इति वैलक्षण्यमिति वाच्यम् । इदमिदं नेति प्रतीतावभावेऽन्योन्याभावत्वविशिष्टस्याप्रतीते स्तस्य नञर्थत्वाभावादिदमिदं नेति प्रतीतिविषयस्यैतौ भिन्नावेतयोरभेदोनास्तीति विवेचनात् । न चात्राप्यन्योन्याभावत्वं प्रतीयत इति वाच्यम् । विभक्ताविति प्रतीतिवद्भिन्नाविति प्रतीतेरुभयाश्रितैकभेद-

वैलक्षण्यसिद्धिरित्याह*भूतलं घट इति * एवं प्रतियोगितावच्छेदकसंसर्गवैलक्षण्यादभावप्रतीतिवैलक्षण्यसम्भवमुक्त्वोभयत्रापि घटत्वं प्रतियोगितावच्छेदकतया भासते इति तव मते तदपि न स्यादिति वृद्धि गृध्रतो मूलस्यैवोन्मूलनन्यायापात इत्याह * तदपीति * ननूभयत्रापि प्रतियोगितावच्छेदकवैलक्षण्याभावेपि भूतलं घटो नेत्यत्र भूतलगताभावेन्योऽन्याभावत्वं प्रतीयते इतरत्र त्वत्यन्ताभावत्वमिति प्रतीतिवैषम्योपपत्तिरित्याशङ्क्योभयत्रापि नञर्थस्यैकप्रकारेण प्रतीतेरन्योन्याभावत्वस्य परमते पि नञर्थत्वानभ्युपगमादेवमित्याह * न चान्योन्याभावत्वमित्यादिना * इदमिदं नेति प्रतिपन्नभेदस्यैवैतौभिन्नावित्यादिरूपेण परं प्रत्युपदिश्यमानत्वादपि न पराभिमतः प्रतियोग्यनाश्रितान्योन्याभावस्तद्विषय इत्याह*इदमिदं नेतीति * नन्वेतौ भिन्नावित्यादेरपि परस्परप्रतियोगिकान्योन्याभावद्वयमेवार्थः किं न स्यादित्याशङ्क्य न, संयोगविभागादिवदुभयधर्मिप्रतियोगिकैकभेदस्य तथाऽनुभवादन्यथा विभागादावपि प्रतियोगिभेदाद्भेदापात इत्यभिप्रेत्याह*न चात्रापीत्यादिना*अभेदो नास्ती

(१) वैलक्षण्यस्यानि रूपणादिनि खपु० पा० ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विषयत्वेन त्वदभिमताविषयत्वात् एवमेतयोरभेदो नास्तीतिप्रतीतेरपि। किं च भेदप्रतीत्या विदारणरूपोऽभेदाभावो विषयीक्रियते न त्वदभिमतो घटाभावोऽतो नेदमिदमिति प्रतीतेस्तव मते वैलक्षण्यं न सिध्यति । यत्त्वन्योन्याभावत्वमखण्डोऽभाववृत्तिः कश्चिद्धर्मस्तत्प्रतीतिविषय इति तन्न।अखण्डोपाध्यङ्गीकारे बाधकस्योक्तत्वात् सादृश्यादेरप्यखण्डधर्मस्य प्रतीत्यनुसारेण पदार्थान्तर-

प्रतीतिरप्यविभागो नेति प्रतीतिवदेकविषयैवेत्याह * एवमिति * एवमिदमिदं नेत्यनुभूयमानाभावस्य घटादिप्रतियोगिकत्वमङ्गीकृत्य पराभिमतभेदो न तद्विषय इत्युक्तं इदानीं वस्तुतत्वं वदन् घटादिप्रतियोगिकत्वं तस्यायुक्तमित्याह * किं चेति * यथा देवदत्ताभेदभ्रमनिवृत्तये नायं देवदत्त इति तदभाव एव बोध्यते एवं भूतलं घटो नेत्यादावपि सामानाधिकरण्यावगताभेदस्यैव नञर्थाभावप्रतियोगितया प्रतीतेर्न घटादेस्तत्प्रतियोगितेत्यर्थः । एवं चेदमिदं न इदमिह नेति प्रतीत्योरस्मदुक्तरीत्या भिन्नप्रतियोगिकाभावविषयत्वे वैलक्षण्योपपत्तिर्न त्वदुक्तरीत्यैकप्रतियोगिकाभावविषयत्व इत्युपसंहरति * अत इति * इदमिदं नेत्यस्य निर्वाहाय तद्विषयान्योन्याभावेषु तत्त्वं नामाखण्डधर्मो गोत्वादिवदभ्युपेयते तद्विषयत्वमेवास्येदमिह नेति प्रत्ययाद्वैलक्षण्यमिति कस्य चित्कल्पनामनूद्य निराकरोति * यस्त्वित्यादिना * किमन्योन्याभावत्वं जातिरुपाधिर्वा, नाद्यः अपसिद्धान्तापातात् तस्य स्वाश्रयाभावेन समवायतादात्म्यासम्भवेन जातित्वायोगाच्च । द्वितीये तस्याखण्डधर्मत्वानुपपत्तिरितरथा गवादिष्वपि सास्नादिमत्वाद्युपाधीनामेवाखण्डधर्मत्वकल्पनयाऽनुगतव्यवहाराद्युपपत्तेरतिरिक्तजातिकल्पनाऽनर्थिका स्यादिति पूर्वमेव बाधकस्योक्तत्वादित्यभिप्रेत्याह * अखण्डेति * किं चान्योन्याभावत्ववदेवेदमनेन सदृशमिदं विसदृशमित्यनुगतधीविषयसादृश्यादिकमप्यखण्डधर्मः स्यात् तस्य च सर्वत्रानुभूयमानस्य कल्प-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्य प्रसङ्गाच्च क्लृप्तान्तर्भावे पदार्थान्तरकल्पनानुपपत्तिः प्रकृतेऽपि समाना, नेत्येकाकारप्रतीतेरभावत्वान्योन्याभावत्वधर्मद्वयवैशिष्ट्यविषयत्वेन तस्या अभावविशेषत्वे प्रमाणाभावाच्च, न हि तदभावत्वसाधकमिदमिदं नेति प्रतीतिव्यतिरिक्तं किं चिदस्ति, भेदान्योन्याभावशब्दयोः पर्यायत्वेन भेदबुद्धेरप्यखण्डविषयतया तदसाधकत्वात्। न च प्रतियोग्यधिकरणवृत्त्यभावत्त्वमन्योन्याभावत्त्वं तत्प्रतीतिविषय इति वाच्यम्। घटादिनिष्ठभूतलादिभेदबुद्धे-

द्रव्यादिपदार्थेष्वनन्तर्भावात् पदार्थान्तरता स्यात् सा च तवानिष्टेत्याह * साहश्यादेरिति * ननु न साहश्यादि पदार्थान्तरं गुणावयवकर्मसामान्यभूयस्त्वादेरेव सहशादिधीगोचरतया साहश्यादेरपि तन्मात्रत्वादित्याशङ्क्येदमिदं नेति धीगोचरस्याप्यभेदाभावत्वमात्रत्वोपपत्तेर्न तदतिरिक्ताखण्डधर्मसिद्धिरित्याह * क्लृप्तान्तर्भाव इति * किं च भूतलं घटो नेत्यनुभूयमानाभावे योऽन्योन्याभावत्वरूपो विशेषः स किं नेत्येकाकारप्रतीत्यैव सिद्ध्यति प्रतीत्यन्तरेण वा, नाद्यः नेत्याकारप्रतीतेरन्यत्राभावत्वमात्रगोचरत्वोपगमादत्र तदतिरिक्तगोचरत्वायोगादित्याह * नेत्येकाकारेति * द्वितीयं निराकरोति * न हीति * अस्माद्भेद इति प्रतीतिरेव भेदगतान्योन्याभावत्वरूपाखण्डधर्मविषया तत्साधिकेत्याशङ्क्येदमिदं नेति प्रतीयमानाभाववाचकान्योन्याभावपदपर्यायभेदपदार्थप्रतीतेरपि तन्मात्रविषयत्वेन त्वयोपेतत्वात्ततोऽपि न तदखण्डधर्मसिद्धिरित्याह * भेदेति * एवमन्योन्याभावत्वमखण्डधर्म इति मतं निरस्य सखण्डोपाधिविशेषरूपं तदिदमिदं नेति प्रतीयते इति मतं निराकरोति * न च प्रतियोगीति * घटप्रतियोगिकभूतलनिष्ठभेदे प्रतियोग्यधिकरणवृत्तित्वरूपविशेषानुभवेऽपि भूतलप्रतियोगिकघटनिष्ठभेदे तदननुभवात् घटो भूतलं नेत्यादिप्रतीतेर्घटे भूतलं नेति प्रतीतिवैषम्यं न स्यादित्यभिप्रेत्याह * घटादिनिष्ठेति * भूतलप्रतियोगिकघटनिष्ठभेदस्य वस्तुतो

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्तद्विषयत्वापातात् भूतलमात्मा न भवतीति बुद्धेस्त-
दयोगाच्च न ह्यात्मनस्तव मम वाधिकरणमस्ति। इदानी-
मात्मेति बुद्धेः कालोऽधिकरणमिति चेत्तर्हि तदत्यन्ता-
भावोपि तत्रास्त्येव। न च प्रतियोगिसमानाधिकरणाभा-
ववृत्त्यभावत्वव्याप्यधर्मोऽन्योन्याभावत्वमिति वाच्यम्।
तस्यैवाखण्डस्य निरस्तत्वात् इदमिदं नेति प्रतीतेरेव-
माकारत्वायोगाच्च तस्मिन्नभावत्वव्याप्तिग्राहकप्रमाणाभा-

भूतलाधिकरणतदवयवादिनिष्ठत्वाद्विशेष इत्याशङ्क्य तस्य घटो न भूतलमित्यत्राप्रतीयमानत्वेनैतद्वैषम्यप्रतीत्यनुपयोगित्वमित्यभिप्रेत्य दूषणान्तरमाह * भूतलमात्मेति * आत्मादेर्निरधिकरणत्वेन तदभावस्य वस्तुतोऽपि प्रतियोग्यधिकरणवृत्तित्वायोगेन भूतलादौ तादृशाभावाभावाद्भूतलमात्मा नेत्यादिबुद्धेर्भेदगोचरता न स्यादित्यर्थः। आत्मादेरपि कालाश्रितत्वप्रतीतेर्निरधिकरणत्वमसिद्धमिति शङ्कते * इदानीमिति * कालस्यात्माद्यधिकरणत्ववत्तदत्यन्ताभावाधिकरणत्वमप्यस्त्येव परैः कालस्य सर्वाधारत्वोपगमात् विश्वत्यन्ताभावस्य केवलान्वयित्वाभ्युपगमाच्च तथा च कालवृत्त्यत्यन्ताभावेऽपि गतत्वात् प्रतियोग्यधिकरणवृत्त्यभावत्वमन्योन्याभावत्वमित्येतदयुक्तमित्यभिप्रेत्याह * तर्हीति * प्रतियोगिसमानाधिकरणाभाववृत्तित्वे सत्यभावत्वव्याप्यधर्मोऽन्योन्याभावत्वमित्यन्येनोक्तमप्ययुक्तं उक्तविधयाऽत्यन्ताभावत्वस्यापि तथात्वात् साक्षादभावत्वव्याप्यत्वाविवक्षायां च संसर्गाभावत्वेऽतिव्याप्तेरित्यभिप्रेत्याह * न च प्रतियोगीति * किं चोक्तरूपोऽभावत्वव्याप्यधर्मोऽखण्ड उपाधिः सखण्डो वा, नाद्यः तदभ्युपगमे जातिविलोपापातस्योक्तत्वादित्याह * तस्यैवेति * द्वितीये मानाभावादेव तदसिद्धिः भेदप्रतीतेः प्रतियोगिसमानाधिकरणाभाववृत्तित्वाद्यनाकारत्वात्तदाकारप्रतीत्यन्तरादर्शनाच्चेत्यभिप्रेत्याह * इदमिदमिति * प्रतियोगिसमानाधिकरणाभाववृत्तिधर्मस्याभावत्वव्याप्यत्वं यदुक्तं तदपि मानाभावादयुक्तमि-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वाच्च नञर्थप्रतीतिमात्रस्य तदसाधकत्वात् । प्रतियोग्य-
वृत्त्यभावत्वमस्य ततो विशेष इति चेन्न। अत्यन्ताभावेपि
तस्योक्तत्वात्कालादिभेदे तदभावाच्च घटपटयोरभेदो ना-
स्तीत्येकस्यैवाभेदाभावलक्षणभेदस्योभयत्रानुभवाच्च तस्मा-
न्न कथमपि तव प्रतीतिवैलक्षण्यमुपपद्यते। एतेन घटा-

त्याह * तस्मिन्निति * इदमिदं नेति नञर्थोल्लेखिधिया तत्राभाव-
त्वमात्रं प्रतीयते न तु तेन सह व्याप्तिस्तद्बलात्कश्चित् प्रतीयते इति
न तत्सिद्धिरित्यर्थः। इदमिदं नेत्यनुभूयमानाभावस्य कदापि प्रति-
योगिवृत्तित्वाननुभवात् प्रतियोग्यवृत्त्यभावत्वमेवान्योन्याभावस्य
प्रतियोगिवृत्त्यत्यन्ताभावाद्विशेष इति तदनुभववैषम्योपपत्तिरिति
शङ्कते * प्रतियोगीति * इदमिदं नेत्यत्रापि नञर्थे प्रतियोग्यवृत्ति-
त्वविशेषस्य सतोऽप्यप्रतीतेस्तत्प्रयुक्तं प्रतीतिवैषम्यमयुक्तमिति दूषय-
ति * नेति * अत्यन्ताभावस्यापि प्रतियोगिविरुद्धस्वभावतया तद-
वृत्तित्वस्योपपादितत्वात्साधारणोयं ततोऽस्य वस्तुतोपि न विशेष
इत्याह * अत्यन्ताभावेपीति * किं च दिक्कालयोः सर्वाधारत्वात्त-
त्प्रतियोगिकभेदस्य प्रतियोग्यवृत्तित्वायोगेन तत्राव्याप्तिरित्याह *का-
लादीति * असम्भवमप्याह * घटपटयोरिति * धर्मिप्रतियोगित्वे-
नाभिमतयोर्घटपटयोरेकस्यैव भेदस्यानयोरभेदो नेत्यादिरूपेणानुभ-
वाल्लाघवाच्च विभागादिवदुभयत्राप्येकत्वात्तस्य पराभिमतप्रतियो-
ग्यवृत्तित्वमसम्भवीत्यर्थः । एवं परमतेऽन्योन्याभावत्वस्य दुर्निरूप-
त्वात्तद्विषयत्वप्रयुक्तमिदमिदं नेति प्रत्ययस्येदमिह नेति प्रत्ययाद्वैष-
म्यं परोक्तमयुक्तमित्युपसंहरति * तस्मादिति * ननु प्रतियोग्य-
धिकरणं प्रतीयमानाभावः कथं तद्व्यधिकरणाभावान्न विलक्षणः
कथं वा तत्प्रतीतिस्तत्प्रतीतेर्न विलक्षणेत्याशङ्क्य घटाधिकरणे तत्प्र-
योगिकाभावस्यासम्भवादेव तत्र तव तत्प्रमितिरेवानुपपन्ना कुतस्त-
द्बलाद्विलक्षणाभावादिसिद्धिः प्रतीतिमात्रं तु वक्ष्यमाणविधया घट-
भूतलाभेदाभावरूपानिर्वचनीयभेदविषयतयाऽस्मन्मते घटते इत्यभिप्रे
त्याह *एतेनेत्यादिना* किं च घटपटाद्यभाववैलक्षण्यं लाघवात् प्रति-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सूचीपत्रम् ।

गणपाठः	०	४	०
गोलप्रकाशः	२	८	०
गंगालहरी	०	१	०
गुरुसारणी	०	४	०
जातकतत्त्वम्	०	१२	०
तत्त्वदीप	०	१	०
तर्कसंग्रहः	०	१	६
दत्तकमीमांसा	०	८	०
धर्म्मशास्त्रसंग्रहः	०	१	६
धातुपाठः (शिला -)	०	२	०
धातुरूपावली	०	२	६
नैषध चरित नारायणी टीका टाइप	४	०	०
परिभाषापाठः	०	०	०
पाणिनीयशिक्षा भाष्यसहिता	०	२	०
प्रथम परीक्षा	०	२	०
प्रथमपुस्तक हिन्दी	०	१	०
प्रश्नभूषणम् (प्रश्न विचार का बहुत उत्तम ग्रन्थ)	०	४	०
बीजगणितम् (म० म० पं० सुधाकरकृतटिप्पणीसहित)	१	४	०
भट्टीकाव्य ५ सर्ग	०	६	०
मनोरमा शब्दरत्नसहिता (टाइप)	९	०	०
लघुकौमुदी टिप्पणीसहिता	०	४	०
लक्षणावली	०	२	०
लीलावती (म० म० पं० सुधाकरकृतटिप्पणीसहित)	१	०	०
वसिष्ठसिद्धान्तः	०	१	६
वार्तिकपाठः	०	४	०
विष्णुसहस्रनाम	०	१	०
शब्दरूपावली	०	१	६
शृङ्गार सप्तशती	१	८	०
समासचक्रम्	०	१	०
समासचन्द्रिका	०	१	०
सरस्वतीकण्ठाभरणम्	३	०	०
साङ्ख्यचन्द्रिका टिप्पणीसहिता	०	८	०
साङ्ख्यतत्त्वकौमुदी	०	६	०
सिद्धान्तकौमुदी	४	०	०
सिद्धान्तमुक्तावली दिनकरीटिप्पणीसहिता	३	०	०
उपसर्गवृत्ति	०	१	०

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विज्ञापनम् ।

—:०:—

बनारससंस्कृतसीरीज़नाम्नी वाराणसेयसंस्कृतपुस्तकावली ।

इयं पुस्तकावली खण्डशो मुद्रिता भवति । अस्यां संस्कृतभाषानिबद्धा बहवः प्राचीना दुर्लभा उत्तमोत्तमाः केचिदङ्गलभाषानुवादसहिताश्च ग्रन्था मुद्रिता भवन्ति । तांश्च ग्रन्थान् काशिकराजकीयसंस्कृतपाठशालीयपण्डिता अन्ये ऽपि विद्वांसः शोधयन्ति । यैर्ग्राहकमहाशयैरियं पुस्तकावली नियमेनाविच्छेदेन संग्राह्या तैस्तदेकैकस्य खण्डस्य ॥।) मूल्यं प्रापणव्ययश्च =) देयः । अन्यैर्महाशयैर्यैः कानिचित् खण्डानि संग्राह्याणि तैश्च प्रत्येकं खण्डानां १) मूल्यं प्रापणव्ययश्च =) देय इति ॥

तत्र मुद्रिता ग्रन्थाः ।

	रु०	आ०
सिद्धान्ततत्त्वविवेकः खण्डानि ५	५	०
अर्थसङ्ग्रहः अंग्रेजीभाषानुवादसहितः	१	०
तन्त्रवार्त्तिकम् खण्डानि १३	१३	०
कात्यायनमहर्षिप्रणीतं शुक्लयजुःप्रातिशाख्यम् सभाष्यं	६	०
सांख्यकारिका चन्द्रिकाटीकागौडपादभाष्यसहिता	१	०
वाक्यपदीयम् खण्डानि ३	३	०
रसगङ्गाधरः खण्डानि ९	९	०
परिभाषावृत्तिः खण्डे २	२	०
वैशेषिकदर्शनं किरणावलीटीकासंवलितप्रशस्तपादप्रणीतभाष्यसहितम् खण्डे २	२	०
शिक्षासङ्ग्रहः खण्डानि ५	५	०
नैष्कर्म्यसिद्धिः खण्डानि ३	३	०
महर्षिकात्यायनप्रणीतं शुक्लयजुस्सर्वानुक्रमसूत्रम् सभाष्यं	३	०
ऋग्वेदीयशौनकप्रातिशाख्यं सभाष्यम् खण्डानि ४	४	०
(बृहत्) वैयाकरणभूषणम् पदार्थदीपिकासहितम्	४	०
विवरणोपन्यासः सटीकवाक्यसुधासहितः खण्डे २	२	०
तत्त्वदीपनम् (पञ्चपादिकाविवरणस्य व्याख्यानम्)	८	०
वेदान्तदीपः (श्रीभगवद्रामानुजाचार्यविरचितः) खण्डानि ४	४	०
टुप्टीका खण्डानि ४	४	०
पातञ्जलदर्शनम्।श्रीरामानन्दयतिकृतमणिप्रभाऽऽख्यवृत्ति स०	१	०
व्याकरणमिताक्षरा।सर्वतन्त्रस्वतन्त्रश्रीमदन्नंभट्टप्रणीता ख०	३	३
रसमञ्जरी । व्यङ्ग्यार्थकौमुद्या प्रकाशेन च सहिता	२	०
भेदधिक्कारः व्याख्यासहितः	१	०
न्यायलीलावती (यन्त्रस्था)	०	०

व्रजभूषण दास और कम्पनी
चांदनीचौक के उत्तर नई सड़कबनारस ।

Registered under Act XXV. of 1867. (All Rights Reserved.)

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

Registered under Act XXV. of 1867. (All Rights Reserved.)

BENARES SANSKRIT SERIES;

A

COLLECTION OF SANSKRIT WORKS

EDITED BY THE

PANDITS OF THE BENARES SANSKRIT COLLEGE,

UNDER THE SUPERINTENDENCE OF

R. T. H. GRIFFITH, M. A., C. I. E.

AND

G. THIBAUT, Ph. D.

No. 92.

भेदधिक्कारः

श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमन्नृसिंहाश्रममुनिप्रणीतः ।
तदीयशिष्यश्रीनारायणाश्रमविरचितभेदधिक्कार-
सत्क्रियाख्यव्याख्यासनाथः ।
श्रीमदप्पयदीक्षितकृत उपक्रमपराक्रमश्च ।
काशीस्थद्राविडोपाह्व पण्डितलक्ष्मणशास्त्रिणा विषमपदटिप्पणीपूर्वकं संशोधितः ।

BHEDADHIKKÂRA

BY

SREE NRISIMHASRAMAMUNI,

With a Commentary by the Author's Pupil

Sree Narayanasrama.

And Upakaramaparkrama,

By Appayyadikshita.

EDITED AND ANNOTATED BY

PANDIT LAKSHMANA SASTRÎ DRÂVIDÂ,

PROFESSOR OF VEDÂNTA, CENTRAL HINDU COLLEGE, BENARES.

Fasciculus II.

BENARES.

Published by the Proprietors Messrs. Braj B. Das & Co.,

AND SOLD BY H. D. GUPTA

Secretary, Chowkhamba Sanskrit Book Depot.

Printed at the Vidyâ vilâs Press & Tara Printing Works,

BENARES.

1904

MUMUKSHU BHAWAN

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

धिकरणेपि भूतले भूतलं घटो नेति प्रतीतेर्विलक्षणा-
भाव इति प्रत्युक्तम् । एतस्या एव त्वन्मते घटाभाववद्
भूतलमित्याकारतयाऽघटं भूतलमिति प्रतीतिवत्तत्रानुद-
यप्रसङ्गात् । प्रतियोगिवैलक्षण्यं विनाऽभावबुद्धेर्वैलक्षण्या-
योगात् । ससम्बन्धिकपदार्थस्य सम्बन्धिभेदाभावे तदयो-
गात् । अत्यन्ताभावातिरिक्तप्रागभावादि(१)रप्यन्योन्या-
भावतुल्य एव । यत्त्वारोपवैचित्र्यात्तज्जन्याभावधीवैचित्र्य-
मिति तन्न । प्रमेयभेदं विना प्रत्यक्षानुमानादिजन्याभाव-

योगिवैलक्षण्यस्यैव प्रयोजकत्वेन क्लृप्तत्वादेकप्रतियोगिकत्वेऽन्योन्या-
भावात्यन्ताभावयोस्तदभावेन वैलक्षण्यासम्भवात् तद्बुद्धिवैलक्षण्यं
तत्र दुर्लभमित्याह *प्रतियोगीति* किं च सम्बन्धिनिरूप्यस्वभावानां
समानकालीनानां संयोगादीनां भेदः सम्बन्धिभेदेन नियत इति समा-
नकालीनान्योन्याभावात्यन्ताभावयोरेकप्रतियोगिकत्वे व्यापकप्रतियो-
गिभेदाभावाद्व्याप्यभेदो न स्यादित्याह *ससम्बन्धिकेति*अभावभेदे
प्रतियोगिभेदः प्रयोजक इत्यस्य पराभिमतप्रागभावध्वंसयोर्व्यभिचा-
रमाशङ्क्य प्रागुत्तरकालीनानिर्वचनीयसूक्ष्मरूपातिरेकेण प्रागभावादे-
रनिरूपणेन पक्षतुल्यत्वान्न व्यभिचार इत्याह * अत्यन्ताभावेति *
एवमिदमिदं नेदमिह नेति प्रतीत्योर्विषयवैलक्षण्याद्वैलक्षण्यमिति
मतं निरस्य कारणवैलक्षण्याद्वैलक्षण्यमिति मतमनूद्य निराकरोति
यत्त्वित्यादिना इदमिह नेति ज्ञानेऽभावाधिकरणे प्रतियोगिसंस-
र्गारोपः कारणमिदमिदं नेति ज्ञाने तु तत्र प्रतियोगितावच्छेदकारोपः
कारणमिति पराभ्युपगमानुरोधेन कारणवैलक्षण्यात्कार्य्यज्ञानवैलक्ष-
ण्यमात्रसिद्धावपि नैतावता तद्विषयाभावभेदसिद्धिः परमते प्रत्यक्षा-
नुमानजनितैकाभावधीवैलक्षण्येपि तद्विषयभेदाभावादित्यर्थः । *वै-
लक्षण्यायोगादिति* विषयभेदसाधकवैलक्षण्याभावादित्यर्थः । विलक्ष-
णारोपजन्यत्वेन ज्ञानवैचित्र्यमङ्गीकृत्य तैरेवताऽभावभेदसिद्धिरित्यु-

(१) दिरपीति खपु० नास्ति ।

MUMUKSHU BHAWAN
मुमुक्षु भवन, काशी
CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

धीव(१)द्वैलक्षण्यायोगात् स्वतोऽभाववैचित्र्यं विना तस्य तज्जन्यत्वज्ञानासम्भवाच्च, अभावधीपूर्वं प्रतियोगिज्ञानादिघटिताभावधीसामग्र्यां सत्यामारोपसद्भावे प्रमाणाभावाच्च, प्रमेयवैलक्षण्यादृतेऽभावधीवैलक्षण्यासम्भवेन ततस्तदसिद्धेः दोषाभावेनारोपासंभवाच्च जन्यारोपमात्रे दोषस्य

कं सम्प्रति विलक्षणाभावविषयत्वरूपज्ञानवैलक्षण्यग्रहं विना तयोर्व्यवस्थया विलक्षणारोपजन्यस्यैव दुर्ग्रहत्वात्तत एव विलक्षणाभावविषयत्वसाधने परस्पराश्रयापत्तेर्नैकमपि सिद्ध्येदित्यभिप्रेत्याह * स्वत इति * किं च किमन्वयव्यतिरेकाभ्यामुक्तारोपद्वयस्य ज्ञानद्वये व्यवस्थया कारणत्वमवसीयते उत ज्ञानद्वयवैलक्षण्यानुपपत्त्या, नाद्यः अधिकरणग्रहणप्रतियोगिस्मरणतदनुपलम्भादिनैव तदुपपत्तौ तदन्वयादेरसिद्धेरित्याह * अभावधीति * द्वितीयं निराकरोति * प्रमेयेति * भूतलं घटाभाववद्भूतले घटाभाव इति ज्ञानद्वयवद्भूतलं घटो न भूतले घटो नेत्यनयोरपि नञर्थाभावस्य विशेषणविशेष्यभावव्यत्ययं विना प्रमेयभेदानुपलम्भात् विलक्षणप्र(२)मेयकत्वलक्षणवैलक्षण्यस्यासिद्धेः विशेषणाभावादिप्रयुक्तवैलक्षण्यमात्रस्योक्तारोपभेदानपेक्षत्वादितरथा भूतले घटाभाव इत्यादावपि तत्प्रसङ्गादन्यस्य तेन विना ऽनुपपद्यमानस्याभावाच्च तत्सिद्धिः।एतेन कदाचिदिदमिह न कदाचिदिदमिदं नेति प्रतीतिकादाचित्कत्वानुपपत्त्या तत्सिद्धिरिति निरस्तम्। भूतले घटाभाव इत्यादाविव तेन विनापि तदुपपत्तेः अन्यथा प्रतियोगितावच्छेदकारोपानन्तरं तदत्यन्ताभावतदाश्रयान्योन्याभावप्रतीतियौगपद्यप्रसङ्गस्य परमते दुष्परिहरत्वाद्बुद्धिपूर्वकारोपस्य तत्र तदभावग्रहपूर्वकत्वादारोपानवस्थापातादबुद्धिपूर्वकतदारोपस्य भेदग्रहहेतुत्वे रज(३)तभ्रमानन्तरमेव तद्भेदग्रहापातात दोषस्योभयत्रारोपमात्रहेतुत्वादिति भावः।एवमभावज्ञानात्प्रागारोप-

(१) धीव लक्षण्येति खपु० पा०। (२) प्रयोजकत्वेति खपु० पा०।
(३) रजतभेदानन्तरमिति खपु० पा०।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कारणत्वात् अन्यथा तदप्रामाण्यस्य परतस्त्वानुपपत्तेः । न चेच्छैवदोषः, धर्मिज्ञानसाध्येच्छाया आरोपात्प्रागसम्भवाद्धर्मिज्ञानस्य च तवा(१)रोपरूपस्येच्छासाध्यत्वात् अन्यवैशिष्ट्यज्ञानेच्छाया अन्यवैशिष्ट्यज्ञानाहेतुत्वात् । न च सामान्येन भूतले घटज्ञानमस्त्वितीच्छया आरोप इति वाच्यम् । उपस्थितदेशान्तरं विहायात्रैव तदारोपे तस्या

विशेषे मानाभावमुक्त्वा तदभावे मानमाह * दोषाभावेनेति * अभावाधिकरणस्य तत्प्रतियोग्यादिसादृश्यदूरस्थत्वादेरभावादनौपाधिकारोपस्य कारणाभावादसम्भव इत्यर्थः । आहार्यारोपे न दोषः कारणं तेन तदभावेपि तत्सम्भव इत्याशङ्क्याह * जन्येति * अज्ञानाद्यारोपरूपे साक्षिणि दोषस्याकारणत्वात् जन्येत्युक्तं लाघवाज्जन्यारोपमात्रे दोषजन्यत्वावधारणात्तदभावे तदनुपपत्तेः तदारोपात्प्राक् तत्र तदभावानिश्चये तस्याहार्य्यारोपत्वायोगाच्चेति भावः । दोषजन्यत्वाभावे बाधकमाह * अन्यथेति * अप्रमायाः प्रमाहेतुविजातीयहेतुजन्यत्वमेव ह्यप्रामाण्योत्पत्तौ परतस्त्वं तच्चारोपस्य दोषाजन्यत्वे न स्यादित्यर्थः । तर्ह्यभावाधिकरणे प्रतियोगिसंसर्गज्ञानगोचररागे एव दोषोस्त्वित्याशङ्क्य तस्यारोपज्ञानसाध्यत्वान्न तद्धेतुतेत्याह * न चेच्छैवेत्यादिना * आरोपात्प्रागप्यन्यत्रारोप्यसंसर्गानुभवात्तदिच्छयाऽन्यत्रारोपसम्भवमाशङ्क्य भिन्नविषययोस्तयोर्हेतुहेतुमद्भावायोगान्नैवमित्याह * अन्यवैशिष्ट्येति * ननु सामान्येन भूतलमात्रे घटसंसर्गज्ञानात्तदिच्छया पुरोदेशे समारोप इत्याशङ्क्याह * नचसामान्येनेति * भूतलसामान्ये घटसंसर्गगोचरज्ञानेच्छया पुरोदेश एव तदारोपे नियामकाभावात्सर्वत्रैव तदारोपः स्यादन्यथा कुत्रापि न स्यादित्यर्थः । अपि च भूतलं घटो नेति ज्ञानात्पूर्वं किं भूतले घटत्वसंसर्ग आरोप्यते उत घटसंसर्गः, नाद्यः घटप्रतियोगिकाभावज्ञानस्य प्रतियोग्यतिरिक्तारोपजन्यत्वासम्भवेन तद्वैयर्थ्यात् घटत्वमिह नेति प्रतीतिप्रसङ्गाच्च, न द्वितीयः भूतले घटसंसर्गस्य स-

(१) तदारोपेतिखपु० पा० ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अनिमित्तत्वात् । किं चाप्रतियोगिनो घटत्वस्यारोपो न हेतुर्घटवति च न घटस्यारोपः अप्रसिद्धिप्रकारत्वाभ्यां, घटत्वं च न संसर्ग इत्युक्तं इष्टसाधनत्वज्ञानं विनारोपेच्छाया अयोगाच्च । न चैवं क्वचिदप्याहार्य्यारोपो न स्यादिति वाच्यम् । मनो ब्रह्मेत्यादिशास्त्रानिमित्ततदभावस्येष्टत्वात्प्रतारकवाक्यादेरैच्छिकसंसर्गज्ञानं विनापि

त्वेन तदारोपायोगादित्याह * किं चाप्रतियोगिन इति * ननु भूतले घटत्वं न स्वातन्त्र्येणारोप्यते किं तु घटसंसर्गात्मनैव ततो नोक्तदोष इत्याशङ्क्य तस्य संसर्गत्वेनाननुभवात् प्रतियोगिज्ञानांशे प्रकारत्वेनानुभवाच्च न संसर्गरूपेणाप्यारोप इति प्रागुक्तं स्मारयति * अप्रसिद्धीति * धर्मिज्ञानसाध्येच्छाया इत्येतत् सिंहावलोकनन्यायेन प्रपञ्चयति * इष्टसाधनत्वेति * आरोपोत्पत्तेः प्राक् तस्यानुपस्थितत्वे न तद्गतेष्टसाधनत्वस्याप्यनुपस्थितेस्तदुपस्थित्यधीनेच्छाया एव प्रागसम्भवान्न तस्यास्तद्धेतुतेत्यर्थः । नन्वाहार्य्यारोपे तदिच्छाया अहेतुत्वेन दोषान्तरस्याप्यभावात् क्वापि स न स्यात् ततश्च प्रतीकोपासीनामपि असम्भवात्तद्विधीनामप्रामाण्यापात इत्याशङ्क्याह * नचैवमिति * प्रतीकोपास्तिगतेष्टसाधनत्वस्य श्रुत्यैव बोधितत्वात् तदधीनेच्छयाऽऽरोपोपपत्तेर्न तद्विधीनामप्रामाण्यं यत्र तु प्रत्यक्षातिरिक्तं तदुपस्थापकं नास्ति तत्रारोपोपपत्तेः प्राक् तदिष्टसाधनत्वाग्रहादिच्छाभावेनाहार्य्यारोपाभाव इष्ट इत्याह * मनो ब्रह्मेत्यादीति * नन्वेवं सति प्रतारकस्योत्प्रेक्षकस्य वा तत्तद्वाक्यार्थगोचराहार्य्यारोपाभावे तत्तद्वाक्यरचना न स्यादित्याशङ्क्याह * प्रतारकेति * शुकसुप्तादिप्रलापवदर्थज्ञानाभावेपि शब्दज्ञानादेव तद्वाक्यरचनोपपत्तिरित्यर्थः । वस्तुतस्तु प्रतारकादेः स्वेष्टपरकीयप्रवृत्त्यादिहेतुतया तर्कितमसत् संसर्गज्ञानं परस्मिन्नुत्पादयितुमिच्छया तदारोपपूर्वकं तद्बोधकवाक्यरचनोपपत्तिरित्यपिना सूचितम्। एवं भेदस्वरूपतत्प्रतियोगिदुर्निरूपतामुपपाद्यानवस्थापत्त्यापि तस्य दुरवस्थतां वक्तुमु

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सम्भवात् । किं चास्य प्रतियोगिनः स्वतो न भेदः स्वा-
वृत्तित्वादभेदस्यासम्बन्धत्वाद्भेदो ऽभेदो भिन्न इति प्र-
तीत्योरवैलक्षण्यापाताच्च, भेदधियापि तदभेदप्रतीतेः,
स्वस्यैव स्वं प्रति विशेषणविशेष्यत्वायोगाच्च, भेदान्तरं
चाधिकरणभेदमात्रादनुपपन्नं तथात्वे वाऽबाधाविनिगमा-

क्रमते * किं चेति * किमन्योन्याभावात्मको भेदो धर्मिप्रतियोगि-
भ्यामभिन्नो भिन्नो वा, नाद्यः असम्भवाद्वस्तुस्वरूपमात्रेऽभेदबुद्ध्यवि-
रोधिनि भेदपरिभाषाया अनिवार्यत्वाच्च । द्वितीयेऽस्य भेदस्य प्रति-
योगिनः सकाशाद्यो भेदः स किं धर्मिभूतभेदस्वरूपमेव ततो भिन्नो
वा, नाद्यः स्वस्य स्वेन सम्बन्धाभावेन धर्मधर्मिभावानुपपत्तेरित्याश-
येनाह *अस्य प्रतियोगिन इति* अभेदसम्बन्धाद्धर्मधर्मिभावसम्भव-
मपाशङ्क्याह * अभेदस्येति * वस्तुस्वरूपमात्रात्मकाभेदस्याविशि-
ष्टधीसाधारणत्वेन विशिष्टधीनियामकत्वायोगात् सम्बन्धत्वासम्भव
अन्यथा रूपी घट इतिवद्रूपरूपीत्यपि प्रत्ययापात इति भावः । किं चा-
स्मिन्पक्षे भेद इति प्रतीतेर्भेदो भिन्न इति प्रतीतेश्च स्वविषयभेदाभा-
वादनुभूयमानं वैलक्षण्यं न स्यादित्याह *भेद इति* भेदो भिन्न इति
प्रतीतावभेदसम्बन्धो भासते इतरत्र नेति वैषम्यमित्याशङ्क्य भेदस्व-
रूपभूताभेदस्य भेद इति प्रतीतावपि भासमानस्य कथमपि दुर्निरूप-
त्वान्नैवमित्याह *भेदधियेति* किं च गुणप्रधानभूतपदार्थभेदनियत-
त्वात् सर्वत्र विशेषणविशेष्यभावस्य घटभेदो घटाभिन्न इति च प्रती-
यमानो विशेषणविशेष्यभावो घटभेदद्वयाभावे न स्यादिति घटभे-
दे घटभेदान्तरं दुर्वारमित्याह * स्वस्यैवेति * अस्तु तर्हि घटादिवृ-
त्तिघटभेदे तद्भेदान्तरमित्याशङ्क्य प्रतियोगिभेदाभावाद्भेदद्वयमनुप-
पन्नम् । नचाधिकरणभेदमात्रेणाभावभेदः परेषां सम्मत उपपन्नो वे-
त्यभिप्रेत्याह * भेदान्तरं चेति * प्रतियोगिन एकत्वेप्यनुभवबला-
द्भेदे भेदान्तरमभ्युपेयत इत्याशङ्क्याह * तथात्वे वेति * अधिकर-
णभेदेनाभावभेदाभावेन घटभेदवृत्तितद्भेदस्य पटादिवृत्तित्वेपि बा-
धकाभावात् पटादौ घटभेदप्रतीतेस्तद्विषयत्ववारकाभावाच्च तत्र द्वि-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नाभ्यां पटेपि स स्यादित्येकत्रैकस्य भेदद्वयं स्यात्। एवं तृतीयेपि, अन्यथा द्वितीयस्य घटाद्भेदायोगात् प्रथमस्य च स्ववृत्तित्वानुपपत्तेः प्रमेयत्वादि च नैकमित्युक्तम्। न हि युगपत्स्वविशेषणं प्रति स्वयं विशेषणं स्वयं विशेष्यं च भवति अन्यथैतौ भिन्नाविति प्रतीत्ययोगात्।

तीयोपि भेदः स्यादित्यर्थः। ततः किं तत्राह * एवमिति * प्रथमभेदवृत्तिद्वितीयभेदवत् द्वितीयभेदवृत्तितृतीयभेदोपि पटादौ स्यादित्यर्थः। द्वितीयभेदे भेदान्तरमेव नेत्याशङ्क्याह * अन्यथेति * भेदायोगादित्यत्राभेदः स्यादिति शेषः। ननु द्वितीयभेदस्तृतीयभेदाभावेपि घटभिन्न एव प्रथमभेदस्यैव स्वनिष्ठद्वितीयभेदवृत्तित्वेन तस्यापि घटभेदवत्वादित्याशङ्क्य तथासति भेदद्वयस्य परस्पराश्रयता स्यात्सा च विरुद्धत्वादनुपपन्नेत्याह *प्रथमस्येति* नचोत्पत्त्यादिप्रतिबन्धकत्वाभावान्नायं परस्पराश्रयो दोषायेति वाच्यम्। अस्यापि परस्पराधीनोत्पत्त्यादिवत् क्वाप्यदर्शनेन विपरीतदर्शनेन चासम्भावितत्वेनैव दोषत्वाद्भेदस्य सम्बन्धित्वेनैव विशेषणत्वेनैव विशेष्यत्वेनैव वा प्रतीतिनियमेन तत्प्रतीतौ तद्भेदप्रतीत्यपेक्षाया वक्ष्यमाणत्वेन ज्ञानप्रतिबन्धसम्भवाच्चेति भावः। प्रमेयत्वाभिधेयत्वादौ परस्पराश्रयत्वदर्शनाच्च तस्यासम्भाविततेत्याशङ्क्य प्रमाविषयत्वाद्यतिरिक्तप्रमेयत्वाद्यनिरूपणात्तस्य च स्वरूपसम्बन्धात्मनः परमतेपि नानात्वाद्यावत्प्रतीति तदभ्युपगमेऽनवस्थाभावाच्च न तत्र परस्पराश्रयतेत्यभिप्रेत्याह * * प्रमेयत्वादीति * किं च भेदद्वयस्य परस्पराश्रयत्वं द्वयोरपि युगपदन्योन्यं प्रति विशेषणत्वं विशेष्यत्वं च वक्तव्यमितरथा पटवृत्तिभेदनदृवृत्तिभेदौ घटाद्भिन्नाविति द्वयोरपि विशेषणविशेष्यभावेनैकप्रतीत्ययोगात् विशेषणत्वादि चैकस्यैकं प्रति युगपदन्यत्राहष्टत्वादसम्भवीत्याह * न हीत्यादिना * ननु युगपदेकस्यैकं प्रति विशेषणत्वं विशेष्यत्वं चान्यत्राहष्टमपि प्रकृते प्रतातिबलादेव स्वीकर्त्तव्यमित्याशङ्क्य तथा सति जीवब्रह्माभेदोपि श्रुतिसिद्धः स्वीकार्य इति सिद्धं नः समीहितं विरोधात्तदनभ्युपगमे च

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विरुद्धयोरप्यभेदे किमपराद्धं श्रौतेन, अयमप्यबाधाविनिगमाभ्यां प्रथमे, ततश्चतुर्थादिरपि सकलवृत्तिः स्यात्येकैकस्यानन्ताप्रामाणिकभेदः एवं तेषामप्यन्योन्यं तथा भेदात्।धर्मिप्रतियोगिनोरपि स्वरूपस्य च भेदबुद्धिविषयत्वे तत्प्रतीतिसमकालमत्यन्ताभावप्रतियोगिनि च क्लृप्तेन

भेदौ भिन्नावित्यत्र विशेषणभूतभेदोपि विशेष्याभ्यामन्यस्तृतीयोऽभ्युपेय इत्यभिप्रेत्याह * विरुद्धयोरिति * तृतीयभेदस्वीकारे तस्यापि प्रथमादिभेदवृत्तिता स्यादित्याह *अयमपीति* ततोपि किमित्याशङ्क्य तस्यापि पराद्धेदसिद्ध्यर्थं निरवधिकभेदोऽभ्युपेय इत्यनवस्थापातः स चाप्रामाणिकत्वान्न स्वीकर्त्तव्यः इतरथा सत्वादावपि सत्वादिधीदर्शनात् सत्वाद्यनवस्था दुष्परिहरा स्यादित्यभिप्रेत्याह * तत इति * एवं घटप्रतियोगिकानन्तभेदापत्तिमुक्त्वा भेदेष्वप्यन्योन्यप्रतियोगिकानन्तभेदापत्तिमाह * एवमिति * घटादिधर्मिप्रतियोगिनोरप्येकैकभेदप्रतियोगिकानन्तभेदापत्तिश्चेत्याह * तथेति * नन्वत एवोक्तानवस्थादिपरिहाराय पटादिवृत्तिघटभेदस्य स्वरूपमेव घटादिभ्यो भेदः स एव चा भेदोभिन्न इत्यादिबुद्धेर्विषयः एवं भेदात् भेदोपि घटादिरेवेत्याशङ्क्य तर्हि तद्वदेव पटादिस्वरूपस्य भिन्न इत्यादिधीविषयत्वसम्भवात् लाघवात् तत्स्वरूपमेव घटादिभेद इति प्रथमस्याप्यन्योन्याभावस्य विलोपापात इत्याशयेनाह * स्वरूपस्येति * भेदस्वरूपस्यैव भेदो घटो नेत्यादिभेदबुद्धिविषयत्वे पटादावपि स्वरूपालम्बनेनैव भेदधीरुपपद्यत इति तत्र कल्पितेनान्योन्याभावेन किमित्यन्वयः । नन्वन्योन्याभावस्वरूपस्यैव भेदधीगोचरत्वसिद्ध्युत्तरकालीनत्वादस्याः कल्पनायाः कथं तदपलाप इत्याशङ्क्याह * तत्प्रतीतिसमकालं क्लृप्तेनेति * घटाद्भिन्नः पट इति प्रतीतिकाले एव घटपटयोर्भेदाद्भेदानवगमे तं प्रति तयोर्विशेषणविशेष्यभावेन प्रतीत्ययोगात् तत्स्वरूपमेव तदा तद्भेदधीगोचरत्वेन क्लृप्तमिति स्वरूपस्य भेदधीगोचरत्वकल्पना नान्योन्याभावे तत्कल्पनाधीनेत्यर्थः । किं चान्योन्याभावमनपेक्ष्यैवात्यन्ताभावप्र-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तेनैवालं किमन्योन्याभावेन। घटस्येव भेदाभेदविरोधिन एवात्यन्ताभावस्य तद्भेदबुद्धिविषयत्वाच्च। न च घटादेस्तदभावत्वं सम्भवति एवमपि घटपटभेदयोर्भेदायोगात्सर्वो भेद एक एव स्यात्। अपि चायं कुतास्तु, प्रतीतेः प्रतियोगिन्यपि सत्वात्। अथ यत्र प्रतीयते तर्हि

तियोगिनि घटादौ स्वरूपमेवाभावप्रतियोगिकाभावान्तराभावेन भेदबुद्धिगोचरत्वेन कल्प्तमिति सर्वभेदधीगोचरतया तत्कल्पनोपपत्तिरित्याह * अत्यन्ताभावेति * एवं भेदधर्मिप्रतियोगिकभेदस्य भेदघटादिस्वरूपत्वमङ्गीकृत्योपि सर्वत्र स्वरूपस्यैव भेदधीगोचरत्वसम्भवादन्योन्याभावस्यैव विलोप इत्युक्तं सम्प्रति घटादिस्वरूपत्वं भेदप्रतियोगिकभेदस्य न सम्भवतीत्याशयेनाह * घटस्येति * भेदस्य योऽभेदस्तद्विरोधिन एव भेदभेदधीगोचरत्वात्तदभेदस्य विरोधी च घटस्येव तदभेदस्यात्यन्ताभाव एवेति न घटादेर्भेदप्रतियोगिकभेदधीगोचरत्वसम्भव इत्यर्थः। तर्हि घटादिरेव भेदात्यन्ताभावोऽस्त्वित्याशङ्क्याह * न च घटादेरिति * भेदसमानाधिकरणघटादेर्भेदस्वरूपभूताभेदात्यन्ताभावत्वानुपपत्तेरित्यर्थः। भेदर्म्यादौ भेदप्रतियोगिकभेदान्तराभावमङ्गीकृत्याप्याह * एवमिति * भेदधर्मिप्रतियोगिकभेदान्तराभावे घटपटप्रतियोगिकभेदयोरपि तदभावात्स्वरूपमात्रस्य चाभेदाविरोधित्वात्सर्वभेदैक्यापत्तौ तस्यासङ्कर्य्याप्रयोजकत्वात्तदभ्युपगमो मुधेत्यर्थः। भेदधर्मिणोपि दुर्निरूपत्वाद्भेदे सत्यता दुर्लभेत्याशयेनाह * अपिचेति * घटभेदो यत्र प्रतीयते स एव तदाश्रय इत्याशङ्क्याह * प्रतीतेरिति * घटेपि भ्रान्त्या तद्भेदप्रतीतेः परेणापि स्वीकारात्तत्रापि तद्भेदापत्तिरित्यर्थः। तर्हि यत्र भेदः प्रमीयते स तद्धर्मीति शङ्कते * अथेति * आश्रयानिरूपणेन भेदस्य क्वापि सत्वायोगात्तत्प्रतीतिः सर्वाप्यप्रमेति वदन्तं प्रति तदाश्रयनिरूपणेन तत्प्रतीतिप्रमात्वस्य साधनीयत्वात् यत्र प्रमीयते तत्रास्तीत्युक्तेर्यत्रास्ति तत्रास्तीत्यर्थे पर्य्यवसानात् परस्पराश्रयत्वग्रस्तोक्त्या न तदाश्रयसिद्धिरित्याशयेनाह * तर्हीति * ननु पटादौ

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यत्रास्ति तत्रास्त्वित्युक्तं(१)स्यात् क्वास्तीति प्रश्ने किमुत्तरं, घटेपि प्रतीयमानसम्बन्धोऽबाधित एव, न हि घटस्य तस्य वा स्वरूपं कश्चिद्बाधते एवं च सति बाध एवाप्रमा ऽविनिगमो वा, पटेऽपि नास्त्यन्यः सम्बन्धः। पटस्वरूपमिति चेत्तर्हि न कुड्यादौ । ननु तत्राप्यस्ति, तर्हि भेदप्रमाविषयवैशिष्ट्यस्याननुगतपटादिस्वरूपविशे-

घटभेदसंसर्गस्याबाधादेव तत्प्रतीतेः प्रमात्वनिश्चयान्नोक्तदोष इत्याशङ्क्य तस्य श्रुतियुक्तिबाधितत्वादबाधोऽसिद्ध इत्यभिप्रेत्य परमते घटेपि तद्भेदसंसर्गबाधस्य वक्तुमशक्यत्वात्तत्रापि तद्भेदापत्तिरित्याह * घटेपीति * तत्र तस्यावाधितत्वमुपपादयति * न हीति * किं भेदभेदिनोः स्वरूपमेव संसर्गस्तदतिरिक्तो वा, आद्ये घटतद्भेदयोर्बाधाभावेन तद्रूपसंसर्गस्यापि प्रतीतस्य बाधो न युक्त इत्यर्थः। कथं तर्हि नायं घटाद्भिन्न इति बाध इत्याशङ्क्यार्थाभावात् स एवाप्रमा स्यादित्याह * एवं च सतीति * वैपरीत्यं किं न स्यादित्याशङ्क्यान्यतरप्रमात्वे नियामकाभावात् भेदधर्मिनिर्णयो दुर्लभ इत्याह * अविनिगमो वेति* द्वितीयमपवदति *पटेपीति* घटे घटभेदस्य तदुभयातिरिक्तसम्बन्धोपगमे तस्यापि घटभेदाश्रयतया सम्बन्धान्तरमिति सम्बन्धानवस्थापत्तिरतिरिक्तसम्बन्धस्य द्रव्याद्यन्यतमत्वायोगेनासम्भवश्चेति भावः। ननु पटे तदतिरिक्तसंसर्गाभावेपि पट एव घटभेदसंसर्गः स च घटे नेति तत्र तद्धीरप्रमेति शङ्कते *पटस्वरूपमिति * पटस्वरूपस्य घटभेदसंसर्गत्वे कुड्यादौ तदभावात्तत्र घटभेदो न स्यादिति गूढाभिसन्धिर्दूषयति * तत्किमिति * अभिसन्धिमजानानः कुड्यादिस्वरूपमपि तत्र तत्संसर्ग इति शङ्कते * नन्विति * अभिसन्धिमुद्घाटयति * तर्हीति * तत्तदनन्तस्वरूपस्य घटभेदसंसर्गरूपत्वे घटेपि तत्प्रतीतेरविशेषात्तस्य तद्रूपत्वं केन वारणीयमिति न तद्भेदस्य व्यवस्थिताश्रयसिद्धिरित्यर्थः। ननु घटेपि

(१) तत्रास्तीति खपु० पा०।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

षत्वे घटेपि तथा ज्ञानं तदबाधितं न हि तत्र पटादिस्वरूपमेव तद्विषयः। न च घटातिरिक्तस्वरूपं तत्संसर्गः, अतिरेकस्योपलक्षणत्वे स एव दोषः विशेषणत्वे च न स्वयमेव संसर्गः, घटेपि तत्प्रतीतेर्बाधप्रसङ्गादित्युक्तम्। अन्यश्चेत्तस्यापि नियताधिकरणसंसर्गो न स्वयं उक्तदोषात्।न वा प्रथमातिरेकः नियम्यनियामकत्वायोगात्। अपरश्चेत्तदेवानन्त्यम्।तत्र च प्रथमस्य कस्य चित्संसर्गाभावे तदधीनसंसर्गाणामन्येषां न स इत्यसंसृष्टा एत्र सर्वे

पटादिस्वरूपभूत एव भेदसंसर्गः प्रतीयते स कथं तत्राबाधित इत्याशङ्क्य तत्प्रतीतेः पटाद्याकारत्वाभावान्नैवमित्याह * न हीति * तर्हि घटभिन्नत्वेनानुगतं पटादिस्वरूपं तत्र घटभेदवैशिष्ट्यमित्याशङ्क्याह * न च घटेति * किं घटभेदस्तत्संसर्गस्योपलक्षणं विशेषणं वा, आद्ये वस्तुमात्रस्य तेनोपलक्षितत्वात् घटेऽपि तत्संसर्गः स्यादिति प्रागुक्तदोषापत्तिरित्याह * अतिरेकस्येति * द्वितीये घटभेदसंसर्गस्य विशेषणीभूतोयो भेदः स किं संसर्गिभेद एव ततोऽन्यो वा, नाद्य इत्याह * न स्वयमिति * आत्माश्रयत्वापत्त्या स्वस्य स्वनियामकत्वायोगादित्यर्थः। दोषान्तरमाह * घटेपीति * प्रतीतिबलादेव घटस्वरूपस्यापि तद्भेदवत्तया तत्संसर्गरूपत्वस्य दुष्परिहरत्वाद्विशेषणवैयर्थ्यमिति भावः। संसर्गविशेषणीभूतभेदः संसर्गिभेदादन्य इति पक्षे तस्यापि घटभेदत्वात्तत्संसर्गविशेषणतया तन्नियामकः किं स एव भेदः उत प्रथम स्तृतीयो वा, आद्ये प्रागुक्तात्माश्रयादिदोषापात इत्याह *अन्यश्चेदिति* द्वितीये परस्पराश्रयत्वापत्तेरुभयोरप्यविनिगम्यत्वमित्याह * न चेति * तृतीये तस्यापि संसर्गभूतवस्तुविशेषणतयाऽन्यो भेदस्तस्याप्यन्यः कल्पनीय इति प्रागुक्ताप्रामाणिकनन्तघटभेदापात इत्याह * अपरश्चेदिति * अनन्तभेदपक्षेपि तद्भेदत्वपक्षे इवाविनिगम्यत्व-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्युरिति तद्विशिष्टज्ञानं घट इव सर्वत्र भ्रान्तिस्तत्रापि वा प्रमा स्यात्सर्वेषां तुल्यकालत्वात् को भेदः कस्य संसर्ग इत्यविनिगमः, न हि सर्वः सर्वस्य संसर्गो भवति नियम्यस्य-नियामकत्वायोगात् । न चैवमनन्तभेदाः केन चिदनुभूयन्ते। एतेन घटत्वात्यन्ताभावस्तद्विशिष्टो वा तदधिकरणभेदसंसर्ग इति निरस्तम्।तुल्यदोषत्वात्।किं च तस्यैतस्माद्भेदसंशयव्यतिरेकनिश्चयदशायामस्य ततो न भेदनिश्चय इति सर्वजनीनमिति तस्यैतद्भेदनिश्चयोऽस्य त-

मपि तुल्यमित्याह * तत्र चेति * पूर्वपूर्वभेद उत्तरोत्तरनियामक इत्याशङ्क्य सर्वेषामनादित्वेन समकालीनत्वान्न पूर्वापरभावोपीत्याभिप्रेत्याह * सर्वेषामिति * तर्ह्येकस्य तदतिरिक्ताः सर्वे संसर्गरूपा इत्याशङ्क्य तेषामपि संसर्गे नियामकप्रमाणाभावात्कस्यापि न नियताश्रयसिद्धिरित्याह * न हीति * एकस्यापि भेदस्य भेदसंसर्गाविशेषणतयाऽननुभवात्तद्रूपानन्तभेदकल्पनमप्रामाणिकत्वादयुक्तमित्याह * न चैवमिति * तदुक्तं खण्डनकारैः 'प्राग्लोपाविनिगम्यत्वप्रमाणापगमैर्भवेत् । अनवस्थितिमास्थातुरचिकित्स्या त्रिदोषतेति' । घटातिरिक्तो घटभेदाश्रय इति पक्षाक्तं दोषजातं पक्षान्तरेप्यतिदिशति *एतेनेति* तुल्यदोषत्वादिति * घटत्वात्यन्ताभावाश्रयस्यापि नियतस्यासम्प्रतिपन्नत्वात्तदाश्रयः क इति पृष्टो यदि घटभिन्नस्तदाश्रय इति ब्रूयात्तदा परस्पराश्रयापत्तिः घटत्वरहितस्तदाश्रय इत्युक्तौ चात्माश्रयत्वापत्तिरभावान्तरस्वीकारे च तस्य तस्याश्रयावशेषणतयाऽन्यान्याभावापेक्षणादनवस्थाऽविनिगमनाद्यापत्तिरित्यर्थः । एवं भेदतद्धर्मिप्रतियोगिनां दुर्निरूपत्वं प्रसाद्य भेदज्ञानमपि दुर्घटमित्याह * किं चेति * पूर्वदृष्टस्य चैत्रस्य पुरःस्थितान्मैत्राद्भेदसंशये वाभेदनिश्चये वा मैत्रस्यापि ततो भेदानिश्चयाच्चैत्रस्य मैत्राद्भेदनिश्चयो मैत्रस्य चैत्राद्भेदनिश्चये हेतुर्वाच्यः तत्र ता-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तो भेदनिश्चये कारणं यत्संशयव्यतिरेकनिश्चयौ यत्र प्रतिबन्धकौ तन्निश्चयस्य तद्धेतुत्वात्।एवं तस्यैतस्माद्भेदनिश्चयस्य ततो भेदनिश्चयो हेतुरित्यन्योन्याश्रयः।न च घटधर्मिकभेदः परमते तत्प्रतियोगिको भवति, येन तस्य ग्राह्यतया तत्संशयादिरप्रतिबन्धकः स्यात् अयं स न भवतीति ज्ञानस्य विशेष्यतया विशेषणतया वा तद्भेदविषयत्वायोगाच्च तस्येन्द्रियासन्निकृष्टत्वात् अयं स भवति न वेति संशयदशायां नियमेन स एतस्माद्भिन्न इति ज्ञानादर्शनेन

र्किकसंमतं न्यायमाह * यत्संशयेति * व्याप्तिसंशयादेरनुमितिप्रतिबन्धकत्वाद्व्याप्तिनिश्चयस्यानुमितिहेतुत्वं हि परैरुपेयते एवमत्रापि स्वीकार्यमित्यर्थः । ततः किं तत्राह *एवमिति* मैत्रस्यापि चैत्राद्भेदसंशयादिदशायां चैत्रस्य मैत्राद्भेदानिश्चयेन मैत्रस्य चैत्राद्भेदनिश्चयः चैत्रस्य मैत्राद्भेदनिश्चये हेतुर्वाच्य इत्यन्योन्याश्रयः सर्वत्रोक्तरीत्या स्यादित्यर्थः।ननु कुम्भस्य कुड्याद्भेदसंशयः कुड्यस्य कुम्भाद्भेदनिश्चये न प्रतिबन्धकः तस्य ग्राह्यसंशयतया वन्ह्यादिसंशयवन्निश्चयप्रतिबन्धकत्वायोगादित्याशङ्क्य संशयनिश्चयविषयभेदयोः परमते भिन्नत्वान्नैवमित्याह * न च घटेत्यादिना * किं च सहितधर्मिकभेदनिश्चयस्य तत्प्रतियोगिकव्यवहितधर्मिकभेदो न विषयस्तज्जनकेन्द्रियासन्निकर्षात्ततस्तत्संशयस्य ग्राह्यसंशयत्वाभावात् प्रतिबन्धकत्वं युक्तमित्याशयेनाह * अयं स नेति * ननु घटधर्मिकभेदसंशये तत्प्रतियोगिकभेदानिश्चयो दोषादेव न तत्प्रतिबन्धादित्याशङ्क्य दोषस्यैतत्संशये एवोपक्षीणत्वात्तत्प्रतिबन्धादेवेतरनिश्चयो वक्तव्य इत्याशयेनाह * अयं स भवतीति * ननु प्रतियोगिधर्मिभेदनिश्चये धर्मिणि प्रतियोगिभेदनिश्चयो न हेतुर्येनान्योन्याश्रयः स्यात्किन्तु धर्मितावच्छेदकाभावनिश्चय एव हेतुरित्याशङ्क्योभयसंशयेपि भेदानिश्चयादविशेषादुभयनिश्चयोपि तद्धेतुर्वाच्य इत्या-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रतिबन्धकत्वानुभवात् ! न च प्रतियोगिनि धर्मितावच्छेदकाभावनिश्चय एव तद्धेतुरिति वाच्यम् । विनिगमकाभावात् मूलवृक्षेऽग्रत्वाभावनिश्चयेपि अग्रवृक्षे मूलवृक्षभेदानिश्चयेनाभेदभ्रमदशायां तस्मिन्सत्यपि तददर्शनात् अभेदनिश्चयस्य तत्प्रतिबन्धकत्वे च भेदसंशयस्यापि तथात्वाद्भेदज्ञानस्यापि हेतुत्वं वाच्यम् । तदत्यन्ताभावज्ञानमपि तदाश्रयभेदज्ञानं विना न सम्भवति

ह* न च प्रतियोगिनीत्यादिना* किं च वृक्षद्वयस्याभेदभ्रमदशायां मूलत्वावच्छिन्नैकवृक्षस्याग्रत्वावच्छिन्नापरवृक्षस्य च परस्परभेदधर्मिताद्यवच्छेदकमूलत्वाग्रत्वयोरभावस्यान्योन्यस्मिन्निश्चयेपि तयोर्भेदनिश्चयादर्शनान्न धर्मितावच्छेदकाद्यभावनिश्चयो भेदनिश्चये हेतुरित्याह *मूलवृक्ष इति * वृक्षयोर्धर्मितावच्छेदकाद्यभावनिश्चयेपि भेदनिश्चयो न जायते अभेदभ्रमस्य तत्र प्रतिबन्धकत्वादित्याशङ्क्य तर्हि धर्मितावच्छेदकाभावनिश्चयस्याप्रयोजकत्वात् घटधर्मिकभेदनिश्चये तत्प्रतियोगिकभेदसंशयादेः प्रतिबन्धकत्वमावश्यकमिति तन्निश्चयस्तन्निश्चये हेतुर्वाच्य इति परस्पराश्रयो दुष्परिहर इत्याह * अभेदनिश्चयस्येति * किं च प्रतियोगितावच्छेदकाद्यभावनिश्चयो भेदनिश्चये हेतुरिति पक्षे पटे घटत्वाभावः प्रथमं ज्ञातव्यः तज्ज्ञानं च तत्प्रतियोगितावच्छेदकघटत्वताज्ञानेन विना न भवति सा ततोपि प्राक् ज्ञातव्या सा च घटेतरावृत्तित्वे सति सकलघटवृत्तित्वरूपा पटादेर्घटेतरत्वाज्ञाने दुर्ग्रहेति ततोपि प्राक् घटाभिन्नतया पटादिर्ज्ञातव्य इति चक्रकापत्तिरित्याशयेनाह * तदत्यन्तेति * किं च भेदप्रतियोगितावच्छेदकस्य तद्धर्मिवृत्तित्वाभावसंशयादिदशायां प्रतियोगिनि धर्मितावच्छेदकाभावानिश्चयात् धर्मिणि प्रतियोगितावच्छेदकाभावनिश्चयः प्रतियोगिनि धर्मितावच्छेदकाभावनिश्चये हेतुर्वाच्यः एवं धर्मिणि प्रतियोगितावच्छेदकाभावनिश्चयेपि प्रतियोगिनि धर्मितावच्छेदकाभावनिश्चयो हेतुर्वाच्य इति परस्पराश्रयान्न कोप्य-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

घटत्वतादेस्तदधीननिरूपणत्वात् । प्रतियोगितावच्छेदकस्यैतद्वृत्तित्वाभावनिश्चयदशायां प्रतियोगिन्येतद्धर्माभावनिश्चयाच्च । ननु माभूदयं नियमः अप्रतिबन्धदशायां प्रतियोगिन एतद्भेदज्ञानं विनैवास्य तद्भेदज्ञानं सम्भवत्विति तन्न।एवं सति व्याप्त्यादिज्ञानस्याप्यनुमित्यहेतुत्वप्रसङ्गात् प्रतिबन्धकसंशयादिस्थले निश्चयाभावस्या-

भावः सिद्ध्येदिति कुतस्तदधीनभेदनिर्णय इत्याशयेनाह * प्रतियोगितेति * ननु यत्र यद्धर्मिकभेदादिनिश्चयस्तत्प्रतियोगिकभेदादिसंशयादिना प्रतिबद्धस्तत्रैव तन्निश्चये तन्निश्चयो हेतुः स्यान्न तु सर्वभेदनिश्चयेऽयं नियमः ततश्च तादृशप्रतिबन्धाभावदशायां घटधर्मिकपटभेदज्ञानं विनैव पटे घटप्रतियोगिकभेदज्ञानसम्भवात्कथमन्योन्याश्रयतेति शङ्कते * ननु माभूदिति * संशयादिप्रतिबद्धभेदनिश्चयत्वेन सन्दिग्धादिगोचरनिश्चयजन्यत्वे गौरवाद्भेदज्ञानमात्रे स हेतुर्वाच्य इति नोक्तदोषपरिहार इति दूषयति * तन्नेति * विपक्षे दण्डं पातयति * एवं सतीति * उक्तरीत्या व्याप्तिनिश्चयोपि तत्संशयादिप्रतिबद्धानुमिति प्रत्येव हेतुः स्यादिति तस्यानुमितिमात्रहेतुत्वं पराभिमतं न स्यादित्यर्थः । किं च यद्गोचरसंशयादि यत्र प्रतिबन्धकं तद्गोचरनिश्चयाभावोपि नियामकाभावात्तत्र प्रतिबन्धको वाच्यः ततश्च तद्धर्मिकभेदाद्यनिश्चयस्य तत्प्रतियोगिकभेदादिनिश्चयमात्रे प्रतिबन्धकत्वमिति सर्वत्र तन्निश्चये तन्निश्चयो हेतुः स्यात् तथा चोक्तपरस्पराश्रयत्वं दुर्वारमित्याशयेनाह * प्रतिबन्धकेति * किं च स्तम्भात्कुम्भस्य भेद इति प्रतियोगित्वादिविशिष्टस्तम्भादिनिरूप्यो भेदः प्रतीयत इति सर्वजनीनं अन्यथा स्तम्भादावबधित्वादिविषयपञ्चम्यादिप्रयोगायोगात् ततश्च भेदज्ञानात्प्राक् स्तम्भे तत्प्रतियोगित्वं ज्ञातव्यं तच्च भेदनिरूपितमिति ततः प्राग्भेदो ज्ञातव्य इति विधान्तरेण परस्पराश्रयमाह * एवमिति * ननु प्रतियोगितावच्छेदकज्ञानमेव भेदज्ञाने कारणं न प्रतियोगित्वज्ञानमिति नोक्तदोष इत्याशङ्क्याह * प्रतियोगित्वेति * परमते विशेषणज्ञान

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पि सत्वेन तस्यापि विनिगमकाभावेन प्रतिबन्धकत्वात् । एवं भेदनिरूपकप्रतियोगित्वादिज्ञानस्यापि भेदज्ञानाधीनतयाऽन्योन्याश्रयः प्रतियोगित्वज्ञानं च विशेषणज्ञानतया कारणं प्रतियोगित्वांशे ज्ञानातिरिक्तसन्निकर्षाभावादपि परमते तत्कारणं क्लृप्तकारणाभावेन कार्य्यं स्वप्नरथादिवन्मायिकमेव प्रतियोगिनो भेदाज्ञानदशायां च तन्न ज्ञायते इति भेदज्ञानन्तत्र कारणम् । अपि च घटात्पटो भिन्न इत्यत्र मत्वर्थो भाति घटस्य भेद इत्यत्र षष्ठ्यर्थः तदुभयभानं च सम्बन्धिनोर्भेदज्ञानाधीनं तदज्ञानदशायां नियमेन तदप्रतीतेः । न च वस्तुसद्भेदसत्तै-

स्य विशिष्टज्ञानहेतुत्वोपगमात्प्रतियोगित्वस्य च भेदज्ञाने प्रतियोगिविशेषणतया प्रतीतेस्तज्ज्ञानमपि तत्कारणं वाच्यमित्यर्थः । भेदज्ञानात्प्राक् तत्प्रतियोगित्वज्ञानं वक्तव्यमित्यत्र हेत्वन्तरमाह * प्रतियोगित्वांश इति * व्यवहितप्रतियोगिकभेदसाक्षात्कारे प्रतीयमानप्रतियोगितद्विशेषणांशे ज्ञानातिरिक्तेन्द्रियप्रत्यासत्तेरयोगात्तत्प्रत्यासत्तितया तज्ज्ञानं प्राग्वक्तव्यमिति परस्पराश्रयात् न भेदसिद्धिरित्यर्थः । कथं तर्हि सर्वेषां भेदप्रतिभास इत्याशङ्क्य स्वप्ने रूपादिप्रतिभासवत्साक्षिमात्रेण मिथ्याभेदप्रतिभासोपपत्तिरित्याह * क्लृप्तेति * प्रतियोगित्वज्ञानस्य भेदधीहेतुत्वेऽपि कथं परस्पराश्रयत्वमित्याशङ्क्य सिंहावलोकनन्यायेनोपपादयति * प्रतियोगिन इति * धर्मिणः सकाशात्प्रतियोगिनोभेदाननुभवे तत्प्रतियोगित्वानुभवाभावात्तस्य च भेदनिरूप्यत्वाद्भेदज्ञानं तज्ज्ञाने हेतुरिति परस्पराश्रयत्वमित्यर्थः । एवं परमते परस्पराश्रयत्वापत्त्या भेदप्रमां निराकृत्यानवस्थापत्त्यापि तां निराकरोति * अपि चेति * घटो भिन्न इति वा घटस्य भेद इति वा भेदप्रतिभासो धर्मिसम्बन्धि-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वापेक्षिता, तदभावेपि तदज्ञानदशायां तत्प्रीतेः तत्सत्वेपि तदज्ञानदशायां यमजयोस्तदप्रतीतेश्च तदज्ञानातिरिक्त-दोषाभावात् एवं विशेषणविशेष्यभावज्ञानमपि तदधीन-मन्यथा विरुद्धयोर्भानासम्भवात् तथा च भेदज्ञानेऽपि भेदज्ञानाऽन्तरमपेक्षणीयमिति तद्भेदज्ञानाय भेदान्तरा-पेक्षायामनवस्थेत्यलं पिष्टपेषणेन। एतेन स्वरूपभेदोपि निरस्तः भेदस्य विशेषणविशेष्यभावतयैव प्रतीतेस्तत्र

तयैव भेदमवगाहते तद्धेतुत्वेन च भेदस्य धर्मिणो भेदज्ञानं वाच्यं तत्र भेदज्ञानाभावे सम्बन्धित्वेन ज्ञानाभावरूपं व्यतिरेकं गमकमाह * तदज्ञानेति * सम्बन्धिनोर्भेदसत्तैव सम्बन्धज्ञाने ऽपेक्षिता न तु तज्ज्ञानं गौरवादित्याशङ्क्याह * न चेति * बिम्बप्रतिबिम्बादौ भेद-सत्ताभावेपि तज्ज्ञानादेव सम्बन्धधीदर्शनात्सदृशयोर्यमजयोः स-त्यपि भेदे तज्ज्ञानाभावे सम्बन्धज्ञानाभावाच्च तज्ज्ञानमेव तद्धेतुर्वा-च्यमित्यर्थः। ननु यमजयोः सादृश्यदोषादभेदभ्रमात्सम्बन्धज्ञाना-भावो न भेदज्ञानादित्याशङ्क्य सत्यपि सादृश्ये भेदाज्ञानदशायां स-म्बन्धधीदर्शनात्सादृश्यं नाभेदभ्रमद्वारा तत्प्रयोजकं किं तु भेदाज्ञान-मेव भ्रमादिप्रयोजकमिति दोषतयापि तदेव वाच्यमित्याशयेनाह * तदज्ञानेति * एवं भेदस्य धर्मिसम्बन्धितयैव ज्ञानात्तद्धेतुता प्रा-गभेदभेदिनोर्भेदो ज्ञातव्य इत्युक्त्वा भेदतद्धर्मिणोर्विशेषणविशेष्यभावेन प्रतीतिनियमादपि तद्धेतुतया तयोर्भेदः प्राक् ज्ञातव्य इत्याह * एवमि-ति* विशेषणविशेष्ययोर्भेदज्ञानाभावेपि तद्भावावगमः किं नस्यादि-त्याशङ्क्याह *अन्यथेति* अगृहीतभेदयोर्विशेषणविशेष्यभावज्ञानाद-र्शनात्तयोर्गुणत्वप्रधानत्वभूतयोर्विरुद्धतयैकत्रासम्भावितयोर्विशेषण-विशेष्यभेदग्रहं विना दुर्ग्रहत्वाच्च तज्ज्ञानं विशेषणभावादिज्ञाने हेतुरि-त्यभ्युपेयमित्यर्थः। एवं भेदग्रहे तद्धर्मिभेदग्रहापेक्षामुपपाद्य तस्यापि सम्बन्धित्वादिरूपेणैव धर्मिनिरूप्यभेदगोचरत्वात्तद्धेतुतया तयोर्भे-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चोक्तदोषात्। अपिचाभेदविरोधिपदार्थस्यैव भेदपदात्प्रती-
तेः।न च घटादिस्वरूपं भेदः,(१)पटादिमात्रात्मकतदभेद-
विरोधितदुभयसामानाधिकरण्यधर्मधर्मिभावसत्वात्।न च
परस्य घटपटादिनिरूपितोऽन्यो भेदो स्ति, सप्रतियोगि-

इत्यानान्तरं वाच्यमित्यनवस्थापत्त्या नैकमपि भेदज्ञानं सिद्ध्येदित्याह * तथा चेति * ननु घटे पटभेदस्य तद्भेदस्य वा प्रथमं स्वरूपेण निर्विकल्पकगोचरस्य पश्चाद्विशेषणाभावादिना सविकल्पप्रतिभासोपपत्तेः कुतोऽनवस्थेत्याशङ्क्याह * अलमिति * तादृशनिर्विकल्पकस्यैवाप्रामाणिकत्वात् परैरप्यभावे निर्विकल्पकगोचरत्वस्यानभ्युपेतत्वाद्धर्म्यादिनिरूप्यस्य तदयोगाच्चैतादृशं समाधानं काणकुशावलम्बनतुल्यमिति तन्निराकरणाय न प्रयत्यत इति भावः।एवं धर्म्यादिनिरूप्यधर्मभेदं निरस्य प्राभाकरादिसम्मतं स्वरूपभेदं निराकरोति * एतेनेति * स्वरूपभेदपक्षे भेदानवस्थाभावेऽप्युक्तरीत्या तज्ज्ञानानवस्थाया दुष्परिहरत्वात् सोपि पक्षो न युक्त इत्यर्थः। किं चाद्वैतवादिभिरपि घटादिस्वरूपमात्रस्वीकारात्तत्र भेदपरिभाषा न तद्विरोधिनीत्यभिप्रेत्य तद्विरोधिभेदपदार्थमाह * अपि चेति * तर्हि घटादिस्वरूपमेव पटाद्यभेदविरोधितया तद्भेद इत्याशङ्क्य किं पटाद्यभेदस्तत्स्वरूपमेव तदन्यो वेति विकल्प्य नाद्यो भेदादि(२)भावेनाभिमतानां स्वरूपाणां सामानाधिकरण्यादिदर्शनेन विरोधाभावादित्याह *न च घटादीति* न च परस्परानात्मत्वं विरोध इति वाच्यम्। तथा सति भिन्नस्वरूपं भेद इत्युक्तं स्यात् भिन्नत्वं चाद्याप्यसिद्धमित्यात्माश्रयापत्तिरिति भावः। द्वितीयं निराकरोति * न च परस्येति* एवं पटाद्यभेदविरोधित्वानिरूपणेन घटादिस्वरूपस्य भेदत्वानुपपत्तिमुक्त्वा प्रकारान्तरेण तामाह *सप्रतियोगीति* न च सर्वस्य भावाभावात्मत्वादेकत्र सप्रतियोगित्वादेरविरोध इति वाच्यम्।तस्याप्रतिपन्नत्वान्निरपेक्षभावस्वरूपस्यैवाभावत्वे तत्सत्तायां परापेक्षायोगेन स्यादस्ति स्यान्नास्तीत्याद्यनैकान्तवादापत्तेश्चेति भावः।स्वरूप-

(१) द्यभावेनेति स्वपु० पा०। (२) भेद इति कपु० नास्ति।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कभेदस्य निष्प्रतियोगिस्वरूपत्वानुपपत्तेः घटभेदयोर्धर्म-धर्मिभावानुपपत्तेश्च तस्मात्परपक्षे भेदप्रतीतिर्निर्विषयैव। सिद्धान्ते तु कथञ्चित्सा सविषया तथाहि इदमिदं नेति प्रतीतिस्तयोरेवेदमिदमिति प्रतीतपदार्थद्वयनिरूपिताभेदाभावं विषयीकरोति, नञर्थस्य तत्सम्बन्धिप्रतियोगिकत्वात् सम्भवति च तदुभयाभेदः, अस्ति हि घटपटादौ

स्यैव भेदत्वे घटो भिन्न इति शब्दप्रत्ययो राहोः शिर इति वद्वैशिष्ट्यरूपालम्बनाभावादप्रामाण्यापात इत्यस्मदिष्टसिद्धिरित्याह * घटभेदयोरिति * धर्मरूपस्य स्वरूपभूतस्य वा भेदस्यासम्भवे कथं तत्र प्रतीतिरित्याशङ्क्य तां स्वमतेनोपपादयितुं वास्तवभेदवादिमते तदनुपपत्तिमुपसंहरति * तस्मादिति * वास्तवाद्वैतमते घटपटादिनिरूपिताभेदप्रतियोगिकानिर्वचनीयभेदविषयतया तत्प्रतीतिरुपपद्यते इत्याह * सिद्धान्त इति * भेदस्याभेदप्रतियोगिकत्वे घटादेस्तत्प्रतियोगित्वेन प्रतीतिः कथमित्याशङ्क्य पदद्वयसामानाधिकरण्यार्थाभेदस्यैव नञर्थभेदप्रतियोगित्वानुभवात्तन्निरूपकतया तत्र घटादिप्रतीतिरन्यथासिद्धेत्याशयेनाभेदाभाव एव भेदप्रतीतेर्विषय इत्युपपादयति *तथा हीत्यादिना *तत्सम्बन्धीति* नञ्सम्बन्धि यत् पदद्वयसामानाधिकरण्यं तदर्थप्रतियोगिकत्वादित्यर्थः। घटपटाभेदस्यैव तुच्छत्वात्तत्प्रतियोगिकभेदोपि तथैवेति कथं तत्प्रतीतिः सविषयेत्याशङ्क्याह * सम्भवतीति * तर्हि भेदाभेदमतादभेदापात इत्याशङ्क्य घटाधिष्ठानसद्रूपाद्वितीयात्मचैतन्यस्यैव प्रसङ्गे सद्बुद्धिगोचरवास्तवस्वरूपत्वेन श्रुतिन्यायसिद्धत्वात्तदतिरेकेण दृश्यस्य स्वतः सत्वाभावाच्च तदेव सर्वाभेद इत्यभ्युपगमान्न मतान्तरप्रवेश इत्याशयेन घटाद्यनुस्यूतमेकं सद्वस्तूपपादयति * अस्ति हीति * सर्वत्रानुगतसद्बुद्धिगोचरसद्व्यक्तेरेकत्वे भिन्नस्य घटादेस्तद्रूपत्वायोगात्सद्विलक्षणस्य तस्य रजतादिवत्सति कल्पितत्वं सिद्धं नैवमात्मनः कल्पितत्वं शक्यं वक्तुं आत्मन्येव सर्वस्य बाधश्रवणेन तस्यै-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सदिदं सदिदमित्यनुवृत्तसत्स्वरूपानुभवः स च घटाद्यधिष्ठानमात्मैवेदं सर्वं इति श्रुतिसिद्धात्मरूपं चैतन्यम् । न च सत्ता सद्बुद्धिविषयो नात्मेति वाच्यम् । सदेव सोम्येदमग्र आसीदिति श्रुत्याऽसम्भावितबाधतया च चैतन्यस्वरूपसद्व्यतिरिक्तसत्तायां प्रमाणाभावात् तस्य च घटाद्युपादानतया श्रुतिसिद्धत्वेन घटाद्यनुगततया तस्य तत्र सद्बुद्धिविषयत्वोपपत्तेः । न च भावार्थः सत्ता कथं प्रकृत्यर्थः स्यादिति वाच्यम् । स्वार्थेपि प्रत्ययोपपत्तेः । अन्यथा परमते प्रमेयत्वं प्रमेयं न स्यात् सत्त्वस्यापि

व सर्वाधिष्ठानसद्रूपत्वावधारणात् तस्य दृश्यत्वे सत्यत्वायोगादात्मैव सच्चिद्रूपोऽभ्युपेय इत्याह *सच्चेति* सदाकारानुगतबुद्धेर्गवादिबुद्धिवज्जातिविषयत्वसम्भवात्सद्व्यक्त्यैक्यासिद्धिरित्याशङ्क्याह * न चेति * गवादिव्यक्तीनां प्रत्यक्षादिना भेदस्य निश्चितत्वात्तदेकव्यक्तेः सत्वावधारकागमाभावाच्च तत्रानुगतधीनिर्वाहाय व्यक्त्यतिरिक्तजातिकल्पना युक्ता, प्रकृते तु सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयमित्यादिनाऽऽत्मातिरिक्तसद्व्यक्तिनिषेधात् वाचारम्भणादिश्रुत्या विकारानृतत्वाभिधानाच्च सर्वत्राधिष्ठानसदात्मानुगमादेव सद्बुद्ध्युपपत्तौ सदात्मन एव प्रपञ्चमात्रानुगतसत्तात्मत्वात्तदतिरिक्तसत्ता जातिर्द्रव्यादित्रितयमात्रवृत्तिर्न कल्पनीया प्रमाणप्रयोजनयोरभावादित्याह * सदेवेत्यादिना * ननु सदात्मैव प्रपञ्चसत्तात्मेति कथं सच्छब्दप्रातिपदिकार्थस्य तस्य भावार्थे विहिततल्प्रत्ययान्तसत्ताशब्दार्थत्वायोगादित्याशङ्क्यैतदात्म्यमित्यादौ भावार्थप्रत्ययस्य भवितर्यपि प्रयोगदर्शनान्न का चिदप्यनुपपत्तिरित्याह * न चेत्यादिना * किं च प्रातिपदिकार्थस्याप्यन्यानुगततया भावप्रत्ययान्तशब्दार्थत्वमविरुद्धं इतरथा परमतेपि प्रमेयसत्पदार्थयोः प्रमेय-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सदात्मत्वं न स्यात् । अत एव सत्वविशिष्टमेव सदिति परास्तम् । सत्वस्य सद्भेदेऽसत्त्वापत्तेश्च । तदुक्तं वार्त्तिके- 'प्रकृत्यर्थातिरेकेण प्रत्ययार्थो न विद्यते । सत्तेत्यत्र ततः स्वार्थस्तद्धितोऽत्र भवन् भवेदिति' । तदेव च घटादि-स्वरूपं सदन्यस्य सदिति प्रतीयमानस्वरूपत्वायोगात् स्वरूपमेव चाभेदः । एवं प्रपञ्चमात्रस्यात्मस्वरूपमात्र-मभेदः एवं च घटपटादिनिरूपिताभेदात्यन्ताभावोऽवि-

त्वसत्वशब्दार्थत्वं न स्यादित्याशयेनाह * अन्यथेति * आत्मस्वरूपस्यैव सत्तारूपत्वे तस्य सच्छब्दार्थत्वं न स्यात्सत्वविशिष्टस्यैव तदर्थत्वादित्याशङ्क्य पराभिमतसत्ताया अपि सत्पदार्थत्वोपगमात्तैवमित्याह * अत एवेति * सत्वमपि सत्वविशिष्टत्वात्सन्नीति वदन्तं प्रत्याह * सत्वस्येति * सत्वस्यासत्वे तद्वैशिष्ट्यस्य क्वाप्यसम्भवात्सर्वमसदेव स्यादिति भावः । सदात्मचैतन्यमेवाधिष्ठानतयाऽनुगतं सत्ता न तदतिरिक्तेत्येतत्सुरेश्वराचार्य्यैरप्युक्तमित्याह * तदुक्तमिति * एवं चिदात्मन एव सद्रूपत्वमुपपाद्य तत्स्वरूपमेवाधिष्ठानतया घटाद्यनुगतं सन् घट इत्यादौ घटाद्यात्मतया भासमानं घटादेः पारमार्थिकस्वरूपमिति निगमयति *तदेव चेति* आत्मन एव सद्रूपेण घटादिस्वरूपत्वसाधनफलमाह * स्वरूपमेव चेति* परैरपि तत्स्वरूपमेव तदभेद इति स्वीकारात् घटादिवास्तवस्वरूपात्मैव तदभेद इत्यर्थः । एवं घटपटाभेदस्तदधिष्ठानसदात्मैवेत्येतदन्यत्राप्यतिदिशति स एव सर्वत्र भेदप्रतियोगीति वक्तुम् * एवं प्रपञ्चेति* एवं सर्वत्रापि भेदप्रतियोगिनंवास्तवमभेदं प्रदर्श्य तत्प्रतियोगिकाभाव एवेदमिदं नेति प्रतीत्यालम्बनमित्याह *एवं चेत्यादिना* घटादेर्भेदप्रतियोग्यभेदनिरूपकत्वात्तत्प्रतियोगिकोटौ प्रतिभासो न प्रतियोगित्वेनेत्याशयेन घटपटादिनिरूपितेत्युक्तम् । पराभिमतान्योन्याभावं व्यावर्त्तयितुमत्यन्ताभाव इत्युक्तम् । तस्य वास्तवाभेदप्रतियोगिकस्य वास्तवत्वासम्भवादनिर्वचनीयत्वमाह * अविद्ययेति *

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

द्वया क्लृप्तः घटपटाद्याश्रितो घटः पटो न भवतीति प्रतीयते जीवेश्वरयोरिव बिम्बप्रतिबिम्बमुखयोरिव वा स एव घटात् पटो भिन्न इत्यपि प्रतीयते उभयाश्रितविभाग इवेदमस्माद्विभक्तमिति। एवं सति यत्संशव्यतिरेकनिश्चय इत्यादिदोषोपि नावतरति ग्राह्यसंशयातिरिक्तभेदसंशयाद्यभावात् भेदश्चास्माकं साक्षिभास्य इति न तत्र प्रतियोगित्वादिज्ञानापेक्षा धर्मिप्रतियोगिस्वरूपनिरूप्यत्वाच्च नातिप्रसङ्गः धर्म्यादौ प्रमाणस्यापेक्षितत्वात् । अत

स च पराभिमतधर्मिप्रतियोगिनोरेक एवेत्याह *घटपटाश्रित इति* तदभेदप्रतियोगिककल्पितभेदप्रतिभासे स्वमतेनोदाहरणमाह *जीवेश्वरयोरिति* भेदस्योभयाश्रितत्वे घटात्पटो भिन्न इति कथमेकस्य तदवधित्वेन प्रतिभास इत्याशङ्क्य विभागस्योभयाश्रितत्वेपि एकस्य तदवधित्वेन प्रतिभासवत्तदुपपत्तिरित्याह * स एवेति * धर्मिप्रतियोगिनोर्भेदस्यैकत्वे तद्धर्मिकभेदनिश्चये तत्प्रतियोगिकभेदसंशयः परमत इव न प्रतिबन्धकः तदुभयभेदस्यैकत्वेन तत्संशयस्य ग्राह्यसंशयत्वात्ततश्च यत्संशयव्यतिरेकेत्यादिन्यायानवतारान्नात्र परपक्षोक्तान्योन्याश्रयदोषोपीत्याह * एवं सतीति * ननु भेदप्रतियोगिनो घटपटाद्यभेदस्य भेदप्रतीतेः प्राक् प्रत्यक्षादिना प्रतीत्ययोगात् कथं प्रतियोगिग्रहाधीनो भेदग्रहस्तवापि घटत इत्याशङ्क्याह * भेदश्चेति * तर्हि साक्षिणो नित्यत्वात सदा भेदः प्रतिभासेतेत्याशङ्क्याह * धर्मिप्रतियोगीति * यथाऽऽकाशः साक्षिमात्रभास्योपि स्वावच्छेदकालोकाद्याकारचाक्षुषवृत्तौ सत्यामेव तदभिव्यक्तसाक्षिणा भासते नान्यदा एवं प्रमाणेन भेदप्रतियोग्यभेदनिरूपकघटपटाद्यसाधारणस्वरूपोपस्थितावेव भेदः साक्षिभास्य इति न सर्वदा तत्प्रतिभासो न वा शुक्तिरजतयोर्भेदप्रतिभासप्रसङ्ग इति भावः। प्रतियोगिज्ञानं भेदज्ञाने न हेतुः तज्ज्ञानदशायामेव च भेदो

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

एव समूहालम्बने भेदोपि भेदिभिः सहैवावभासते ।
तस्मात्तत्त्वमसीत्यादेः सत्यज्ञानसुखात्मकः ।
जीवो ब्रह्मेति संसिद्धमागमान्तविदां मतम् ॥ ११ ॥
आस्तामन्यप्रमाणत्वमभेदे सर्ववस्तुनः ।
भेदप्रमाणमेवैतदद्वैतं साधयत्यलम् ॥ १२ ॥

भातीत्यत्र गमकमाह * अत इति * धवखदिरपलाशा इत्यादिरूपस्य गृहीतविवेकानेकविशेष्यकैकज्ञानस्य समूहालम्बनत्वात् प्रतियोगिग्रहस्य विवेकग्रहहेतुत्वे तदनुपपत्तेः प्रतियोग्यादिना सहैव भेदग्रहो वाच्य इति भावः । एवं सजातीयविजातीयस्वगतभेदानां स्वरूपप्रमाणधर्मिप्रतियोग्याद्यनिरूपणेन वास्तवत्वायोगात् तत्प्रतीतिराविद्यकानिर्वचनीयभेदगोचरा इति प्रतिपादनफलमाह * तस्मादिति * जीवब्रह्मणोर्वस्तुतः सत्यज्ञानसुखात्मतया श्रुतिस्मृतिन्यायसिद्धत्वात्तद्विरुद्धरूपस्य भेदस्योक्तविधया मिथ्यात्वाच्च तदैक्यं तत्त्वमस्यादिवाक्यप्रतिपाद्यमिति ब्रह्मविदां मतमनवद्यमित्यर्थः विमलमतीनां युक्तिशूराणां श्रुतिमन्तरेणाप्यद्वैतं सुबोधमित्याशयेनोक्तविधया भेदप्रतिभास एव तत्प्रतियोगितया अद्वैतं वस्तु साधयतीत्याह * आस्तामिति * सर्ववस्तुनः सर्वस्य नामरूपात्मकप्रपञ्चस्य वास्तवं यत्स्वरूपं तस्याभेदे एकत्वे विषयेऽन्यस्य श्रुत्यादेः प्रमाणत्वमास्तां तिष्ठतु तत्परामर्शे यत्नो न कार्य इति यावत् भेदप्रमाणं तत्प्रतिभास एवायं सर्वजनीनो विचार्य्यमाणोऽवतमत्यर्थमद्वैतं साधयति भेदप्रतियोगिनोऽन्यस्यानिरूपणादद्वयं वस्त्वेव तत्प्रतियोगीति वाच्यमित्यर्थः । एवं द्वैतापवादेनाद्वैतब्रह्मनिरूपणे निपुणाचार्य्यपरम्परागतमस्माभिरप्यनन्यथासिद्धयुक्तिभिरुपपादितं पुरुषार्थार्थिभिरापातदृष्ट्या नोपेक्षणीयं किं तु यत्नतो गुणदोषौ विचार्य्य श्रुत्यनुगुणमिदमेव वैदिकैरादरणीयमित्याह * गुरुचरणेति * गुरुणां चरणपरिचरणमहिम्नैव सकृच्छ्रवणादिनैव हृदि अन्तःकरणे गतं साक्षात्कृतं शिष्यानुकम्पया निर्गतं ग्रन्थरचनया बहिः प्रकाशितं यत्तत्त्वं तद्विगुणं पुरुषार्थानुपयोगि तदनुगुणं वेति वीक्ष्य

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गुरुचरणसकाशात् हृद्गतं निर्गतं त-
द्विगुणमनुगुणं वा वीक्षतां तत्क्षमात्मा ।
अपि विसृजति कश्चित्काचमालावमत्या
शतमखमणिमालां शारदाकाशकल्पाम् ॥ १३ ॥

इति श्रीमत्परमहंसपरिव्राजकचार्य्यश्रीमज्जगन्नाथाश्रम-
श्रीमत्पूज्यपादशिष्यश्रीमद्वेदान्तसिद्धान्तसा
राभिज्ञश्रीनृसिंहाश्रममुनिविरचितो
भेदधिक्कारः सम्पूर्णः ।

तां विचारयतु, कः ततक्षमात्मा तद्विचारे क्षमः समर्थः आत्मा अन्तःकरणं यस्य सः विचारे सत्यत्र किं चिदपि वैगुण्यं नेति भावः । अत्र विचाररहितानामनपेक्षामात्रेण वैगुण्यं न सम्भावनीयमित्यत्र दृष्टान्तमाह *अपीति* स्वच्छामिन्द्रनीलमणिमालां कश्चिदविचार्य्य काचमणिमालाभ्रान्त्या त्यजत्यपि नैतावता सा प्राज्ञैरुपेक्ष्यत इत्यर्थः ।

वेदान्तवृन्दविपिने विततं विशुद्धमद्वैतमार्गमपवर्गपदाधिरोहम् ।
श्रीमद्गुरूक्तनयनुन्नसमस्तशङ्कमाश्राय यान्तु पदमुत्तममस्तदोषाः ।

इति श्रीनृसिंहाश्रमश्रीचरणपरिचरणनिरतनारायणाश्रमविरचिता भेदधिक्कारसत्क्रिया समाप्ता ।

श्रीगुरुर्जयति ।

समाप्तो भेदधिक्कारः सव्याख्यः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

BENARES SANSKRIT SERIES;
A
COLLECTION OF SANSKRIT WORKS
EDITED BY THE
PANDITS OF THE BENARES SANSKRIT COLLEGE,
UNDER THE SUPERINTENDENCE OF
R. T. H. GRIFFITH, M. A., C. I. E.
AND
G. THIBAUT, PH. D.
No. 86 & 92.

भेदधिक्कारः

श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमन्नृसिंहाश्रममुनिप्रणीतः ।
तदीयशिष्यश्रीनारायणाश्रमविरचितभेदधिक्कार-
सत्क्रियाख्यव्याख्यासनाथः ।
श्रीमदप्पयदीक्षितकृत उपक्रमपराक्रमश्च ।
काशीस्थद्राविडोपाह्व पण्डितलक्ष्मणशास्त्रिणा विषमपदटिप्पणीपूर्वकं संशोधितः ।

BHEDADHIKKÂRA

BY

SREE NRISIMHASRAMAMUNI,

With a Commentary by the Author's Pupil

Sree Narayanasrama.

And Upakaramaparkrama,

By APPAYYADIKSHITA.

EDITED AND ANNOTATED BY

PANDIT LAKSHMANA SASTRÎ DRÂVIDÂ,

PROFESSOR OF VEDÂNTA, CENTRAL HINDU COLLEGE, BENARES.

BENARES.

Published by the Proprietors Messrs. Braj B. Das & Co.,

AND SOLD BY H. D. GUPTA

Secretary, Chowkhamba Sanskrit Book Depot.

Printed at the Vidyâ vilâs Press & Tara Printing Works,

BENARES.

1904.

Registered under Act XXV. of 1867. (ALL RIGHTS RESERVED.)

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

॥ श्रीगुरुः शरणम् ॥

॥ सव्याख्यभेदधिक्कारभूमिका ॥

अथैष उपक्रम्यते भेदधिक्कारनामा ग्रन्थो मुद्रयित्वा प्रकाशयितुम् ।

अस्य किल प्रणेता श्रीमदद्वैतविद्याचार्यश्रीनृसिंहाश्रमस्वामियतीन्द्रोद्राविडदेशीयः श्रीनीलकण्ठशिवावतारश्रीमदप्पयदीक्षितेन्द्राणां गुरुभूतः स्वसमये महामान्योविराजते स्मेति सङ्गिरन्ते तद्देशीयाः । परमसौ कस्मिन् काले कुत्र समजायत तुरीयाश्रमस्वीकरणत्प्राक् किंनामेधय आसीदित्यादि सुव्यक्तं न विज्ञातुं पार्यते केवलमप्पयदीक्षितगुरुभूतत्वकथनेन तत्समकालिक एव स्यादिति निश्चीयते । एतत्प्रणीतग्रन्थास्तु भेदधिक्कारविवरणभावप्रकाशिकावेदान्तसारटीकाप्रभृतयः समुपलभ्यन्ते तेषु भेदधिक्कारो भेदवादिसमुत्प्रेक्षितातिजटिलतर्कशतसमुत्सारणविचक्षणः समूलघातं भेदवादिपक्षमुपघ्नन् भवति विपश्चितां परमादरभूमिः तथैतस्य टीकाऽपि एतदीयशिष्यनारायणाश्रमविरचिता भेदधिक्कारसत्क्रियाख्या मूलार्थविशदीकरणपटीयसी विराजते तमिमं सव्याख्यं भेदधिक्कारमेकदा कृतमुद्रणमपि अशुद्धिबहुलमस्पष्टाक्षरमवलोक्य दूयमानमानसैर्मदीयमित्रैर्भृशमुत्साहितोऽहं श्रीमत्परमहंसपरिव्राजकपरिवृढश्रीमत्तारकाश्रमस्वामिप्रतिष्ठापितपुस्तकालयस्थं सव्याख्यभेदधिक्कारपुस्तकं नूतनलिखितमपरं च मदीयं परमशुद्धमतिप्राचीनमिति पुस्तकद्वयसाहाय्येन यथामति संशोध्य क्वचित्क्वचिद्विप्पण्या संयोज्य प्रकाशितवानास्मि एतद्ग्रन्थरत्नम् । तदत्र महति कार्ये माद्दशाल्पज्ञजनमतिमान्द्यात् सीसकाक्षरयोजकदोषेण वा समुपजाता अशुद्धीस्समुपेक्ष्य गुणगृह्या विपश्चितो विद्वांसो दृष्टिप्रसादं करिष्यन्तीत्याशास इति शुभम् ॥

कार्तिक शु० ५ शनौ
सं १९६१

जटापाठ्युपाख्यो
लक्ष्मणशास्त्री द्राविडः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

॥ श्रीः ॥

सव्याख्यभेदधिक्कारस्य विषयसूचीपत्रम् ।

	पृष्ठाङ्काः ।
मङ्गलाचरणम् ।	१
,,	२
नाम्नोनिर्वचनादभेदपरत्वम् ।	५
जीवपरयोरभेदानुमानोपन्यासः	७
भेदे प्रत्यक्षप्रमाणोपन्यासः	९
भेदस्यानौपाधिकत्वम्	११
भेदप्रत्यक्षस्याप्रामाणिकत्वम्	१२
मनसोऽप्रमाणत्वम्	१३
मनसः प्रमाणत्व एककरणतापत्तिः	१५
सुखादिसाक्षात्कारस्य नित्यत्वम्	१७
नित्यसाक्षिणैवोपपत्तौ मनसोऽप्रमाणत्वम्	१९
भेदस्येन्द्रियाऽसन्निकृष्टत्वम्	२१
भेदस्याऽनुपलब्धिगम्यत्वं समवायनिरासश्च	२३
निरवयवे संयोगनिरासः	२५
योग्यानुपलब्धेर्जीवपरभेदाग्राहकत्वम्	२७
योग्यानुपलब्धिनिर्वचनखण्डनम्	२९
योग्यानुपलब्धेः सर्वत्र दुर्निरूपत्वम्	३१
सहकारिविरहाज्जीवपराभेदानुपलम्भः	३३
अज्ञानावृतत्वाज्जीवपराभेदाऽनुपलम्भः	३५
ईश्वरत्वनिर्वचननिरासः	३७
आत्मनः परिच्छिन्नत्वनिरासः	३९
नाहमीश्वर इति प्रत्यक्षस्य न भेदे प्रमाणत्वम्	४१
अनुमानस्य भेदे न प्रमाणत्वम्	४३
भेदानुमाने दोषोद्भावनम्	४५
श्रुतेर्भेदपरत्वाभावनिरूपणम्	४७

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पृष्ठाङ्काः।

श्रुतेर्भेदानुवादकत्त्वम् ४९
भेदे न श्रुतेस्तात्पर्यम् ५१
भेदस्य निन्दितत्वान्न श्रुतेस्तत्र तात्पर्यम् ५३
अनुवादस्याभेदप्रतिपादनार्थत्वनिरूपणम् ५५
अभेदश्रुतेरन्यपरत्वनिरासः ५७
जीवपरभेदे आत्मत्वाऽनुपपत्तिप्रदर्शनम् ५९
निरुपाधिकभेदाभावानुमानम् ६१
अनुमानस्य सोपाधिकत्त्वनिरासः ६३
सत्प्रतिपक्षनिरासः ६६
औपाधिकभेदे व्यवस्थासिद्धिप्रदर्शनम् ६७
मनस एकत्वोपपत्तिः ६९
अवच्छेदकभेदादवच्छेद्यभेदनिरूपणम् ७१
भेदहेतूनां बाधनिरूपणम् ७३
विभ्वात्मनानात्त्वे व्यवस्थाऽनुपपत्तिनिरूपणम् ७५
भिन्नात्मनां विभुत्त्वे प्रमाणाभावनिरूपणम् ७७
भेदस्य दुर्वचत्त्वम् ७९
तादात्म्यस्य भेदप्रतियोगित्वाभावसाधनम् ८१
अखण्डतादात्म्यस्य निर्विकल्पकज्ञानाविषयत्त्वम् ८३
भावस्याभावानाश्रयत्त्वनिरूपणम् ८५
घटभेदघटत्वात्यन्ताभावयोरेकत्वखण्डनम् ८७
भेदस्याभेदविरोधित्त्वखण्डनम् ८९
भेदस्य प्रतियोगितावच्छेदकविरोधितेति मतदूषणम् ९१
भेदत्त्वस्याखण्डधर्मत्त्वनिरासः ९३
भेदत्त्वनिर्वचनानिरासः ९५
आरोपवैचित्र्यस्याभावधीवैचित्र्याहेतुत्त्वम् ९७
इच्छाया दोषत्त्वनिराकरणम् ९९
अनवस्थापत्त्या भेदनिरासः १०१
श्रुतिबलादभेदाङ्गीकारः १०२
भेदतद्धर्मिप्रतियोगिनां दुर्निरूपत्त्वम् १०५
भेदज्ञानस्य दुर्घटत्त्वम् १०७
अन्योन्याश्रयनिरूपणम् १०९

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पृष्ठाङ्काः ।

अनवस्थया भेदप्रमानिराकरणम् १११
परपक्षे भेदप्रतीतेर्निर्विषयत्वम् ११३
सत्त्वानुभवस्यात्मविषयत्वोपपादनम् ११५
भेदस्य साक्षिभास्यत्वेनातिप्रसङ्गाभावः ११७
जीवब्रह्माभेदसिद्धिः ११८
उपसंहारः ११९

॥ समाप्तं सव्याख्यभेदधिक्कारस्थविषयसूचीपत्रम् ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

उपक्रमपराक्रमः ।

श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्य
श्रीरङ्गराजाध्वरिवरसून्वप्पय्यदीक्षितविरचितः

वाराणसेय सेंट्रलहिन्दूकालेजसम्बन्धिरणवीरसंस्कृतपाठशालायां
श्रीगौरीशङ्करनाम्ना संस्थापितवेदांतशास्त्राध्यापनपदमल-
ङ्कुर्वाणेन द्राविड श्रीलक्ष्मणशास्त्रिणा परिशोधितः ।

यह पुस्तक व्रजभूषणदास और कम्पनी के
पुस्तकालय में मिलेगी ।

बनारस ।

Published
by
BRAJ B. DAS & CO.
BENARES.
VIDYÂVILAS PRESS.
1904.

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

॥ श्रीगुरुः शरणम् ॥

॥ उपक्रमपराक्रमस्य भूमिका ॥

इह खलु ऐहिकामुष्मिकार्थसाधनप्रकाशनसमर्थं वेदतत्त्वमेव सर्वैरास्तिकैः समाद्रियते। परं तदर्थतत्त्वं साधारण्येन सर्वैर्ज्ञातुमशक्यमिति विचारादिपुरस्सरमेव ज्ञातव्यं भवति सच विचारप्रकारः महर्षिभिर्जैमिन्यादिभिः पूर्वोत्तरमीमांसयोर्बाहुल्येन निरूपितः। तत्र सर्वेषां वाक्यानां तत्र तत्रार्थे तात्पर्यनिर्णयोपयोगिलिङ्गषट्कं निरूपितम् तथाचोक्तम्।

उपक्रमोपसंहारावभ्यासो ऽपूर्वता फलम्।
अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णय इति॥

अत्रोपक्रमोपसंहारपदाभ्यां तत्तद्विचार्यवाक्यीयाद्यन्तभागनिष्ठमेकार्थपर्यवसायित्वं लक्षणया बोध्यते। अभ्यासोनाम अनन्यपरं पुनः श्रवणं। अर्थवादश्च स्तुतिनिन्दान्यतरबोधकं वाक्यं। एतत्त्रयं शब्दघटितत्वाच्छब्दनिष्ठं लिङ्गमित्युच्यते। अपूर्वत्वं प्रकृतवाक्यात् प्रकृतार्थविषयकज्ञानोत्पादात्पूर्वं केनाऽपि प्रमाणान्तरेणाज्ञातत्वं। फलं प्रकृतवाक्यार्थविषयकज्ञानस्य फलवत्त्वम्। उपपत्तिश्च प्रमाणान्तरेण प्रकृतवाक्यार्थस्याबाधितत्त्वम्। एतत्त्रयन्तु अर्थनिष्ठम्। तत्रोपक्रमोपसंहारयोरेकार्थनिष्ठत्वस्यैकार्थतात्पर्यनिर्णायकत्वेन लिङ्गत्वमेकस्य वाक्यस्यानेकत्र तात्पर्यसंशये सति यस्मिन्नर्थे आद्यन्तभागयोः पर्यवसानं स एव तात्पर्यविषय इति निर्णयात् अन्यथा तस्य वैयर्थ्यं प्रसज्येत क्वचिच्चानुवादकत्वशङ्कापसारकतयाऽपि तस्य लिङ्गत्वं यदि हीदं वाक्यमेतमर्थमनुवदेद्व्यर्थमेव स्यादित्यापत्तिसम्भवात्। अनन्यपरपुनःश्रवणरूपस्याभ्यासस्यादरज्ञापनद्वारा तात्पर्यलिङ्गत्वं तथाचोक्तं अभ्यासोहि भूयस्त्वमर्थस्य भवति यथाऽहो दर्शनीया अहो दर्शनीयेत्यादि। आदरश्च यद्यपि प्राशस्त्यरूपो ऽभ्यस्यमानस्यार्थस्य विधेयत्वानुमानद्वारा तात्पर्यविषयत्वं बोधयति अर्थवादोऽपि तथेति नानयोर्भेदसम्भवस्तथाऽपि अर्थवादज्ञाप्यं प्राशस्त्यं बलवदनिष्टाजनकत्वरूपमभ्यासबोध्यन्तु अर्थान्तरादुत्कृष्टत्वरूपमिति नाभ्यासार्थवादयोरैक्यम्, अर्थवादस्यापि विधेयप्राशस्त्यनिषेध्यनिन्दाधीद्वारा विधिनिषेधवाक्याधीनज्ञानोत्पादसहकारितया ऽऽवश्यकत्वमितरथा प्रवर्तनानिवर्तनारूपयोस्तदर्थयोस्तादृशधीरूपेतिकर्तव्यत्वानन्वयात् शाब्दबोध एव न पर्यवस्येत् तत्र शब्दनिष्ठलिङ्गत्रयस्यापि अतिप्रसङ्गवा-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रकतया तात्पर्यलिङ्गत्वमेष्टव्यमन्यथा वेदान्तानामद्वितीये ब्रह्मणीव सत्यकामत्वादिविशिष्टेऽपि अबाधितत्वादित्रिकं सम्भवति श्रुतिबोधितत्वेनाबाधितत्वस्योपासनाविषयत्वेन प्रयोजनवत्त्वस्य च सम्भवादतस्तत्राऽपि तात्पर्यं प्रसज्येतेत्यभ्यासादेरद्वितीय एव विद्यमानत्वेन तत्रैव तात्पर्यमिति निश्चीयत इत्येवं रीत्या तस्योपयोगः। अर्थनिष्ठलिङ्गत्रयस्य तु प्रामाण्यशरीरनिर्वाहकतया तात्पर्यं प्रति व्यापकतया लिङ्गत्वं यथा यज्ञोपवीतादिकं ब्राह्मण्यं प्रति, तत्राऽनुवादकवाक्यस्य स्वार्थे प्रामाण्यवारणायापूर्वत्वमभ्युपगतम्। उत्ताना वै देवगवा वहन्तीत्यादिवाक्यस्य प्रामाण्यवारणाय फलवत्त्वमुपात्तम्। प्राचाणः प्लवन्त इत्यादिवाक्यानां प्रामाण्यवारणायाबाधितत्वमभ्युपात्तम्। न चोत्तानादिवाक्यस्य निष्प्रयोजनार्थपरत्वे तदध्ययने प्रवृत्त्यनुपपत्तेः स्वार्थे तात्पर्याभावेऽपि प्रामाण्यशरीरे प्रयोजनवत्त्वनिवेशो व्यर्थ इति चेन्न। यादृशं ज्ञानं प्रवृत्तिनिवृत्तिद्वारा साक्षाद्वा प्रमातुरिष्टप्रयोजकं तस्यैव प्रमात्वेन लोके व्यवहारेण निष्प्रयोजनस्य प्रमात्वात्। कदाचिन्निष्फलार्थे प्रत्यक्षादेः प्रामाण्यसम्भवेऽपि न श्रुतेस्तत्सम्भवः फलवदर्थज्ञानमुद्दिश्याध्ययनसंस्कृतश्रुतीनां विनियोगेन निष्फलार्थे तात्पर्याभावनिश्चयात् इत्येवं रीत्या सर्वेषामुपयोगित्वं वर्तते। तत्र लिङ्गषट्के उपक्रमोपसंहारयोः परस्परविरुद्धत्वे कतरद्बाध्यमित्याकाङ्क्षाया उदयात् तन्निवर्तकविचारस्य पूर्वोत्तरमीमांसयोः कुत्रचित्कृतत्वेऽपि अनतिविशदतया यथावद्बोधानौपयिकतामालक्ष्य पूर्वोक्तविचारप्रधानमेव शब्दसङ्क्षिप्तमर्थबहुलमुपक्रमपराक्रमं नाम ग्रन्थं जग्रन्थ चतुरधिकशतप्रबन्धनिर्माता श्रीमानप्पयदीक्षितवरः। तमिमं ग्रन्थं प्रकाशयितुं कृतमतिः श्रीयुतहरिदासगुप्तेन भूयोऽभ्यर्थितोऽहमेतन्मुद्रणकार्ये प्रावर्तिषि शोधनकार्ये च विविधविद्याविलाससदनश्रेष्ठिश्रीयुतगोविन्ददासमहाशयस्यैकं नवीनं नातिशुद्धमपरंच श्रीमत्परमहंसपरिव्राजकपरिवृढश्रीमत्तारकाश्रमस्वामिप्रतिष्ठापितपुस्तकालयस्थं प्रायशः शुद्धं स्थले स्थले सन्दिग्धं इति पुस्तकद्वयसाहाय्यं सम्पाद्य स्वशक्त्यनुसारेण संमापयम्। तदत्र मदीयमतिदोषात्सञ्जातानि स्खलितान्युपेक्ष्य गुणगृह्या विपश्चितो दृष्टिप्रसादेन समीकुर्युरित्याशासे इति शुभम्।

आश्विनशुक्ल ४ बुधवासरे
संवत् १९६१

जटापाठ्युपनामको
लक्ष्मणशास्त्री द्राविडः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

उपक्रमपराक्रमस्य विषयसूची ।

	पृष्ठाङ्काः ।
वेदोपक्रमाधिकरणकथनम्	२
अश्वप्रतिग्रहेष्ट्यधिकरणनिरूपम्	३
उपक्रमादुपसंहारप्राबल्यपूर्वपक्षः	५
पूर्वपक्षे ऽक्ताद्यधिकरणप्रदर्शनम्	७
जातेष्ट्यधिकरणन्यायेनोपसंहारप्राबल्यसमर्थनम्	९
अपच्छेदन्यायेनोपसंहारप्राबल्यसमर्थननिरासः	११
उपक्रमप्राबल्येनैव वेदधर्मत्वसमर्थनम्	१३
उपक्रमप्राबल्येनैव दातुरिष्टिरिति निर्णयः	१५
अक्ताधिकरणविरोधनिरासः	१९
वाक्यशेषाद्विशेषग्रहणनिर्णयः	२१
उपसंहारस्य नोपक्रमबाधकत्वम्	२३
अर्थवादेन विशेषावधारणव्युत्पादनम्	२५
अधिकशङ्कानिरासाय पुनर्विचारः	२७
अधिकरणान्तरैरुपसंहारप्राबल्यशङ्का	२९
ज्योतिष्टोमाधिकरणे उपक्रमानुरोधेनोपसंहारानुसरणम्	३१
आकाङ्क्षयैव विशेषपर्यवसानम्	३३
श्येनवाक्य उपसंहारप्राबल्यनिरासः	३५
वैश्वानरवाक्ये उपसंहारप्राबल्यनिराकरणम्	३७
अधिकरणान्तरेणोपसंहारप्राबल्यशङ्का	३९
अक्ताधिकरणन्यायादविरोधः	४१
उत्तरमीमांसायामपि उपसंहारप्राबल्यनिरासः	४३
बह्वनुग्रहन्यायेन दहराकाशो ब्रह्मेति निर्णयः	४५
रामानुजीयकल्पनानिरासः	४७
उपसंहारगतत्वेन लिङ्गस्य प्राबल्यशङ्का	४९
उपक्रमगतत्वेन लिङ्गस्य प्राबल्यमिति समाधानम्	५१
आकाशाधिकरणे नोपसंहारप्राबल्यमिति निर्णयः	५३
उपसंहारः	५४

॥ समाप्तमुपक्रमपराक्रमस्य विषयसूचीपत्रम् ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

॥ उपक्रमपराक्रमः ॥

श्रीगणेशाय नमः ।

उपक्रमस्य प्रबलत्वमूचिरे ययोपसंहारविरोधिनो बुधाः ।
प्रतिष्ठितां तामिह तर्कसन्ततिं प्रबोधयामः प्रतिकूलजल्पितान् ॥१॥

मीमांसकास्तावदुपक्रमोपसंहारयोर्विरोधे सत्युपक्रमस्य प्राबल्ये न्यायमाहुः । सर्वस्यापि शब्दस्य स्वार्थलङ्घने विरोधः कारणम् । स च प्रतियोगिनि दृष्टे ज्ञायते । न चोपक्रमदशायामुपसंहारो विरोधी ज्ञायत इत्युपक्रमो मुख्यवृत्तिरेव युक्तः । उपसंहारो मुख्यवृत्तिश्चेन्न तेन सम्बध्यते आकाङ्क्षावशेन हि सम्बन्धः । न च पूर्वं प्रतीतस्य स्वविरुद्धार्थे भवत्याकाङ्क्षा अत उपसंहारस्तदनुरोधेन बलाल्लक्षणादिकं प्रतिपद्यते । अत एव वेदोपक्रमाधिकरणेऽश्वप्रतिग्रहेष्ट्याद्यधिकरणे चोपक्रमानुसारेणोपसंहारो नीतः । तद्यथा । तृतीयेऽध्याये चिन्तितम् । * श्रुतेर्जाताधिकारः स्यात् * ज्योतिष्टोमे प्रजापतिर्वा इदमेक आसीत्स तपोऽतप्यत तस्मात्तपस्तेपानात्त्रयो देवा अजायन्ताग्निर्वायुरादित्यस्ते तपोऽतप्यन्त तेभ्यस्तपस्तेपानेभ्यस्त्रयो वेदा अजायन्त अग्नेर्ऋग्वेदो वायोर्यजुर्वेद आदित्यात्सामवेद इत्युपक्रम्य श्रूयते तस्मादुच्चैर्ऋचा क्रियते उपांशु यजुषा उच्चैः साम्नेति । तत्र संशयः । किमुच्चैष्ट्वादिविधावृगादिशब्दैस्तदभिधेयानां ग्रहणमुत वेदानामिति उपक्रमे वेदशब्दश्रवणादुपसंहारे ऋगादिशब्दश्रवणाच्च । वेदशब्दो हि मन्त्रब्राह्मणसमुदायात्मकस्य काठकादिग्रन्थविशेषस्य वाचकः * वेदानधीत्य वेदौ वा वेदं वाऽपि यथाक्रम * मित्यादिव्यवहारात् । ऋग्यजुस्सामशब्दास्तु *तेषा मृग्यत्रार्थवशेन पादव्यवस्था । शेषे यजुः शब्दः । गीतिषु सामाख्या * इति सूत्रैः सपादबद्धापादबद्धमन्त्रविशेषवाचकत्वेन निर्णीता अतो वेदशब्दस्य ऋगादिशब्दानां च विभिन्नार्थकत्वाद्भवति संशयः उपक्रमोपसंहारयोर्विप्रतिपत्तेरेकवाक्यत्वाच्च उभयोरेकविषयत्वे अवश्यम्भाविनि किमुपसंहारविध्युद्देशवशात् उपक्रमस्यार्थवादगतवेदशब्दो वेदैकदेशऋगादिपरो भवतु, किं वोपक्रमगतार्थवादवशादुपसंहारस्थविध्युद्देश्यगतमृगादिपदमृगादिप्रायवेदपरं भवत्वि-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ति । पूर्वपक्षे यस्मादगादयः प्रजापतिजातेभ्योऽग्न्यादिभ्यो जातास्तस्मात्प्रशस्तैस्तैरुच्चैष्ठादिनियतस्वरयुक्तैरेव कर्म कर्तव्यमिति कर्माङ्गभूतानामृगादीनां वेदविशेषानादरेण यत्किञ्चिद्वेदस्थानामुच्चैष्ठादिविधानम्। सिद्धान्ते तु यस्मादुक्तरूपेभ्योऽग्न्यादिभ्य ऋग्वेदादयो जातास्तस्माद्यदृग्वेदादिभिः क्रियते कर्मवृन्दं तस्य प्रशस्तस्यांश्चैष्ठादि कर्तव्यमिति तत्तद्वेदविहितकर्मराशिगुणत्वेनोच्चैष्ठादिविधानमिति फलभेदः । तत्र विध्युद्देशस्य प्रधानत्वादप्राप्तविषयत्वेन * न विधौ परः शब्दार्थ* इति न्यायाच्च न तत्र लक्षणा किन्त्वर्थवादस्य गुणत्वादनुवादत्वेन लक्षणासहिष्णुत्वाच्च तत्रैव लक्षणा युक्तेति ऋगादिशब्दैः स्वाभिधेयानां ग्रहणमिति पूर्वः पक्षः । सिद्धान्तस्तु लब्धात्मनः प्रधानस्य गुणादबलीयस्त्वम् । विध्युद्देशस्त्विहर्गादिविषयत्वेनात्मानं न लभते । उपक्रमगतं हि वेदशब्दऽसञ्जातप्रतिपक्षे यथाश्रुतार्थेऽवगते तदुपसंहारगतमुपजातप्रतिपक्षमृगादिपदं यथाश्रुतार्थं सत्तदेकवाक्यतां न प्रतिपद्यते । न हि सम्भवत्येवं स्तुतिविधानयोरन्वयः यस्मादेवमेते वेदा जातास्तस्माद्दृग्वेदादीनामुच्चैष्ठादिकर्तव्यमिति । तेनर्गादिशब्दलक्षणया तस्यांश्चैर्ऋग्वेदेन क्रियत इत्यादिरूपेण तदनुगुणतयैवात्मलाभः । अतः प्रधानत्वेपि विध्युद्देशस्यार्थवादानुसारेणैव लब्धात्मकस्योपक्रमविरोध्यर्थोपस्थापकत्वाभावान्न तदनुसारेण उपक्रमगतवेदशब्दस्यर्गादिलक्षणा कल्पनीया । नापि वेदस्तुतेरेव लक्षितलक्षणादिना तदवयवभूतर्गादिस्तुतौ पर्यवसानं कल्पनीयम् । अप्राप्तविषयत्वं त्वसिद्धम् । उपक्रमे वेदानां प्रस्तावेन वेदसंस्पर्शेन किञ्चिद्विधास्यत इत्यवगते किं तद्विधेयमित्येतावदनवगतमपेक्षितं च विध्युद्देशाद् गृह्यत इति विध्युद्देशस्थितानामप्यृगादिशब्दानामवगतविषयत्वात् तस्मात्तैर्लक्षणया वेदानां ग्रहणमिति ।

तथा तृतीय चिन्तितम् । * अचोदितकर्मभेदात् * प्रजापतिर्वरुणायाश्वमनयत्स स्वां देवतामार्छत्स पर्यदीर्यत स एतं वारुणं चतुष्कपालमपश्यत्तं निरवपत्ततो वै स वरुणपाशादमुच्यत वरुणो वा एतं गृह्णाति योऽश्वं प्रतिगृह्णाति यावतोऽश्वान्प्रतिगृह्णीयात्तावतो वारुणान् चतुष्कपालान्निर्वपेद्वरुणमेव स्वेन भागधेयेनोपधावति स एवैनं वरुणपाशान्मुञ्चति * इति श्रूयते । अत्र किमश्वदातुरिष्टिर्विधीयते उत तत्प्रतिग्रहीतुरिति सन्देहः । उपक्रमे हि प्रजापतिर्वरुणाय

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रतिग्रहीत्रेऽश्वमनयद्दौ सोऽश्वदाता प्रजापतिः स्वां देवतामश्वदाने सम्प्रदानत्वेनात्मीयदेवतारूपं वरुणमार्च्छत्प्रापत् अश्वं दत्त्वा वरुणग्रहं जलोदरव्याधिपर्यायं प्राप्तवान्स प्रजापतिः पर्यदीर्यत तेन व्याधिना परितो दीर्णोभूदिति प्रजापतेरश्वदानेन दोषं सङ्कीर्त्य तस्य दोषनिर्हरणार्थमिष्ट्यनुष्ठानकीर्तनादश्वदातुरियमिष्टिर्विधित्सितेति गम्यते उपसंहारे च तत्प्रतिग्रहीतुर्विधीयमाना दृश्यते । न च स स्वां देवतामार्च्छदित्यादौ तच्छब्दानां वरुणपरत्वकल्पनायामुपक्रमे प्रतिग्रहीतुरेवेष्टिर्विधित्सिता गम्यते इति शक्यं वक्तुमिति वाच्यम् । विभक्तैक्यरूपेण तेषां प्रजापतिपरत्वौचित्यात् स्वां देवतामिति च वरुणं प्रत्येव वरुणस्य देवतात्वोक्त्ययोगात्तं निरवपदिति वरुणस्य वरुणोद्देशेन त्यागासम्भवाच्च, आत्मने सङ्कल्प्यमानस्य द्रव्यस्य स्वत्वनिवृत्त्यसम्भवात् । तस्मादस्ति तावदुपक्रमोपसंहारयोर्विरोधस्फूर्तिः भाव्यं च तयोरविरोधेनैकवाक्यतया । अतः किं विध्युद्देशानुसारेण प्रतिग्रहीतुरियमिष्टिः अर्थवादस्तु तथाश्वो दानप्रतिग्रहसम्बन्धे गर्हितो यदा दातुरपीयमिष्टिः स्यात्किमुत प्रतिग्रहीतुरिति कैमुत्यतात्पर्येण दूरं नेतव्यः किं वोपक्रमानुसारेण दातुरेव, प्रतिगृह्णातिस्तु कथं चिद्दान एव योजनीय इति सम्भवति संशयः । तत्र पूर्वः पक्षः । वेदोपक्रमाधिकरणे उपक्रमप्राबल्ये स्थितेऽपि नेह ततो निर्णयो युक्तः तत्रोपक्रमसङ्कीर्तिता वेदा उपसंहारगतैर्ऋगादिशब्दैरनुवदितुं शक्यन्ते वेदैकदेशत्वात् । ऋगादीनामुपक्रम एवोग्नेर्ऋग्वेद इत्यादिनावेदानामृगादिसम्बन्धस्य कीर्तिततया नात्यन्तपरित्यक्तोपक्रमार्थत्वाच्च । * ऋग्भिः पूर्वाह्णे दिवि देव ईयते यजुर्वेदे तिष्ठति मध्ये अन्हः । सामवेदेनास्तमये महीयते वेदैरशून्यस्त्रिभिरेति सूर्यः* इत्यादौ केवलानामृगादिशब्दानामृग्वेदादिषु लक्षणया वेदे दृष्टत्वाच्च । ऋचः सामानि यजूंषि प्रकृत्य सैषा त्रय्येव विद्येतिनिर्दिष्टस्य शब्दस्य त्रैविद्योयं ब्राह्मण इति वेदत्रयाभिज्ञनिर्देशे वेदत्रयपरतया लोकानां प्रयोगेण ऋगादिशब्दानां वेदेषु लक्षणाया लोकसम्मतत्वाच्च । अत एव तस्मिन्नधिकरणे * वेदो वा प्रायदर्शनादिति * सिद्धान्तसूत्रेण उपक्रमप्राबल्योक्त्यनन्तरं *लिङ्गदर्शनाच्च* त्रैविद्याख्याच तद्विदेति* सूत्राभ्यां वेदे लोके च प्रयोगेण लक्षणाया निरूढत्वं दर्शितम् । न चेह तथा प्रतिगृह्णातेर्दाने दृष्टप्रयोगः प्रत्युत तदत्यन्त-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विरुद्धार्थ एव । तेन तत्रोपक्रान्तमर्थमुपसंहारगतशब्दोऽनुवदितुमर्हतीति तत्रोपक्रमानुरोधेपि अत्र न तथेति विध्युद्देशस्य प्राधान्याप्राप्तविषयत्वाभ्यामवगतं प्राबल्यमव्याहतमिति तदनुरोधेनैवोपक्रमो नेतव्य इति। सिद्धान्तस्तु उपक्रमप्राबल्यन्यायेनैवालब्धात्मनि प्राधान्यस्य प्रयोजकत्वादप्राप्तविषयत्वस्यचासिद्धेः उपक्रम एवाश्वदातुः प्रजापतेर्वरुणग्रहनिर्मोचनहेतुत्वेनेष्टेः प्रशंसावशादश्वदातुरियमिष्टिर्विधास्यत इत्यवगतत्वात् । ततश्चार्थवादस्य विधिशक्त्यभावात्तावन्मात्रं ततोऽनवगतं विध्युद्देशाद्ग्राह्यं विधिविषयांशस्त्वर्थवादगत एवेति दान एव प्रतिगृह्णातियोजनीयः । प्रतिगृह्णातीति प्रतिग्रहकर्तोच्यते यः प्रतिग्रहहेतुभूतं दानमाचरति सोपि प्रतिग्रहकर्तेति व्यपदिश्यते एव । हेतुकर्तर्यपि स्वव्यापारद्वारा प्रयोज्यव्यापारकर्तृत्वसत्वात् । तत्र प्रयोजकव्यापारकर्तृत्वरूपहेतुकर्तृत्वविवक्षायां णिजन्तप्रयोगनियमेपि तद्द्वारकप्रयोज्यव्यापारकर्तृत्वविवक्षयाऽणिजन्तप्रयोगोपि न विरुध्यते । न च साक्षात्कर्तृत्व एव तच्छक्तिः लुङ्लृटोरनद्यतनाद्यतनसाधारण्येन भूतभविष्यन्मात्र इव कर्तृप्रत्ययानां साक्षात्परम्परासाधारण्येन कर्तृत्वमात्रे शक्त्युपगमात् । दृष्टश्च हेतुकर्तर्यप्यणिजन्तप्रयोगः यथा स्वामिनि सम्विधानमात्रकर्तरि साक्षाद्विलेखनमकुर्वत्यपि षड्भिर्हलैः कर्षतीति । ततश्च प्रतिगृह्णातेः कर्षतेरिव साक्षात्कर्तृवचनत्वस्य मुख्यस्वातन्त्र्यविषयतयौत्सर्गिकत्वेपि कर्षतेः षड्हलोपादानसामर्थ्यात्प्रयोजककर्तृपरत्ववदस्यापि उपक्रमैकवाक्यतासामर्थ्यात्तत्परत्वमुपपद्यते । तेन यद्यपि वेदोपक्रमाधिकरणोक्तान्यत्रदर्शनरूपाभ्युच्चययुक्तिरिह नास्ति तथापि कर्षतिन्यायेन प्रयोगनिर्वाहादुपक्रमानुरोधेन निर्णयो युक्तः । किं च तत्र स वक्तव्योऽभ्युच्चयः उपक्रमे प्रजापतेस्तत्स्रष्टृतयाऽग्न्यादीनां तत्स्रष्टृतया वेदानां च कीर्तितत्वेनोपक्रमो वेदविषय एवेति निश्चेतुमशक्यत्वात् । तत्र वेदजनकाग्न्यादिजनकत्वेन प्रशंसया प्रजापतेर्वा प्रजापतिजातत्वेन वेदजनकत्वेन च प्रशंसयाऽग्न्यादीनां वा प्रजापतिसुताऽग्न्यादिजातत्वेन प्रशंसया वेदानां वा किञ्चिद्विधास्यत इत्यवगते उपसंहारगतानामृगादीनां च तेषामन्यतमत्वाभावेनर्गादिशब्दानां यथाश्रुतार्थसम्भवे तेषामुपक्रान्तेषु प्रजापत्यादिषु किम्परत्वमवसेयमित्यत्र नियामकत्वेन तेषां वेदेषु लक्षणानिरूढिप्रदर्शनापेक्षणात् । न

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्वन्न तदपेक्षास्ति । अत्रोपक्रमे वारुणेष्टिर्वरुणग्रहनिर्मोचनहेतुत्वेन प्रशस्यत इति व्यवस्थितस्तुत्यवगमात् । तस्मादिहाप्युपक्रमानुरोधेन निर्णय इति उपसंहारादुपक्रमः प्रबल इति ।

अत्रकेचिदर्वाचीनाः कल्पयन्ति । उपक्रमादुपसंहारो बलीयान् तद्व्याख्यानरूपत्वात् । एकस्मिन्वाक्ये हि प्रथमभागेन क्वचिदर्थे धीरथे चरमभागस्य तद्विरोधिनोऽवैयर्थ्याय तद्व्याख्यानरूपत्वं कल्पनीयं व्याख्यानस्य पाश्चात्यत्वनियमात् । लोके गामानय बलीवर्दमानयेत्यादौ तथा दर्शनाच्च । व्याख्येयस्य च निश्चितप्रामाण्यव्याख्यानुसारेणार्थनिर्णयो युक्तः व्याख्यानतो विशेषप्रतिपत्तिरिति प्रसिद्धेः । वेदे * प्युग्रं वचो अपावधी * मित्यादिमन्त्राणामशनया पिपासेह वा उग्रं वच इत्यादिव्याख्यानरूपब्राह्मणानुसारेणार्थाङ्गीकाराच्च । तथा परत्वादप्यपच्छेदाधिकरणन्यायेनोपक्रमादुपसंहारो बलीयान् । षष्ठे *पौवापर्ये पूर्वदौर्बल्यं प्रकृतिवदिति* । अपच्छेदाधिकरणे ज्योतिष्टोमे अध्वर्युं प्रस्तोता ऽन्वारभते प्रस्तोतारमुद्गाता उद्गातारं प्रतिहर्त्तेत्यादिक्रमेण अन्वारभ्य प्रसर्पतामध्वर्य्वादीनां मध्ये यदि क्वचिदुद्गातृप्रतिहर्त्रोः क्रमेण अन्वारम्भविच्छेदः स्यात् तदा तन्निमित्तयोः प्रायश्चित्तयोर्यद्युद्गाताऽपच्छिद्येत अदक्षिणो यज्ञः संस्थाप्य इति यदि प्रतिहर्त्ताऽपच्छिद्येत सर्ववेदसं दद्यादिति विहितयोरदक्षिणक्रतुसमापनसर्वस्वदक्षिणादानरूपयोर्विरुद्धयोः समुच्चयाऽनुष्ठानाशक्तेरन्यतरस्मिन्ननुष्ठेये किं पूर्वनिमित्तकमनुष्ठेयं उतोत्तरनिमित्तकमिति संशय्यानुपसञ्जातविरोधित्वात्पूर्वनिमित्तकमनुष्ठेयमिति प्राप्ते परनिमित्ते सति तन्निमित्तशास्त्रस्य दुर्निवारप्रवृत्तिनिमित्तत्वात् तस्य चपूर्वाबाधेनानुत्पत्तेः पूर्वोपमर्देनैवोत्पत्तिनियमात्परनिमित्तमेवानुष्ठेयमिति सिद्धान्तितम् । उक्तं च । पूर्वं परमजातत्वादबाधित्वैव जायते । परस्यानन्यथोत्पादान्नाद्याबाधेन सम्भव इति ।

यत्त्वनुपजातविरोधित्वादुपक्रमस्य प्राबल्यमुक्तं तन्न । सर्वत्रापातजप्रत्ययस्यैवप्राबल्यप्रसङ्गेन विमर्शवैयर्थ्यापत्तेः अतो नोपक्रमस्य प्राबल्यं युक्तम् । नचैवं वेदोपक्रमाधिकरणविरोधः । न हि तत्रोपक्रमानुरोधेन स्वराणां वेदधर्मत्वनियमः किं तु तस्यर्गादिधर्मत्वे ऋच्यध्यूढं साम गीयत इति वचनाद्गाधारगीतिरूपे साम्न्यप्युद्गीथमुद्गीथ

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ऋग्भिश्चाक्रियत इति अत एव सिध्यतीत्युच्चैस्सामेत्यस्य वैयर्थ्यापत्तेः पश्चात्तनतद्विध्यनुरोधेन । अतएव वेदोवा प्रायदर्शनादिति प्राथम्यरूपप्रायदर्शनेऽपरितोषेण धर्मोपदेशाच्चेतिसूत्रे इदमेव हेतूकृतम् । किञ्चोपक्रमे वेदशब्दस्त्रयो वेदा अजायन्त अग्नेर्ऋग्वेदो वायोर्यजुर्वेदः आदित्यात्सामवेद इत्यभ्यस्तमभ्यासश्चोपसंहारात्प्रबलः बहुबाधस्यान्याय्यत्वादिति तत एव निर्णयोस्तु । एवं च प्रायोवचनाच्चेत्यादाविव सूत्रस्थप्रायशब्दस्य बाहुल्यमर्थो लभ्यत इति न प्राथम्यं क्लिष्टतया तदर्थ इति कल्पनीयम् । अपिचर्ग्वेदमधीतवानित्यादिलौकिकप्रयोगाद्दर्भिः पूर्वाह्ण इति वैदिकप्रयोगाच्चर्गादिशब्दास्तत्तद्वेदवाचका इति नात्रोपक्रमोपसंहारवैरूप्यमपि येनोपक्रमानुसारेण निर्णयः शङ्क्येत । तस्मान्न वेदोपक्रमाधिकरणविरोधः नाप्यश्वप्रतिग्रहेष्ट्यधिकरणविरोधः । तत्रापि नोपक्रमानुसारेण दातुरिष्टिरिति निर्णयः किंतु कर्माङ्गत्ववशेन । तथा हि । अस्मादधिकरणात्पूर्वतने *दोषास्विष्टिर्लौकिकेस्या*दित्यधिकरणे इयमिष्टिरश्वप्रतिग्रहवतः कर्मणोऽङ्गं न स्वतन्त्रेतिस्थितम् । यदैवं स्थितं तदाऽङ्गप्रधानानामेकदेशकालकर्तृकत्वस्यापाताद्यः क्रतोः कर्ता तेनैवेयमपि कर्तव्या सिद्ध्यति । क्रतोः कर्ता स्वामी कर्मपरिक्रयादिति न्यायात् अश्वस्य दाता न प्रतिग्रहीता तस्मात्कर्माङ्गवशेन निर्णयो न तूपक्रमानुसारेण कथमन्यथा मैत्रायणीयशाखायां स एषोऽश्वः प्रतिगृह्यत इति । यदा तूपक्रमं विनाऽऽम्नातेयमिति दातुरिति सिद्ध्येत् । उक्तं च तन्त्रसारे । मैत्रायणीयशाखायां दात्रुपक्रमतोश्रुतेः । कर्माङ्गत्ववशाच्चेव दातुरिष्टिः प्रतीयत इति । वार्तिककृतापि सा लिङ्गादार्त्विजे स्यादित्यधिकरणे सिद्धान्तसूत्रे लिङ्गपदमङ्गस्य प्रधानेनैककर्तृकस्य सत एव यदुपकारजननसामर्थ्यन्तत्परमिति व्याकृत्य कर्माङ्गत्वेन दातुरिष्टि रिति निर्णयः कृतः । गुरुणाप्यधिकारान्तराकल्पनालाघवानुसारेण दातुरिष्टिरिति निर्णयः कृतः । न तूपक्रमप्राबल्येन यद्युपक्रमगतस्य दातुरिष्टिः स्यात्तदाऽश्वदानप्रयुक्तपौण्डरीकानुप्रवेशात्तत्फलेनैव फलवत्वमित्यधिकारान्तरस्याकल्पनीयत्वाल्लाघवं प्रतिग्रहीतुश्चेत्तस्य फलान्तरं कल्पनीयमिति गौरवं स्यादिति ।

यद्वा भाष्यकारान्तरैरत्र प्रतिग्रहीतुरेवेयमिष्टिर्व्यवस्थापितेति वार्तिकादिषूक्तत्वात् प्राभाकरैरपि पौण्डरीके भूय-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त इति कृत्वाचिन्तयेदमधिकरणं अन्यथा दातुरिष्टिरिति सिद्धान्तासिद्धेरितिवदद्भिः वस्तुतः प्रतिग्रहीतुरेवेयमिष्टिरित्याशयस्य स्फुटीकरणात् । याज्ञिकैरपि तथैव स्वीकृतत्वाच्च प्रतिग्रहीतुरेवेयमिष्टिरस्तु । अतो न क्वापि परेषामुपक्रमप्राबल्यशङ्का तेषामप्युपसंहारप्राबल्यानुपगमेऽक्ताधिकरणादिसिद्धान्तनिर्वाहो न स्यात् । अक्ताधिकरणे अक्ताः शर्करा उपदधाति तेजो वै घृतमित्यत्र येन केन चिद् घृततैलवसादीनामन्यतमेन द्रव्येणाञ्जनं कर्तव्यं विधौ विशेषाश्रवणादिति प्राप्ते वाक्यशेषे घृतसङ्कीर्तनात्तेनैवेति सिद्धान्तितम् । इदमुपसंहारप्राबल्यानभ्युपगमे न निर्वहति । उपक्रमप्राबल्येऽप्युपक्रमेऽञ्जनक्रियाक्षिप्तद्रवद्रव्यसामान्यनिश्चयाद्वाक्यशेषस्थस्य घृतपदस्य गुणेत्वन्याय्यकल्पनेति घृताघृतलक्षकत्वं वा घृतस्तुतेरेवाष्टाकपालादिस्तुतेरेवयवद्वाराऽवयविद्वादशकपालस्तुतौ पर्यवसानवद्विशेषणद्वारा सामान्यस्तुतौ पर्यवसानं वा कल्प्यत* विप्रतिपत्तौ विकल्पः स्यादसमत्वाद्गुणे त्वन्याय्यकल्पनैकदेशत्वादिति*नावमिकाधिकरणेह्यग्नीषोमीयपशौ श्रुतस्यादितिः पाशान्प्रमुमोक्तिति मन्त्रस्य पाशबहुत्वानुसारेण बहुपशुकेपूत्कर्षे प्राप्ते प्रधानस्य प्रातिपदिकार्थस्य पाशस्य विभक्त्यर्थस्य कर्मकारकस्य च प्रकृते सम्भवाद्गुणभूतायास्तद्बहुत्वसङ्ख्यायास्तत्रासम्भवे पि गुणानुसारेण नोत्कर्षो युक्त इति कथञ्चित्पाशावयवबहुत्वाभिप्रायेण छान्दसतया बहुवचनं नेतव्यमित्युक्तम् । तथा *पूर्ववन्तोविधानार्था* इति प्रमाणलक्षणाधिकरणे वैश्वानरं द्वादशकपालं निर्वपेत्पुत्रे जाते यदष्टाकपालो भवति गायत्र्यैवैनं ब्रह्मवर्चसेन पुनाति यन्नवकपालस्त्रिवृतैवास्मिन्तेजो दधाति यद्दशकपालो विराजैवास्मिन्नन्नाद्यं दधाति यदेकादशकपालस्त्रिष्टुभैवास्मिन्निन्द्रियं दधाति यद्द्वादशकपालो जगत्यैवास्मिन्पशून्दधाति यस्मिन्जातएतामिष्टिंनिर्वपति पूत एव तेजस्व्यन्नाद इन्द्रियावी पशुमान्भवतीति जातेष्टिविधावष्टाकपालादिशब्दा किं जातेष्टिमाश्रित्य ब्रह्मवर्चसादिफलोद्देशेन गुणविधायका उत द्वादशकपालस्तुत्यर्थावादा इति संशय्य द्वादशसु कपालेषु संस्कृतस्य पुरोडाशस्य द्वादशकपालशब्दाभिधेयस्य विहितस्याष्टाकपालादिशब्दैर्ग्रहणासम्भवेन तत्स्तुत्ययोगादष्टाकपालादिशब्दार्थस्याष्टाकपालादिसंस्कृतपुरोडाशस्याविहितत्वेन स्तुत्ययोगाद्यार्थवादत्वासम्भवेन गुणफल-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विधय इति पूर्वपक्षे प्राप्ते वैश्वानरं द्वादशकपालमित्युपक्रान्ताया इष्टेर्यस्मिन्जात इत्यादिनोपसंह्रियमाणतयोपक्रमोपसंहारैकरूपावगमितप्रधानभूतैकवाक्यत्वभङ्गप्रसङ्गान्न मध्ये गुणविधयोक्ताः कथंचिदष्टसंख्याऽवयवद्वारावयविद्वादशकपालस्तुत्यर्था एतेऽर्थवादा इत्युक्तम् । *सन्दिग्धे तु वाक्यशेषा*दित्यक्ताधिकरणे ऽक्ताः शर्करा इत्युपक्रमगतं सन्दिग्धमक्तपदं वाक्यशेषगतेन घृतपदेन निर्णीयते न तु बाध्यत इति चेन्न । अक्तपदस्याक्षादिपदवन्नानार्थत्वाभावेनार्थसन्देहाभावाद्विशेषसन्देहस्य घृतस्य नवपुराणादित्वादिसम्भवेन तादवस्थ्यात् । ननु तथापि सामान्यस्य विशेषपर्यवसानौचित्याद्विशेषविषयत्वादिहार्थवादानुसरणं नतूपसंहारवत्वादिति चेन्न । विशेषस्यापि सामान्योपलक्षकत्वसम्भवेन सामान्यस्य विशेषपर्यवसाननियमाभावाद्विशेषेणोपक्रम्य सामान्येनोपसंहारेऽप्युपसंहारानुसारेणोपक्रमस्थविशेषशब्दस्य सामान्यपरताया विष्णुशर्मा भोज्यतां ब्राह्मणः प्रशस्त इत्यादौ सिद्धत्वाच्च । ननु सामान्यशब्दस्योपसंहारानुसारेण सङ्कोचमात्रं न तु बाध इति चेन्न । सङ्कोचस्याप्येकदेशबाधत्वात् । अन्यथा पदशास्त्रेणाहवनीयशास्त्रस्य वाक्यादिना प्रकरणादेश्च सङ्कोचो बाधो न स्यात् । नन्वक्ताः शर्करा उपदधातीति वर्तमानापदेशेन प्रत्यक्षस्य विधेः स्तुत्युन्नेयत्वादुपजीव्यस्तुतिसमर्पकतया इहार्थवादोऽनुसृतो न तूपसंहारत्वादिति चेन्न । आख्यातश्रवणकाले वर्तमानोपधानाभावेन पञ्चमलकारकल्पनया वसन्ताय कपिञ्जलानालभत इत्यादिभिरर्थवादवाक्य इवस्तुतिमनपेक्ष्यैव विधिसिद्धेः इमां स्पृष्ट्वोद्गायेत् इमां ह्यौदुम्बरीं विश्वा भूतान्युपजीवन्तीति विषयवाक्यान्तरे लिङ एव श्रवणाच्च । ननु शब्दभावनेति कर्तव्यतारूपां प्ररोचनां विना प्रवर्तकस्य विधेरपर्यवसानाद्विधिना स्वसमाप्त्यर्थमपेक्षितत्वादिहार्थवादोऽनुसृतो नतूपसंहारादिति चेन्न । उपक्रमप्राबल्ये गुणभूतार्थवादस्थघृतशब्दस्य घृताघृतलक्षकत्वादिना स्तुतिपरत्वकल्पनेनैव निर्वहणीयत्वप्रसङ्गात् । तस्मात्प्रकारान्तरायोगादुपसंहारप्राबल्यादेवाधिकरणसिद्धान्तो निर्वाह्यः । तथा षष्ठे पशुचोदनायामनियमो विशेषा*दित्यधिकरणे यदग्नीषोमीयं पशुमालभेतेति विधौ विशेषाश्रवणाद्यः कश्चित्पशुरालब्धव्य इति प्राप्ते छागस्य वपाया मेदसोनुब्रूहीति मन्त्रे छागरूपविशेषश्रवणात्स एवाल-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ध्वर्य इति विधिप्रापितकर्मसमवेतद्रव्यप्रकाशकतया तदुपसंहार-रूपमन्त्रानुसारेण(१)सिद्धान्तोऽप्युपसंहारप्राबल्येन निर्वाह्यः। उपक्रमप्राबल्ये विधौ पशुसामान्यालब्धव्यत्वनिश्चयात्तदनुसारेणोपसंहारमन्त्रस्थछागशब्दस्यापि तत्सामान्योपलक्षणत्वप्रसङ्गात् । तद्वचपदेशाधिकरणे श्येनेनाभिचरन्यजेतेति विधौ श्येनशब्दमुख्यार्थत्वाय श्येनद्रव्यको यागः कर्तव्य इति प्राप्ते 'यथा वै श्येनो निपत्यादत्ते एवमयं द्विषन्तं भ्रातृव्यं निपत्यादत्ते' इति वाक्यशेषे मुख्यश्येनेऽसम्भवतः श्येनसादृश्यस्य वर्णमानुरोधेन श्येनशब्दस्य याग एव गौणी वृत्ति(२)र्वाक्यशेषानुसारेणेति सिद्धान्तोऽप्युपसंहारप्राबल्येन निर्वाह्यः। उपक्रमप्राबल्ये तत्स्थश्येनपदमुख्यार्थानुरोधेन वाक्यशेषस्य रामरावणयोर्युद्धं रामरावणयोरिवेति वत्कथञ्चिद्भेदेपि सादृश्य(३)-वर्णनप्रसङ्गात् ।

तथा चतुर्थे * फलसंयोगस्त्वचोदिते न स्यात् तस्याशेषभूतत्वा * दित्यधिकरणे जातेष्टेः पुत्र एव तेजस्वीत्यादिवाक्यशेषोक्तं फलमिष्टिकर्तुः पितुरेव न पुत्रस्यान्यगामिफले कर्मण्यन्यस्य प्रेरणानुपपत्तेरिति प्राप्ते येन वाक्यशेषानुसारेण फलमेतदुपनीयते तेन पुत्रगतमेवोपनीयते इति वचनप्रामाण्यात्पुत्रस्यैव फलमिति सिद्धान्तोऽप्युपसंहारप्राबल्येनैव निर्वाह्यः । अन्यथोपक्रमे पुत्रे जात इत्यसंवलितनैमित्तिकाधिकारतया प्रतीतायास्तस्या वाक्यशेषानुसारेण पुत्रगतपूतत्वादिफलकामसंवलितस्याप्राप्तेः तदा हि वाक्यशेषोऽर्थवादमात्रमेव स्यात् । किञ्चोपक्रमप्राबल्यवादे किमुपक्रमे प्रतीतमात्रस्य ग्राह्यत्वं किं वोपसंहारपरामर्शेन व्यवस्थितस्य, आद्ये श्येनादिवाक्यं श्येनादेर्ग्राह्यत्वापत्तिः द्वितीये उपसंहारस्यैव प्राबल्यं सिध्येदिति पूर्वः पक्षः ।

अत्र ब्रूमः । यत्तावदुपसंहारे प्राबल्ये कारणमुक्तं व्याख्यानरूपत्वम् । तन्न । तत्र किं (४) व्याख्येयपदोपादानेन स्पष्टं व्या-

(१) नेति अधिकं खपुस्तके । (२) वृत्तिरिति खपु० पा० ।

(३) सादृश्यपरत्वमिति खपु० पा० ।

(४) विरोधात् व्याख्यानरूपत्वमुत व्याख्येयपदोपादानेन व्याख्यानरूपत्वमित्याशयः आद्ये तत्तु न स्पष्टं परस्परविरोधपरिहाराय कल्प्य मिति चेन्नाद्यः इति खपु० पा० ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ख्यानरूपत्वमित्याशयः उत परस्परविरोधपरिहाराय कल्प्यमिति। नाद्यः अप्रसिद्धः । द्वितीये प्रथमश्रुतस्यैव चरमश्रुतव्याख्यानरूपत्वं किमिति न कल्प्यम् । व्याख्येयोपस्थितिसापेक्षत्वाद्व्याख्यानप्रवृत्तेस्तस्य पाश्चात्यत्वं नियतमिति चेन्न । पाश्चात्यभागश्रवणानन्तरमन्यतरस्य व्याख्यानरूपत्वकल्पकं विरोधप्रतिसन्धानं यदाऽवतरति तदा विरोधप्रतियोगित्वेन भागद्वयस्याप्युपस्थितत्वाविशेषेण प्रथमभागस्यापि पाश्चात्यभागव्याख्यानरूपत्वकल्पनोपपत्तेः । लोकं पुङ्गवं पश्य देवनायाक्षमानयेत्यादौ प्रथमश्रुतस्यापि चरमश्रुतव्याख्यानरूपत्वदर्शनात् । व्याकरणे च वृद्धिरादैजित्यादेः सिचि वृद्धिरित्यादिचरमश्रुतसूत्रस्थवृद्ध्यादिपदव्याख्यानरूपत्वदर्शनात् । तस्मात्परस्परविरोधस्थले परस्परव्याख्यानरूपत्वकल्पनमप्रमाणमिति नोपसंहारप्राबल्ये व्याख्यानरूपत्वं कारणम् । यत्तत्र परत्वं कारणमुक्तं पूर्वोपमर्देन परस्योत्पत्तिरिति । तदपि तुच्छम् । यदि हि परमुपद्येत तर्ह्येव तस्य पूर्वोपमर्देनोत्पत्तिरिति स्यात् न त्वत्र तस्योत्पत्तिः सम्भवति । तथा हि । किमत्रोपक्रमबाधकत्वेनाभिमतमुपसंहारार्थगोचरज्ञानमुपक्रमान्वितस्वार्थगोचरमु(१)पयते तदनन्वितस्वार्थगोचरं वा । नाद्यः । परस्परविरुद्धयोरुपक्रमोपसंहारयोरन्यतरस्य लक्षणया विरोधसमाधानात्प्राक्सम्भूयकारित्वासम्भवेन तदयोगात् । उपक्रमस्य लक्षणाऽभ्युपगम्यत इति चेन्न । उपक्रमबाधकत्वाभिमतोपसंहारार्थविषयज्ञानोदयात् प्रागुपक्रमप्रतीतार्थपरित्यागे कारणाभावेन तल्लक्षणाकल्पनस्य तद्बाधकत्वाभिमतज्ञानोदयस्य च परस्पराश्रयग्रस्तत्वेनैकस्याप्यसम्भवात् । न द्वितीयः । एकस्मिन्वाक्ये पूर्वपूर्वभागार्थान्वितस्वार्थबोधकत्वस्यैव व्युत्पत्तिसिद्धतया तदनन्वितोपसंहारार्थविषयज्ञानासम्भवात् । तथा व्युत्पत्तिनियमानभ्युपगमेप्युपक्रमोपसंहारयोर्विध्यर्थवादत्वादिरूपेणैकवाक्यत्वमनुसन्दधतामुपक्रमैकवाक्यत्वानुपपत्त्योपसंहारस्य लक्षणाकल्पनां विना मुख्यार्थबोधासम्भवात् । उपक्रमस्याप्युपसंहारैकवाक्यत्वानुपपत्तिस्तुल्येति चेत् । सत्यम् । उपक्रमदशायामुपसंहारो विरोधी नोपस्थित इति तदेकवाक्यत्वानुपपत्तिस्स्वरूपसती न प्रति-

(१) मुपेयमिति खपु० पा० ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

बन्धिका। इह तु ज्ञाताऽनुपपत्तिः प्रतिबन्धिकेति विशेषः। उपसंहारादप्युपक्रमैकवाक्यत्वमननुसन्दधतां मुख्यार्थबोधः सम्भवतीति चेन्न। तथाप्युपक्रमैकवाक्यत्वे उपसंहारादर्थप्रत्ययकाले वेदपाठक्रमानुसारेण नियमतोऽनुसन्धातुं योग्ये विद्यमाने उपक्रमाश्रवणतदर्थानवगमतद्भिन्नवाक्यत्वभ्रमात्पुरुषदोषमात्रेणाननुसन्धीयमाने सम्भवतः तस्मिन्ननुसन्धीयमानेऽसम्भवतः प्रत्ययस्यापातप्रत्ययत्वेन तस्योपक्रमबाधकत्वायोगात् । अन्यथा परप्राबल्येप्युपक्रमस्य पूर्वत्वमननुसन्दधतां पश्चाच्छ्रुतात्तस्मात्प्रथमश्रुतोपसंहारैकवाक्यत्वाननुसन्धानेन जातस्य ज्ञानस्योपसंहारबाधकत्वापत्त्योन्मत्तकोक्तित्वप्रसङ्गात् । न ह्युद्गातृप्रतिहर्त्रपच्छेदयोरिवोपक्रमोपसंहारयोर्यदा यः पश्चादुपस्थितस्तदा तत्पूर्वस्य बाध इत्यनियतो बाध्यबाधकभावः परेणाप्यङ्गीक्रियतेऽतोऽत्र न परप्राबल्यन्यायावतारः किन्तु यत्रापच्छेदादौ वस्तुतोऽप्येकवाक्यत्वाभावात्तदनुपपत्त्यभावेन परं निर्दोषं ज्ञानमुत्पद्यते तत्रैव तस्य परत्वेन पूर्वबाधकत्वम्। य(१)त्त्वेकवाक्यत्वं तत्र वेदपाठक्रमानुसारेण प्रथमोपस्थितोपक्रमार्थज्ञानानन्तरन्तदेकवाक्यतयोपनिपतन् उपसंहारस्तद्विरुद्धार्थश्चेन्न मुख्यार्थतया तेनान्वेतुं युक्त इति लक्षणाकल्पनापूर्वकं तदेक(२)कन्टकतयैव तस्यार्थबोधकत्वं न तु तद्विसम्प्रतिपत्त्योपक्रमाननुसन्धाने तद्विसम्प्रतिपत्त्या बोधकत्वसम्भवेपि तदानीन्तनज्ञानं दोषजन्यमापातप्रत्ययरूपमेवेति तद्विरुद्धार्थनिर्दोषज्ञानोदयाभावात् न तस्य परत्वेन बाधकत्वशङ्का । एतेनोपक्रमप्राबल्ये आपातप्रत्ययस्यैव सर्वत्र प्राबल्यापत्त्या विमर्शनैरर्थापत्तिरित्यपि परास्तम् । पूर्वेण परमुत्पत्तिप्रतिबन्धेन हि बाधनीयं न चोपसंहारप्रत्यये उपक्रमैकवाक्यत्वानुपपत्तिवत् श्येनादिवाक्यादापातप्रत्ययानन्तरं न्यायानुगृहीतवाक्यार्थज्ञानोत्पत्तौ किंचित्प्रतिबन्धकमस्ति ततश्च न्यायेन निरुपपत्तिकं पूर्वप्रत्ययं तिरस्कुर्वत्परमुत्पद्यते इति न पूर्वप्राबल्ये एतादृशशङ्कावकाशः ।

किं च प्राबल्येपि न्यायानुगृहीतवाक्यार्थज्ञानानन्तरं न्यायाभासक्षुभितचित्तस्य तदेवापातज्ञानं पुनरपि सम्भवतीति तेन तस्य बाधः किन्न स्यात्। न च तत्रापि बाधाभिमान इष्ट इति वाच्यम्। वस्तुतो

---

(१) यत्त्वेकेति खपु० पा०। (२) तदेकवाक्यतयैवेति खपु० पा०।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

बाधप्रयोजके परत्वे सति तेनैव भाव्यतयाऽभिमानमात्रेणाचरितार्थत्वात् सन्न्यायोपबृंहितवाक्यार्थज्ञानस्य तद्विरोधिज्ञानं परत्वेपि न बाधकमिति चेत् पूर्वत्वेप्येवं वक्तुं शक्यमिति किमिति नावबुध्यसे। यत्तूपक्रमाधिकरणे उपक्रमप्राबल्यमनपेक्ष्य न्यायान्तरेण स्वराणां वेदधर्मत्वनिर्णय इत्युक्तम्।तन्न न तावदृगादिधर्मत्वे उच्चैः साम्नेत्यस्य वैयर्थ्यापत्तेस्तेषां वेदधर्मत्वनिर्णाय इत्यु(१)क्तम् । ऋगा(२)ध्यारूढेषु स्तोभाक्षरनिर्वर्त्यगीतिभागेषूच्चैष्ट्वसिद्ध्यर्थतया तस्य सार्थकत्वात् । ननु पूर्वपक्ष्युपपादितरीत्यर्चामुच्चैष्ट्वे तदारूढे साम्नि स्वरान्तरं कर्तुं न शक्यत इति ततः साम्न्युच्चैष्ट्वसिद्धिरुच्यते चेत्तदनध्यारूढेषु स्तोभगीतिभागेषु स्वरान्तरस्य कर्तुमशक्यतया तत्प्रसक्तौ तेषूच्चैष्ट्वनियमसिध्यर्थत्वेनोच्चैस्साम्नेत्यस्य सार्थकत्वं स्यादिति दूषणं भवतु नाम । मीमांसकमर्यादा तु न भविष्यति । उच्चैर्ऋचा क्रियत इति ऋक्करणकभावनायां विधीयमानस्योच्चैष्ट्वस्योच्चैः प्रवर्ग्येण चरन्तीति प्रवर्ग्यकरणकभावनायां विधीयमानस्येवाङ्गप्रधानार्थतयाऽक्षराभिव्यक्तिद्वारा ऋगङ्गे साम्नीव गीतिकालपरिच्छेदकत्वेन तदङ्गेषु स्तोभगीतिभागेष्वपि तत एवोच्चैष्ट्वलाभात् ।

सत्यम् । एवमपि प्रजापतेर्हृदयादिसामसु ऋगङ्गेषु उच्चैस्साम्नेत्यस्य सार्थकत्वं न निवार्यते।प्रजापतेर्हृदयादि ज्योतिष्टोमे नास्तीति चन्माभूत् यत्रास्ति तत्र सार्थक्यं भविष्यति।तथासति प्रकरणादुत्कर्षःस्यात् इति चेत् ।तत्किं सिद्धान्ते नास्ति तत उत्कर्षः। अवश्यं हि तस्य सिद्धान्तेप्युत्कर्षो वाच्यः । ज्योतिष्टोमस्य* भूयस्त्वेनोभयश्रुती* त्यधिकरणे याजुर्वैदिकत्वव्यवस्थापनेन तदङ्गानां केषां चित्सामवेदविहितत्वेपि वेदान्तरविहितानामङ्गानां साङ्गप्रधानविधायकप्रधानवेदस्वर एव नाङ्गवेदस्वर इति * गुणमुख्यव्यतिक्रमे तदर्थत्वान्मुख्येन वेदसंयोग * इत्यधिकरणे व्यवस्थापनेन च ज्योतिष्टोमतदङ्गेषु सामवेदस्वरस्य निरवकाशत्वात् । त्रयाणामपि वेदस्वरविधीनां प्रकरणादुबलीयोभिर्बाधकैः स्तत्तद्वेदविहितसकलकर्मविषयत्वमभ्युपगम्यैव गुणमुख्यव्यतिक्रमाधिकरणे याजुर्वैदिकाधानाङ्गस्य

---

(१) इति युक्तमिति स्वपु० पा० ।
(२) ऋगनध्यारूढेषु इति स्व० पु० पा० ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सामवेदोत्पन्नस्य वारवन्तीयसाम्नः प्रधानवेदस्वर एव नोत्पत्तिवेदस्वर इति निर्णीतत्वाच्च । अपि च स्वरविधीनामृगादिधर्मत्वपक्षे उच्चैस्साम्नेत्यस्यानुत्कर्षो वक्तुं शक्यः। प्रजापतेर्हृदयेनापि पक्षं प्रत्युपतिष्ठत इत्यग्नौ श्रवणात्। अग्नश्च प्रकृतौ ज्योतिष्टोमे ऽपि मन्द्राचस्य दाशमिके* अग्न्यतिग्राह्यस्य विकृतावुपद्रेशादप्रवृत्ति* रित्यधिकरणे समर्थितत्वात्। ननु च प्रजापतेर्हृदयादिमात्रविषयत्वे उच्चैः साम्नेति स्वरविधानमल्पविषयमनर्थकप्रायं स्यात् अत एव प्रजापतेर्हृदयादिविषयत्वे इदमेव दूषणं वार्तिके दर्शितमिति चेन्न । वेदधर्मत्वपक्षेपि त्रयाणामपि स्वरविधीनां वाचानिकस्वरान्तरविधानादिविषयपरिहारेण उपक्रमप्राबल्यमेव मूलयुक्तिः धर्मोपदेशादित्यभ्युच्चयमात्रमिति दर्शयितुमेव वार्तिके प्रजापतिहृदयविषयत्वेन सार्थकत्वशङ्कामुद्भाव्य तत्र तात्कालिकं समाधानाभासं प्रदर्श्य तदाभासत्वमप्यग्रे स्वयमेवाविष्कृतम् । तस्माद्धर्मोपदेश इत्यभ्युच्चय इति न ततो वेदधर्मत्वनिर्णय इत्यु(१)क्तं नाप्यभ्यासात्तन्निर्णय इत्युक्तम्। बहुबाधस्याप्यन्याय्यत्वादिति हि तत्रमूलम् । नचाभ्यस्तवेदशब्दार्थबाधे बहुबाधः चतुर्णामेव हि वेदशब्दानां तदा लक्षणा स्यात् ऋगादिशब्दार्थबाधे त्वग्नेर्ऋग्वेद इत्यादावुच्चैर्ऋचा क्रियत इत्यादौ च श्रुतानां षण्णामृगादिशब्दानां लक्षणेति तत्रैव बहुबाधः स्यादिति नात्राभ्यासप्राबल्यं वेदशब्दार्थबाधे ह्यग्नेर्ऋग्वेद इत्यादावप्यृगादिशब्दार्थबाध आवश्यकः मिथार्थयोः सामानाधिकरण्यस्यान्यतरलक्षणया समर्थनीयत्वात्। किंचाग्नेर्ऋग्वेद इत्यादौ तस्माद्दचा क्रियत इत्यादौ चर्गादिशब्दस्याप्यस्त्यभ्यासः । न च वेदशब्दश्चतुर्वारमावर्त्तितः ऋगादिशब्दास्तु द्विवारमित्यृगादिशब्दाभ्यासाद्वेदशब्दाभ्यासो गरीयानिति वाच्यम्। उच्चैर्ऋग्धर्मो वेदविशेषधर्मो वोपांशुत्वं यजुर्धर्मो वेदविशेषधर्मो वे(२)त्यादिसन्देहत्रयापाकरणाय प्रत्येकं वेदशब्दाभ्यासे वक्तव्ये त्रयो वेदा अजायन्तेति साधारणोपक्रमगत एकस्तत्तदृगादिशब्दसमानाधिकृत एक इति प्रत्येकं वेदशब्दद्वयस्यैव सम्भवेन साम्याद्यजुरादिशब्दसमानाधिकृ-

---

(१) इति न युक्त मिति खपु० पा० ।

(२) उच्चैर्ऋं सामधर्मो वा वेदशेषधर्मोवेति उपांशुत्वादित्रयसन्देहेत्याद्यधिकं खपु० पाठे ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तत्रेदशब्दस्य भिन्नविषयस्यर्गादिशब्दार्थनिर्णयेऽनुपयोगात् । तस्मान्नाभ्यासाद्वेदधर्मत्वनिर्णयः शक्यःकर्तुमिति सूत्रस्थप्रायशब्दस्य बाहुल्यार्थो भाष्यकारादिभिर्न स्पृष्टः ।

यत्तृगादिशब्दानामपि वेदवाचकत्वादुच्चैष्ट्वादीनां वेदधर्मत्वनिर्णय इत्युक्तम् । तत्तुच्छम् । तेषा मृग्यत्रार्थवशेन पादव्यवस्थेत्यादिशब्दार्थनिर्णयाभियुक्तानादिवृद्धव्यवहारानुसारेणर्च एव मधुकृत ऋग्वेद एव पुष्पं यजूंष्येव मधुकृतो यजुर्वेद एव पुष्पं सामान्येव मधुकृतस्सामवेद एव पुष्पमित्यादिवैदिकप्रयोगानुसारेणर्गादिशब्दानां मन्त्रविशेषादिवाचकत्वेऽवश्याङ्गीकर्तव्ये तत्सम्बन्धविशेषादेव तेषां वेदविशेषेषु लक्षणया प्रयोगोपपत्त्याऽनेकार्थकल्पनस्यान्याय्यत्वात् । यत्तु क्वचिदुक्तं निगदाधिकरणोदाहृतेन वेदोपक्रमरहितेनोच्चैर्ऋचा क्रियते नीचैस्साम्नोपांशु यजुषोच्चैर्निगदेनेति वाक्येनोच्चैस्त्वादेर्मन्त्रधर्मतया उक्तत्वात् वेदोपक्रमतापयुच्चैर्ऋचेत्यादिवाक्येन मन्त्रधर्मताया उक्तावेकस्मिन्साम्न्युच्चैष्ट्वनीचैष्ट्वयोर्विरुद्धयोरष्टदोषदुष्टो विकल्पः प्रसज्येतेति वेदोपक्रमवाक्ये वेदधर्मता नतूपक्रमप्राबल्यात् तथा चेदमपि वेदोपक्रमाधिकरणगतस्य लिङ्गाच्चेति सूत्रस्यार्थोऽस्त्विति । तदतितुच्छम् । नहि वेदोपक्रमाधिकरणविषयवाक्यान्निगदाधिकरणविषयवाक्यं भिन्नं येनोभयत्र पाठभेदः शक्येतापि । कथं तर्हि निगदाधिकरणे *निगदोवा चतुर्थः स्याद्धर्मविशेषादिति* सूत्रेणाग्नीदग्नीन्विहर बर्हिस्तृणीहीत्यादिपरप्रेषणरूपे निगदश्चतुर्थस्मन्त्रजातं स्याद नृक्सामरूपस्य तस्योपांशु यजुषोच्चैर्निगदेनेति धर्मान्यत्वेन यजुर्जातादपि भिन्नत्वादिति पूर्वपक्षितम् । न हि वेदोपक्रमाधिकरणविषयवाक्य उपांशुत्वं यजुर्जातधर्मः येन धर्मान्यत्वं हेतुः सिद्धवदुपादीयेतेति चेत्सत्यम् । वेदोपक्रमाधिकरणपूर्वपक्षरीत्योपांशुत्वं यजुर्जातधर्म इत्युपेत्य स हेतुरुक्तः । उक्तं हि न्यायसुधायां निगदाधिकरणे वेदो वा प्रायदर्शनादित्यत्रोच्चैस्त्वोपांशुत्वयोर्वेदधर्मत्वे वक्ष्यमाणेपि तत्रस्यपूर्वपक्षे स्थित्वोपांशुत्वस्य यजुर्जातधर्मत्वेनोच्चैस्त्वस्य तदन्यतोक्तेति तत्रैव व्यपदेशाच्चेति द्वितीयस्य पूर्वपक्षसूत्रस्यापि प्रयोजनमुक्तम् । धर्मान्यत्वस्य तार्तीयवाक्याधिकरणविरुद्धत्वेनाभ्युच्चयमात्रत्वान्न मुख्यहेत्वभिधानार्थमिदं सूत्रमिति । ननु नयविवेके वेदोप-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

क्रमाधिकरणविषयवाक्यान्निगदाधिकरणविषयवाक्यस्य भेदोऽभ्युपगतः । सत्यं निगदाधिकरणभाष्ये उच्चैस्त्वादीनां मन्त्रधर्मत्वव्यवहारदर्शनात् तत्स्वारस्यानुरोधेन तत्र तद्भेदोऽभ्युपगतः । ननु निगदोपक्रमाधिकरणविषयवाक्ययोः पाठभेदो ऽभ्युपगतः प्रत्युत तद्भेददर्शनग्रन्थेनैव तयोः पाठभेदोऽप्युद्घाटितः तत्र ह्युच्चैष्ट्वादीनां निगदाधिकरणे मन्त्रधर्मत्वमुक्तं वेदोपक्रमाधिकरणे वेदधर्मत्वमिति विरोध इति शङ्कायां वेदोपक्रमवाक्यान्निगदाधिकरणविषयवाक्यान्तरतया तत्समाधानमुखेन तयोर्भेदः प्रदर्शितः । एवमभेदभ्रान्तिमूलविरोधशङ्काया भेदप्रदर्शनेन निरसनं पाठभेदमेव व्यवस्थापयति पाठभेदभ्रमायोगात् । वेदोपक्रमाधिकरणवरदराजीयेपि तदधिकरणपूर्वपक्षरीत्या वेदोपक्रमवाक्यस्य मन्त्रधर्मस्वरविधायकत्वे निगदाधिकरणादाहृतवाक्यान्तरमन्त्रधर्मस्वरसिद्धेरेतद्वैयर्थ्यं स्यादिति शङ्कया एतदधिकारान्वयपरं तदाश्रयान्वयपरमिति वैयर्थ्यपरिहारेण च पाठभेदः स्फुटीकृतः । न हि क्वचित्साम्युच्चैष्ट्वविधिरन्यत्र नीचैस्त्वविधिरिति भेदे एकेनान्यस्य सिद्धार्थतया वैयर्थ्यशङ्कोन्मिषति । न वा विधेयभेदे एकमपूर्वान्वयबोधकमन्यदपूर्वीयमन्त्रविशेषान्वयबोधकमिति सार्थकत्वोपपादनं सङ्गच्छते इत्यलमतिविस्तरेण । तस्माद्वेदोपक्रमप्राबल्येनैव वेदधर्मत्वनिर्णयः ।

अश्वप्रतिग्रहेष्ट्यधिकरणेपि न पूर्वाधिकरणसिद्धकर्माङ्गत्ववशेन दातुरिष्टिरिति निर्णयः अन्योन्याश्रयापत्तेः । पूर्वाधिकरणे ह्येतदधिकरणसिद्धं दातु रिष्टिरित्यनुमर्थमवेक्ष्य कर्माङ्गत्वनिर्णयः । यदि ह्यृत्विजः प्रतिग्रहीतुरिष्टिः स्यात्तदा तस्याधिकारसिद्धये तद्गाम्येव फलं कल्पनीयमिति कथं यजमानगामि फलङ्कर्माङ्गत्वं भवेत् । अत एवोत्तराधिकरणन्यायेन दातुरिष्टिरिति स्थिते इदमधिकरणमारभ्यमिति भाष्यादिषु दर्शितम् । ननु प्रतिग्रहीतुरिष्टिरिति पक्षेपि कर्माङ्गत्वं सिध्यति यजमानस्यापि द्वादशरात्रीर्दीक्षितो भूतिं वन्वीतेति विहितदक्षिणार्थद्रव्ययाचनरूपभूतिवनतप्राप्तेश्च प्रतिग्रहीतृत्वात् । यद्येवं न कर्माङ्गत्वेन दाननिमित्तेष्टिः सिध्यति । कर्ममध्ये प्रतिग्रहीतुर्यजमानस्य हयांसि मम भोगाय भवेत्यश्वप्रतिग्रहनिमित्तेयमिष्टिः कर्माङ्गभूतेति वक्तुं शक्यत्वात् । वार्तिकेपि सालिङ्गादार्त्विजे स्यादिति सूत्रं व्याख्यातम् । कथं तर्हि मैत्रायणीयशाखायां दातुरिष्टि रिति भवि-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ष्यति । दातृविषयोपक्रमवशात्कर्माङ्गत्वेन सूत्रस्थलिङ्गपदङ्गमसामर्थ्यपरं व्याख्याय तत्रापरितोषेणैवोपक्रमप्राबल्यरूपवाक्यसामर्थ्यपरत्वेन सिद्धाया इष्टेः शाखान्तरेप्यभेदात्तत्रापि दातृविषया भविष्यति इत्येतदभिप्रायेणैवोक्तम् । तन्त्रसारे मैत्रायणीयशाखायामित्यादि यथाश्रुते प्रतिग्रहीतुरेव वा साभवतु । अत एव वार्तिके मैत्रायणीयशाखावाक्यमेवाधिकृत्योक्तम् 'यत्तु प्रतिग्रहीतुर्विधायकं तद्यदि तावत्कर्माङ्गत्ववशेन विनाप्युपक्रमविशेषात्पूर्ववाक्यानुसार्येव भवति ततस्तेनापि दातुरेव । अथतु स्वतन्त्रप्रतिगृह्णातिवशात्प्रतिग्रहीतुर्विधायकम् ततः प्रतिग्रहीतुः पूर्ववाक्याच्च दातुरित्युभौ करिष्यत' इति तस्मान्न कर्माङ्गत्वेन दातुरिष्टिरिति निर्णयः नाप्यधिकारान्तराकल्पनालाघवेन प्रतिग्रहनिमित्तत्वेपि भृतिवचनप्राप्ताश्वप्रतिग्रहप्रयुक्तपौण्डरीकानुप्रवेशसम्भवेनाधिकारान्तरस्याकल्पनीयतया लाघवाविशेषात् । यत्तु भृतिवचनप्राप्ताश्वस्वीकरणस्वैधदानसम्बन्धित्वाभावान्न प्रतिग्रहरूपमिति । तत्तुच्छम् । चन्द्रमसि मम भोगायभवेत्याह यथादैवतमेवैनाः प्रतिगृह्णातीति श्रुत्यैव तस्य प्रतिग्रहरूपतोक्तेर्गुर्वर्थनिवेशौषधार्थवृत्तिक्षीणयक्ष्यमाणाध्यापनाध्वसंयोगवैश्वजितेषु द्रव्यसम्बिभागो बाहर्वेदिभिक्षणमाणेष्विति स्मृतौ यज्ञार्थमर्थिने दानस्याप्यावश्यकत्वेन विहितत्वाच्च । गुरुणाप्याधिकारान्तरप्रसङ्गादिति न मूलयुक्तितयोक्तम् । अत एवोपक्रमतो दाननिमित्तताबुद्धौ विपरिवर्तमाना यथावभातितथावधारयितुं युक्तेत्यनन्तरो गुरुग्रन्थो मूलयुक्तिमाहेति दीपशिखायामवतारितः ।

यत्तु भाष्यकारमतानुरोधात्प्रतिग्रहीतुरियमिष्टिरस्त्वित्युक्तम् । तदयुक्तम् । तर्हि सा लिङ्गादार्त्विजे स्यादिति सूत्रानुरोधादृत्विक्कर्मणि प्रतिग्रहे इयमिष्टिः नतु यजमानकर्मणि दाने इतियुक्तम् । नच तदुपपद्यते । ऋत्विक्प्रतिग्रहस्य निमित्तत्वेऽधिकारकल्पनावश्यम्भावेन यावतोश्वान्प्रतिगृह्णीयादित्यविशेषश्रवणाल्लौकिकप्रतिग्रहस्यापि निमित्तत्ववुर्वारतयर्त्विक्प्रतिग्रहस्यैव निमित्तत्वमिति नियन्तुमशक्यत्वेन तेषां तत्सूत्रानुरोधलाभाभावात् पूर्वाधिकरणपूर्वोत्तरपक्षसूत्रद्वयानाञ्जस्यापत्तेश्च । तत्र * दोषात् त्विष्टिर्लौकिके स्याच्छास्त्राद्धि वैदिके न दोषः स्यादिति * सूत्रेणेयमिष्टिर्लौकिकेनिमित्ते

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ति पूर्वपक्षं कृत्वा * अर्थवादो वानुपपत्तात्तस्माधश्चे प्रतीयेतेति * सूत्रेण वैदिकानिमित्तेति सिद्धान्तितं तद्दातुरिष्टिरित्येतदधिकरणसिद्धान्ताभ्युपगमे श्लिष्यते येयं दातुरिष्टिः सा किं लौकिकेऽश्वदाने मित्रदायादादिभ्यः स्नेहाद्युपाधिना कृते न केसरिणो ददातीति प्रतिषिद्धे दोषनिर्घातार्था स्यादुत पौण्डरीकादिदक्षिणारूपाश्वदाने निमित्ते तद्दाननिमित्तकर्माङ्गभूतेति संशये वरुणग्रह(१)दोषश्रवणात्प्रतिषिद्धे लौकिके इयमिष्टिर्न वैदिके, अन्वहं द्वादशानि शतानि ददात्यश्वसहस्रमुत्तम इत्यादिविशेषविषयत्वेन दोषास्पृष्टत्वादिति प्राप्तौ लौकिकाश्वदातुर्वरुणग्रहशब्दितजलोदरव्याधिप्रादुर्भावस्याहृष्टत्वेन तन्निर्घातस्य फलत्वकल्पनायोगात् दोषश्रवणस्य साहश्यनिबन्धनावश्यकर्तव्यतापरार्थवादमात्रत्वान्न तदनुरोधेन लौकिके (२) किन्तु वैदिक्या इष्टेर्वैदिकमेव निमित्तं बुद्धिस्थं भवतीति तदतिक्रमे कारणाभावात् वैदिके निमित्ते (३) नेयमिष्टिः। न च वाक्येन वैदिकत्वसामान्यस्य बुद्धिस्थत्वापादकतया सन्निधिलक्षणस्यामरूपस्य बाधादश्वदानमात्रे निमित्ते सेयमिष्टिरस्त्विति शङ्क्यम्। लौकिके पुरुषार्थत्वं वैदिके क्रतुशेषतेतिवैरूप्यापत्तेरितिसिद्धान्त इति प्रतिग्रहीतुरिष्टिरित्येतदधिकरणसिद्धान्ताभ्युपगमे तु किमेषा लौकिके प्रतिग्रहे वैदिकेवेति विचारपरं (४) वक्तव्यम्। तत्र लौकिकवद्वैदिकस्याप्यृत्विक्प्रतिग्रहस्य विशेषविध्यभावेन नोभयतो दतः प्रतिगृह्णातीति दोषवत्वाच्छास्त्राद्वैदिके न दोषः स्यादिति न सङ्गच्छते। अतएव वैदिकस्य वेदविहितमेव निमित्तं बुद्धिस्थं भवतीति न्यायाप्रसरात् कर्माङ्गत्वहेत्वभावेन केवलं पुरुषार्था सती लौकिकेपि स्यादिति यज्ञइत्यपि न सङ्गच्छते। आर्त्विज इति ऋत्विजां सम्बन्धी यजमानः तस्मिन्दातरीयमिष्टिः स्यादित्यादिप्रकारेण वार्तिकएव योजितम्। याजकाः प्रतिग्रहीतुरेवेयमिष्टिरिति वदन्तीत्येतत्तु वयं न जानीमः। यदि च ते मैत्रायणीयशाखायां दा(५)तृप्रतिग्रहसद्भावात् ततः प्रति-

(१) ग्रहणेति खपु० पा०। (२) नेयमिष्टिरिति कपु० नास्ति।
(३) लौकिकं निमित्तं इति खपु० पा०।
(४) तदिति खपु० पा०।
(५) दातृप्रक्रमाभावादिति खपु० पा०।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ग्रहीतुरियमिष्टिरिति वदेयु स्तदा कोविरोधः । उक्तं हिवार्तिके । प्रतिग्रहीतरि स्पष्टं यदि वाक्यान्तरं तदा । भवेत्तस्यापि तेनेष्टिर्दातुस्तु न निवार्यते इति । प्राभाकरैः पौण्डरीके श्रूयत इति कृत्वाचिन्ता न दातुरिष्टिरिति सिद्धान्तसिद्धार्थमुक्त्वा किमुपक्रमबलाद्दातुरिष्टिरिति सिद्धावपि वैदिके दान इत्यनारभ्याधीतवाक्यान्न सिध्यति वैदिकस्य वैदिकमन्त्र निमित्तमिति नियमस्य क्षामवत्यादिषु व्यभिचारेणासिद्धेः तत्सिद्धावपि क्रतुदक्षिणारूपाश्वदानं निमित्तमिति न सिद्ध्यति स्मृतिपुराणादिप्रसिद्धसूर्यप्राप्त्यादिफलकाश्वदानानामपि 'ये अश्वदाः सह ते सूर्येणे'त्यादिवेदमूलानां सत्वात्तत्सिद्धावपि कर्माङ्गत्वं न सिध्यति क्रतुदक्षिणारूपस्याश्वदानस्याव्यभिचरितक्रतुसम्बन्धित्वेपि पर्णतावैषम्यात् पर्णतायाः शेषीभूतजुहून्वयप्रतीतेस्तद्वदपूर्वार्थत्वं, इह तु दानं निमित्तत्वेन श्रुतं न शेषित्वेनाप्यन्वयार्हं निमित्ततया अन्वये मुख्यार्थता शेषितान्वये नियोगीयलक्षणेति वृत्तिद्वयासम्भवात् इत्यनुशयानैः कर्माङ्गत्वसिध्यर्थं(१)सोक्ता। नचकर्माङ्गत्वनिवृत्तावधिकारान्तरकल्पनायां प्रसक्तायां रात्रिसत्रवदार्थवादिकपापविमोकार्थिनोधिकारःकल्प्यः पापन्तु प्रतिगृहीतुरेव न दातुःयद्यपि प्रतिगृहीतुरपि यथाश्रुतार्थवादप्रतीति वरुणग्रहनिर्मोक्फलकल्पनमशक्यं तथापि अश्रुतफलकल्पनातो वरमयोग्यांशत्वव्युदासेन पापापनयनमात्रस्य फलकल्पनमित्युपक्रमोपसंहाराभयसामञ्जस्यलाभात् प्रतिगृहीतुरेवेष्टिः स्यादिति दातुरिष्टिरिति सिद्धान्तसिद्ध्यर्थमेव सोक्तेति वाच्यम् । न केसरिणो ददातीति निषेधेन लौकिकाश्वदातुरपि पापसद्भावात् । नचायं विश्वजित्प्रकरणाम्नातत्वात्तत्रत्यसर्वस्वदानविधिशेषपर्युदासो न लौकिकाश्वदाननिषेध इति वाच्यम्। लौकिकाश्वदाननिषेधेन सम्भवाच्चरितार्थत्वे न केसरिवाक्येनान्यगतिकयेयजमाहवाक्यवद्गुणानाञ्च परार्थत्वादिति न्यायविरुद्धस्य गुणवाक्यं सत् गुणवाक्यान्तरशेष इत्यस्य कल्पयितुमशक्यत्वात् न केसरिणो ददाति नोभयतो दतः प्रतिगृह्णीयादिति सम्प्रतिपन्नपुरुषार्थविशेषसाहचर्येण पुरुषार्थपरत्वस्यैव प्रतीयमानत्वाच्चेत्यनुशयानैः तत्सिद्ध्यर्थं सोक्ता तस्मादिय-

(१) नोक्तेति खपु० पा० ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मिष्टिर्दातुरेव उपक्रमानुसारेणैव च तथा सिद्ध्यतीत्यलं विस्तरेणाथत्त्व-
क्ताधिकरणसिद्धान्त(१)उपसंहारप्राबल्यनिर्वाह्य इत्युपक्रमप्राबल्यो-
पगमे तद्विरोधापादनं तन्न। न तावदक्ताधिकरणविरोधः। त्रयो वेदा
अजायन्तेत्युपक्रमे उपसंहारगतऋगादिविरोधिनां वेदानामिव अ-
क्ता इत्युपक्रमे तद्गतविरोधिनां तैलादीनां प्रतीतेरभावात्। ननु त-
त्र तैलादीनां शब्दतः प्रतीत्यभावेपि शब्दोपात्ताञ्जनक्रियाक्षिप्तद्र-
व्यविशेषतया प्रतीतिरस्तीति चेन्न। अर्थवादश्रुतस्य घृतस्यैव त-
त्साधनत्वेनान्वयसम्भवे आक्षेपानवतारात् शीघ्रप्रवर्त्तमाननिराकाङ्क्षी-
कृतेर्थे विलम्बितस्य श्रुतिविनियुक्तमन्त्रस्य विनियोगे मन्त्रलिङ्गस्येव
अप्रवृत्तेः। यदि हि अर्थवादान्वयात् प्राग्विध्युद्देशः पर्यवस्येत् तदा
तदाक्षिप्ततैलसाधननिर्णयादर्थवादस्तदनुरोधेन नेतव्यः स्यादपि न-
त्वेवं, प्ररोचनां विना विधेः पर्यवसानासम्भवात् अनेनैवाशयेन
प्ररोचनानपेक्षविध्यपर्यवसानं वार्तिके दर्शितम्। *समाप्यते विधिः
कश्चित्कदा चिन्न प्ररोचितः। घृते प्ररोचनां दृष्ट्वा विधिस्तत्रानुमीयत
इति* सन्दिग्धे तु वाक्यशेषादिति*सूत्रेप्यनेनैवाभिप्रायेण प्ररोचना-
नपेक्षविध्यपर्यवसानं दर्शितम्। इदं सूत्रं न्यायसुधायामेवं व्याख्यातं
अर्थाद्वा कल्पनैकदेशत्वादिति उत्तरसूत्रात्कल्पनैकदेशत्वादिति पद-
द्वयमिहानुषङ्गनीयं तथाचायमर्थः सन्दिग्धेषु वाक्यशेषादर्थवादा-
त्कल्पना घृतादेर्व्यवस्थयावधारणा एकदेशत्वात् एकोर्थो दिश्यते-
प्रतिपाद्यते याभ्यां विध्यर्थवादाभ्यान्तावेकदेशौ तत्वात् विध्यर्थवा-
दयोरेकार्थप्रतिपादकत्वात्। यदि हि अर्थवादान्वयं विना विद्ध्यु-
द्देशः पर्यवस्येत् तदा वाक्यैकवाक्यतयान्वयिनोर्थवादस्यान्वयात्प्रा-
गेवार्थाक्षिप्तद्रवद्रव्यविशेषकल्पनया निर्णये जाते पश्चात्तनार्थवादा-
नर्थक्यपरिहाराय वैकृताङ्गवदन्यतराकाङ्क्षयार्थवादस्यान्वये सत्यपि
निर्णीतार्थत्यागायोगात् तदनुरोधेन अर्थवादस्यैव घृताघृतलक्षक-
त्वं स्यादपि नत्वेवं, प्ररोचनाम्विना प्रवर्तकस्य विधेः पर्यवसानास-
म्भवात्। तथाच शीघ्रप्रवृत्तिकप्रत्यक्षश्रुतिप्रापिते घृतरूपविशेषे सति
उपक्रमस्थेनापि द्रवद्रव्यसामान्येन तैलादिविशेषो नाक्षिप्यते नैराका-
ङ्क्ष्यादिति नोपक्रमसामान्यश्रवणे वेदोपक्रमन्यायावतार इति।

(१) पुस्तकेषु तु सिद्धान्तोपसंहार इति पाठो दृश्यते।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ननु यदितैलादीनामाक्षेपतः प्रतीतिर्नास्ति तदा कोऽप्यन्तरानुपस्थि-त्या सन्देहायोगात्सूत्रे कथं सदिग्ध इत्युक्तम् । उच्यते अर्थवादाप-रामर्शदशायां विध्युद्देशमात्रपरामर्शिनः सम्भवत्यव्यवस्थितार्थप्र-तीतिः घृततैलवसादीनामन्यतमं अञ्जनसाधनं भविष्यतीति सापि सन्देहग्रहणेन ग्रहीतुं शक्यते अनवधारणात्मकत्वाविशेषात् उक्तं च न्यायसुधायां सन्दिग्धशब्देनाव्यवस्थितार्थप्रतीतिरभिमतेत्या-दि । ननु यद्युपक्रममात्रपर्यालोचनालब्धाव्यवस्थितार्थप्रतीतिरुपसंहा-रलब्धया घृतव्यवस्थया वार्यते तर्हि सिद्धमुपसंहारप्राबल्यमिति चेत् । उच्यते । उपक्रमश्रुतार्थस्योपसंहारेणोपमर्दएव तत्प्राबल्य-मापद्यते नतूपक्रमश्रुतार्थोपजीवनेन श्रुत्यन्तरापरामर्शिपुरुषबुद्धि-कल्पितार्थस्य तेनोपमर्देपि, अन्यथा उद्भिदादिवाक्ये यागश्रवणात् घृतादीनामन्यतममिह द्रव्यमिति कल्पना अतिदेशप्राप्तसोमव्यवस्थ-या वारणीयेत्युपदेशादतिदेशः प्रबलः स्यात् । नन्वास्तामेवं प्रतिब-न्दी तथापि सुहृद्भावेन पृच्छ(१)सि उपसंहारानुसारेणोपक्रमस्य स-ङ्कोचोऽयमेकदेशे बाधो भवत्येव कथं दुर्बलेन प्रबलबाध इति । नचोप-क्रमे तैलादिविशेषाणामिव द्रवद्रव्यसामान्यविशेषस्याप्याक्षेपं विना प्रतीतेर्नास्ति सङ्कोच इति वाच्यम् । 'वासः परिधत्ते एतद्वै सर्वदैवत्यं वैवासो यत्क्षौममित्युदाहरणान्तरे उपक्रमे शब्दतः प्रतीतस्य वाससः सामान्यस्य उपसंहारानुसारेण सङ्कोचोपगमात् । नचार्थवादवाक्या-नां पदैकवाक्यत्वाद्गामानय शुक्लामित्यत्र गोशब्दस्य शुक्लव्यक्ताविव कृष्णं वासः परिधत्ते इत्यत्र वासःशब्दस्य कृष्णव्यक्ताविव च वि-ध्युद्देशोपात्तसामान्यस्यार्थवादोक्तविशेषपर्यवसानं युज्यत इति वा-च्यम् । तत्र गोवासःशब्दोपात्तं सामान्यं विशेषयितुमेव शुक्लकृष्णश-ब्दसन्निधानमिति तदवैय्यर्थ्याय गोवासःश्रुतिसङ्कोचेपि प्रकृते सर्व-दैवत्यस्तुत्यर्थक्षौमशब्दसन्निधानेन सङ्कोचायोगात् पदैकवाक्यता-यामपि हि सन्निधिमात्रं न सङ्कोचकं दुर्बलेन सन्निधिना श्रुतिबा-धानुपपत्तेः किंत्वनन्यार्थसन्निधिः स्वानर्थक्यपरिहाराय श्रुतिसङ्को-चकः आनर्थक्यप्रतिहतानां विपरीतं बलाबलमिति न्यायात् । यदिच पदैकवाक्यतायां सन्निधिमात्रं सङ्कोचकं भवेत् तदानीमश्वे-

(१) पृच्छामीति स्वपु० पा० ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

न गच्छति श्वेतेन पटेन प्रावृतइत्यत्र पटसम्बन्धनिराकाङ्क्षश्वेतशब्दसन्निधानेनापि श्रुतेः सङ्कोचः स्यात् तस्माद्वक्तव्यमिदं कथं दुर्बलेनोपसंहारेण प्रबलस्योपक्रमस्य सङ्कोचरूपो बाध इति । उच्यते । न प्रबलं प्रबलमित्येव दुर्बलोपस्थापितं निगृह्णाति किन्तु सति विरोधे । नचात्र दुर्बलस्याप्युपसंहारस्य उपक्रमेण विरोधः प्रत्युत तदाकाङ्क्षितसमर्पकतयानुगुण्यमेव अवश्यं हि अनुष्ठेयतया उपस्थाप्यमानं सामान्यं अनुष्ठानाय क्वचिद्विशेषपर्यवसानमपेक्षते निर्विशेषसामान्यस्य सकलविशेषाणां वा उपादातुमशक्यत्वात् तथा च क्व विशेषपर्यवसानमित्यपेक्षायां स यद्यपेक्षितो विशेषः कथमपि श्रुतो न लभ्यते तदाक्षेपकसामान्यबलात्तत्तदनुष्ठातृपुरुषबुद्ध्युपस्थापितं अनियतं विशेषमासाद्य निवृत्तः स्यात्तल्लाभे तु तत्रैव पर्यवसानं युक्तं क्लृप्तकल्प्योपस्थितयोर्विशेषयोः क्लृप्तोपस्थितिकस्यैव लाघवेन ग्राह्यत्वात् । नच वाक्यशेषस्य क्षौमादिग्रहणेपि तत्राप्यनुष्ठानाय विशेषाकाङ्क्षनयामनियतविशेषकल्पनमावश्यकमिति वाच्यम् । तथापि सर्वतो व्यावृत्ते व्यक्तिविशेषेऽनुष्ठानाय ग्राह्ये यावान्विशेषो वाक्यशेषे श्रुतो लभ्यते तावान् स एव ग्राह्यो बुद्धिलाघवादिति तदुपेक्षाकारणाभावात् । एवं च यद्युपक्रमस्य सङ्कोचोऽयमेकदेशबाध एव तथाप्यसौ तेनैवाकाङ्क्षितोपसंहारेण कारित इति न तेनास्य बाधः । एतेन अन्यार्थसन्निधानगस्य सङ्कोचकत्वमयुक्तमिति निरस्तं सत्यामाकाङ्क्षायां तस्यापि सङ्कोचकत्वात् अत एवाग्नेय्या ऽऽग्नीध्रमुपतिष्ठत इत्यत्राग्नेयीश्रुतेः स्तोत्रादिकार्यान्तरार्थेन अग्न आयाहि वीतय इत्याद्याग्नेयीविशेषसन्निधानेन तत्परतया सङ्कोचोऽभ्युपेयते आग्नेय्या आग्नीध्रमुपतिष्ठत इत्यादिविधेः प्रकरणापादितसामान्यसम्बन्धानां सन्निहितानामाग्नेयीनामाग्नीध्रोपस्थापनात्मकविशेषसम्बन्धमात्रबोधने लाघवं अप्रकृतानामाग्नेयीनां ज्योतिष्टोमापूर्वीयत्वलक्षणसामान्यसम्बन्धोपि अनेनैव बोधनीय इति तद्विषयत्वे विधेर्गौरवमिति लाघवानुसारिणो विधेः सन्निहितास्वाकाङ्क्षोदयात् । यद्यप्यग्न आयाहि वीतय इत्यादीनां प्रदेशान्तराम्नानेन सन्निधानं नास्ति तथापि ज्योतिष्टोमप्रकरणाम्नानं तावदस्ति तथा च यथा स्तोत्रादिकार्यान्तरार्थेन प्रकरणाम्नानेन विध्याकाङ्क्षया आग्नेयीश्रुतिसङ्कोचः तद्वदिहापि सामान्यश्रुति-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सङ्कोचः तदाकाङ्क्षया सन्निधानानुसारेण युक्तः आहत्यैव च सूत्रकारेणान्यार्थसान्निधानस्याकाङ्क्षावशाद्विशेषकत्वं षष्ठे वर्णितम । तत्र ह्येका देया षड् देयाश्चतुर्विंशतिर्देयाः शतं देयं सहस्रं देयमपरिमितं देयं इत्याधानदक्षिणाकल्पे भेदश्रुतावपरिमितशब्दो बहुत्वार्थकतया एकादिशब्दवद्दक्षिणाकल्पभेदपर इत्यपरिमाणे च शिष्टस्येत्यधिकरणनिर्णयानन्तरं सोपरिमितशब्दः किमनियतबहुत्वार्थः उत सहस्राधिकबहुत्वार्थ इति संशये दक्षिणाकल्पान्तरपरसहस्रसन्निधानेन विशेषणासम्भवादनियतबहुत्वार्थ * इत्यनियमो विशेषादिति * सूत्रेण पूर्वपक्षं कृत्वा अपरिमितशब्दस्य प्रतियोगिसापेक्षस्वभावबहुत्वार्थकत्वात्तदाकाङ्क्षया अन्यार्थसान्निधानमपि विशेषकमतः सन्निहितसहस्राधिकबहुत्वार्थ इति । * अधिकं वा स्याद्बहुत्वार्थत्वादितरैः सन्निधानादिति * सूत्रेण सिद्धान्तितं यदैवं सर्वथैवानन्वयिनि विध्यन्तरे सन्निधानस्याप्याकाङ्क्षावशाद्विशेषकत्वं तदा किमु वक्तव्यं स्तावकत्वेनान्वयिन्यर्थवादे सन्निधानस्य तद्वशात् विशेषकत्वमिति तस्मात्साकाङ्क्षानुसारेण सङ्कोचो नोपसंहारेण बलात्कारित इति न तेन तस्य बाधः एवमेवोद्भिदा यजेतेत्यत्र यजिना सामान्यतः उपस्थापितस्य द्रव्यस्यानुष्ठानाय विशेषाकाङ्क्षानुरोधनातिदेशिकसोमरूपविशेषपर्यवसानात्मकसङ्कोचोपि नातिदेशेन कारित इति न तेनोपदेशस्य बाधः अतएव दशमे अतिदेशादुपदेशस्य प्राबल्येन औपदेशिकशरादिनातिदेशिककुशादिबाधव्युत्पादनानन्तरं यत्र वायव्यं श्वेतमालभेतेत्यादौ औपदेशिकश्वेतादेरातिदेशिके छागादौ पर्यवसानं सम्भवति न तेन तस्य बलवतापि बाधनं किन्तु स्वाकाङ्क्षानुसारेण तत्रैव पर्यवसानमुक्तं *नैमित्तके कार्यत्वात् प्राकृते स्यात्तदापत्ते*रिति सूत्रेण। यस्तु कस्यचित् स्वयमनाकाङ्क्षित एव सङ्कोचो बलादन्येन कार्यते स एव तस्य तत्कृतो बाधः यथाहवनीयशास्त्रस्य पदशास्त्रेण, आहवनीये जुहोतीति शास्त्रेण न होमो विधीयते येन सकलहोमानां उपादातुमशक्यत्वात् स्वत एव विशेषाकाङ्क्षा स्यात् किन्त्विदं होमोद्देशेनावहवनीयं विदधाति तत्र चासङ्कोचेन सकलहोमानुवादः स्वरससिद्धः अनारभ्याधीतत्वात् शक्यते च यथाप्राप्तसकलहोमानुवादस्वारस्यानुरोधेन यो यदा होमः कर्तव्यत्वेन

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्राप्तः स सर्वोप्याहवनीये कर्तुं, ततश्चावहनीयशास्त्रस्य स्वयमना-
काङ्क्षित एव सङ्कोचः पदे जुहोतीति शास्त्रेण कारित इति स तस्य
तत्कृतो बाधः । एतेन सङ्कोचस्य बाधत्वाभावे वाक्यप्रकरणाधिकर-
णोक्तो वाक्येन प्रकरणस्य सङ्कोचोपि बाधो न स्यादिति श्रुतिलिङ्गादि-
षट्बलाबलव्यवस्थापि हीयेतेति परास्तम् । तत्रापि दर्शपूर्णमासप्रकर-
णस्याविशेषे प्राकरणिकसर्वपदार्थानां दर्शपूर्णमासोभयसाधारण्या-
पादने प्रवृत्तस्य स्वतः सङ्कोचाकाङ्क्षाविरहेपि अग्नीषोमाविदं ह-
विरजुषेतां अवीवृधेतां महो ज्यायोकातामिति अत्र लिङ्गात्पौर्ण-
मासमात्रान्वय्यग्नीषोमीयपदैकवाक्यतालक्षणवाक्यप्रमाणेन इदं-
हविरित्यादेः पौर्णमासमात्रसाधारण्यमापादयता कारितदतिरिक्त
विषयत्वलक्षणः सङ्कोच इति तस्य तत्कृतबाधत्वाभ्युपगमाच्छ्रुति-
लिङ्गादिष्वपि यस्य स्वयमेवाकाङ्क्षितः सङ्कोचो न तत्कृतो बाधः य-
थोदाहृतः आग्नेय्याधिकरणे अपरिमिताधिकरणे च प्रकरणस्यानानु-
सारेण श्रुतिसङ्कोचः एवमन्यत्रापि भूयान्विषयः सुप्रसिद्धएव त-
स्मात्स्वत एवाकाङ्क्षितः सङ्कोचानुसारेण क्रियमाणोपि न तत्कृतो बाध
इति नात्रोपसंहारेणोपक्रमस्य बाधः । उक्तं हि शास्त्रदीपिकायां अ-
काधिकरणे अवश्यं च यः कश्चिद्विशेष उपादातव्यः निर्विशे-
षसामान्येन व्यवहारासम्भवात् तत्रासति विशेषप्रमाणे
यः कश्चित् स्यात् अस्तित्वत्र घृतस्य प्रमाणं वाक्यशेष इति ।
न्यायसुधाच यो वाक्यस्य सामान्यवचनेनोपक्रमः स निग-
मनवशेन श्रुत एव विशेषे व्यवस्थाप्यते तस्योपक्रमापेक्षितविशे-
षसमर्पणेन तदानुकूल्यादिति । नयविवेकेप्युक्तं उपक्रमापेक्षितविशे-
षसमर्पक एवात्रोपसंहारो नतु तद्बाधक इति । किञ्चोपक्रमस्याका-
ङ्क्षाभावेपि कांस्यभोजिन्यायादुपसंहारानुसारित्वं युक्तं कांस्यभोजि-
नये हि चिन्तितं आग्रयणे ऐन्द्राग्नादीनि मुख्यानि हवींषि तेषां बर्हिः
प्रसूनमप्रसूनं वेति न कश्चिन्नियमोस्ति द्यावापृथिव्य एककपालो जघ-
न्यं हविः तस्य वैश्वदेव्यएककपालप्रकृतिकत्वात्प्रसूनं पुष्पितं बर्हि-
रिति नियमः प्राप्तः तत्र किमाग्रयणे ऐन्द्राग्नाद्यनुसारेणानियतं बर्हि-
र्ग्राह्यं उत द्यावापृथिव्यनुसारेण प्रसूनं बर्हिरिति संशये मुख्यत्वा-
द्बहुत्वाच्च ऐन्द्राग्नादीनां तदनुरोधादनियमप्राप्तौ जघन्यस्यापि द्या-
वापृथिव्यस्य धर्मः प्रसूननियम आदर्तव्यः प्रसूनोपादानेप्यैन्द्राग्ना-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दीनामवैगुण्यादनियमे द्यावापृथिव्यस्य वैगुण्यप्रसङ्गात् । यथाऽनियतपात्रभोजिनो गुरोर्नियतकांस्यभोजिनः शिष्यस्य च क्वचिदेकपात्रभोजनप्राप्तौ गुणभूतस्यापि शिष्यस्यानुरोधेन कांस्यपात्रनियमः आद्रियते तद्वत् तस्माद्ग्राव्रयणेषु पुष्पितमेव बर्हिरिति सिद्धान्त इति एवमिहापि निर्विशेषसामान्येन व्यवहारायोगादनियमेन यत्र क्वचिद्विशेषे पर्यवसानस्योपक्रमस्य घृतादिपर्यवसानेपि न क्वचिद्विरोधः घृतादिस्तुतेस्तु सामान्यस्तुतौ पर्यवसानेनाङ्गस्यमिति उपसंहारानुसारित्वं न्याय्यम् ।

वस्तुतस्तु अक्ताधिकरणे उपसंहारप्राबल्यशङ्कानिवारणाय नैतावद्दूरं वक्तव्यमस्ति विधौ सन्दिग्धमर्थवादेनावधार्यतइति हि तत्र व्युत्पादनं नतूपक्रमे सन्दिग्धमुपसंहारेणावधार्यतइति तत्र वाक्यशेषशब्दस्योपक्रमोपसंहारगतत्वानादरणार्थवादमात्रपरत्वात् । यथोक्तं वार्तिके । विधिस्तुत्योस्सदावृत्तिः समानविषयेष्यते । तस्मादेकत्र सन्दिग्धमितरेणावधार्यते इति । अत्र स्तुतौ सन्दिग्धं विधिनावधार्यत इति नावमिके अर्थैकत्वाधिकरणे भाष्यकारेण प्रदर्शितस्यार्थस्य दृष्टान्ततयोपादानम् । तत्र हि यद्दचास्तुवते तदसुराअन्ववायन् यत्साम्ना स्तुवते तदसुरा अन्ववायन् इत्यत्र किमसुरागमनहेतुतया ऋक् निन्द्यते उत वशीकर्तुमशक्यानामसुराणामपि वशीकरणहेतुतया स्तूयत इति सन्दिग्धं तदनन्तरश्रुतेन य एवं विद्वान्साम्ना स्तुवीतेति सामविषयेण विधिनावधार्यते विधित्सितसामप्रशंसार्थमृक् निन्द्यत इति तन्निन्दापरत्वं एवं तदेकवाक्यत्वोपपत्तेरित्युक्तं विधौ सन्दिग्धं स्तुत्यावधार्यतइत्येतदधिकरणे व्युत्पाद्य कथनं अत्र यः प्रसिद्धसन्देहः यश्चाव्यवस्थितार्थप्रत्ययः तदुभयमपि सन्देहत्वेन विवक्षितं अनवधारणरूपत्वाविशेषात्सान्दिग्धामिति यदेव किञ्चन विधौ नावधृतं तत्सर्वं निर्दिश्यते यथोक्तं यववराहाधिकरणे वार्तिककृता सन्दिग्धेषुतु सर्वेषु वाक्यशेषेण निर्णयम् । वक्ष्यत्येवमतोनात्र पृथक्कार्या विचारणेति । तथा यत्र विधौ शब्दस्वरूपमेव प्रवृत्तितः प्रत्ययतो वा नावधार्यते शब्दनिश्चयेपि वा तस्य वाक्यं नावधार्यते अनेकवाक्यार्थनिर्णयेपि प्रकृते विवक्षितार्थो नावधार्यते अर्थावधारणेपि वचनव्यक्तिभेदो नावधार्यते तदवधारणेपि उद्देश्यमुपादेयं वा विशिष्य नावधार्यते तत्र सर्वत्रापि विशेषावधारण-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रत्ययः तदुभयमपि सन्देहत्वेन विवक्षितं अनवधारणरूपत्वा-द्विशेषात्सन्दिग्धमिति च यदेव किञ्चन विधौ नावधृतं तत्सर्वं निर्दिश्यते । यथोक्तं यववराहाधिकरणे वार्तिककृता 'सन्दिग्धेषु तु सर्वेषु वाक्यशेषेण निर्णयम् । वक्ष्यत्येवमतोनात्र पृथक्कार्या विचारणेति' तथा च यत्र विधौ शब्दस्वरूपमेव प्रकृतितः प्रत्ययतो वा नावधार्यते शब्दनिश्चयेपि वा तस्य शक्यं नावधार्यते अनेकशक्यार्थनिर्णयेपि प्रकृते विवक्षितोर्थो नावधार्यते तथाऽर्थावधारणेपि वचनव्यक्तिभेदो नावधार्यते तदवधारणेपि उद्देश्यमुपादेयं वा विशिष्य नावधार्यते तत्र सर्वत्रापि विशेषावधारणसमर्थेनार्थवादेन यत्र तत्र स्थितेनापि विशेषावधारणमिह व्युत्पाद्यं तत्र 'आदित्यः प्रायणीय' इत्यत्र देवतातद्धितप्रकृतावस्ति सन्देहः किमदितिशब्द उत आदित्यशब्द इति 'दित्यदित्यादित्यपत्युत्तरपदाण्ण्यइति' ण्यप्रत्यये सति रूपस्योभयत्राप्यविशेषा 'ददित्यै चरुममुमेवादित्यं स्वेन भागधेयेनोपधावती'त्यादौ उभयोरपि देवतात्वेन वैदिकप्रसिध्यविशेषाच्च, स चादिति शब्द इति 'तेऽदित्या समधियन्त'इत्यर्थवादवशादवधार्यते। 'यदाग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्यां चाच्युतो भवति' इत्यत्र तद्धितप्रकृतिभूतोऽग्निशब्दः किमेवचनान्तः किं वा बहुवचनान्त इत्यस्ति सन्देहः 'अग्नये कृत्तिकाभ्य' इत्यादौ 'तस्मा अग्नयोद्रविणं दत्वे'त्यादौ देवतापराग्निशब्दस्योभयथापि दर्शनात्स एकवचनान्तः 'सोऽग्नयेऽधियत' इत्यर्थवादादवधार्यते । तथा 'तस्मा एतदादित्यं चरुं निर्वपे'दित्यत्रादित्यशब्दः किमेकवचनान्तो बहुवचनान्तो वेत्यस्ति सन्देहः 'अमुमेवादित्यमादित्येभ्यो भुवद्वद्भ्य' इत्यादौ उभयथापि दर्शनात्स बहुवचनान्तः 'आदित्यानेव स्वेन भागधेयेनोपधावति' इत्यर्थवादादवधार्यते । 'सारस्वतौ भवत' इत्यत्र किं तद्धिप्रकृतिः पुंलिङ्गः स्त्रीलिङ्गो वेत्यस्ति सन्देहः 'सरस्वत्यै चरुं सरस्वते चरु'मित्युभयोरपि देवतात्वप्रसिद्धेः तत्रैकः स्त्रीलिङ्गः अन्यः पुंलिङ्ग इति 'एतद्वैदैव्यं मिथुन'मित्यर्थवादादवधार्यते। 'यवमयश्चरुर्भवति' इत्यादौ यवशब्दशक्येऽस्ति सन्देहः दीर्घशूकः प्रियङ्गुर्वेति उभयत्र प्रयोगदर्शनात् 'यत्र अन्या ओषधयो म्लायन्ते अथैते मोदमाना इवोतिष्ठन्तीति'अर्थवादाद्दीर्घशूक इति निर्णीयते । 'सोमारौद्रं चरुन्निर्वपे'दित्यत्र रुद्रशब्दार्थेऽस्ति सन्देहः अग्निः शिवो वेति, अग्निं प्रस्तुत्य 'सोऽरोदीद्यद-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रोदीत्तद्रुद्रस्य रुद्रत्वमिति' श्रौतनिर्वचनेन 'रुद्रमग्निं द्विजाः प्राहुरिति' पौराणिकवचनेन च रुद्रशब्दस्य अग्निरर्थ इति अवगतम्। शिवं प्रस्तुत्या'थ कस्मादुच्यते रुद्र'इत्यादिश्रौतनिर्वचनात्'रुद्रु दुःखं दुःखहेतुर्वा तद्रावयति नः प्रभु'रित्यादिपौराणिकवचनाच्च प्रसिद्धिप्राचुर्याच्च शिवोऽर्थ इत्यवगतमिति नानार्थत्वात् 'सोमो वै रेतोधा अग्निः प्रजानां प्रजनयिता' इत्यर्थवादादग्निरित्यवगम्यते। ज्योतिष्टोमे अधिषवणफलके प्रकृत्य 'अथो खलु दीर्घसोमे सन्तृद्ये धृत्या'इत्याम्नायते दीर्घसोम इत्यस्य वचनव्यक्तावस्ति सन्देहः किं प्रकरणादु(१)त्कर्षालाभेन दीर्घस्य यजमानस्य सोमो ज्योतिष्टोम इति षष्ठीसमासरूपा वचनव्यक्तिः किं वा कर्मधारयबलीयस्त्वानुरोधेन ज्योतिष्टोमापेक्षया दीर्घे सोमे द्विरात्रादाविति कर्मधारयरूपा वचनव्यक्तिरित्यस्ति सन्देहः धृत्या इत्यर्थवादेन कर्मधारयरूपेति निश्चीयते दीर्घकाले हि सोमयागे पुनः पुनः ग्रावभिरभिहन्यमानायां सोमलतायामधिषवणफलकयोर्दारणशङ्कया तयोर्दार्ढ्यार्थं सन्तर्दनस्य परस्परसंश्लेषरूपस्य विधेर्धृत्यै धारणायेत्यर्थवादः सङ्गच्छते यजमानदैर्घ्येण दारणशङ्काभावान्न सङ्गच्छत इति। 'विवा एष इन्द्रियेण वीर्येणार्ध्यते यः सोमं वामिति यः सोमवामीस्यात् तस्मा एनं सोमेन्द्रं श्यामाकं चरुं निर्वपे'दित्युद्देश्यभूते निमित्तेऽस्ति सन्देहः किं वैद्यकोक्तलौकिकसोमवमनं निमित्तं उत यागशेषरूपवैदिकसोमवमनमिति इन्द्रियवीर्योपचयरूपदोषश्रवणस्वरूपादर्थवादाद्वैदिकसोमवमनं निमित्तमवधार्यते। यद्यपि इन्द्रियवीर्योपचयो लौकिकसोमवमनेनापि भवति तथापि स तत्र न दोषः वैद्यके धातुसाम्योपयोगिशरीरान्तर्गतदोषनिःसारणाय वमनार्थमेव सोमपानं विहितं वमनं च क्रियमाणमिन्द्रियवीर्योपचयाविनाभूतमित्यङ्गीकृतग्लानित्वात् वेदे तु सोमपानं न वमनार्थं विहितं यागशेषप्रतिपत्तिरूपत्वात् प्रतिपत्तिश्च भक्षणरूपा सम्यग्जरणपर्यन्तेति लोकतो 'हिन्वमे गात्रा हरिव'इत्यादिमन्त्रलिङ्गाच्चावधारिता वमनेन व्यापद्यत इति वैदिकवमन एव स दोषः। तथा चतुरहे 'पुरस्तात्पौर्णमासे दीक्षेरन्निति' गवामयनिककालविधौ उद्देश्यकालेऽस्त्यव्यवस्थितप्रतीतिरूपः सन्देहः अनियमेन या का चित्पौर्ण-

(१) दनुत्कर्ष इति ख० पु० पा०।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मासीति 'तेषामेकाष्टकायां क्रयः सम्पद्यत' इति माघकृष्णाष्टम्यामेकाष्टकाशब्दवाच्यायां सोमक्रयसम्पत्तिवर्णनरूपादर्थवादान्माघीति निर्णीयते । एवं चातुर्मास्ये वैश्वदेववरुणप्रघाससाकमेधशुनासीरीयलक्षणपर्वचतुष्टयवति 'द्वयोः प्रणयन्तीति' द्वयोः पर्वणोरग्निप्रणयनविधावुद्देश्ययोः पर्वणोरस्त्यव्यवस्थितप्रतीतिरूपः सन्देहः आनियमेन ययोः कयोश्चिद्द्वयोः पर्वणोरिति 'तस्माद्द्वाभ्यां यन्ती'त्यर्थवादान्मध्यमयोरिति निश्चीयते 'ऊरुभ्यां हि लोके गच्छन्ति ऊरु संस्तुते च मध्यमे पर्वणी ऊरु वा एतौ यज्ञस्य यद्वरुणप्रघासाः साकमेधाश्चेति' उपादेयविशेषनिर्णयस्त्वर्थवादादनैवाक्ताः शर्करा इत्याद्युदाहरणं । एवं यत्किञ्चिद्विधौ सन्दिग्धं तत्सर्वमुपक्रमोपसंहारगतत्वानादरेणार्थवादमात्रान्निर्णेयं इति व्युत्पादयितुं प्रवृत्तेऽस्मिन्नधिकरणे नोपसंहारप्राबल्यव्युत्पादनशङ्कावकाशः । यद्यप्येतेषु आदित्यः प्रायणीय इत्यारभ्योदाहृतेषु क्वचित्क्वचिदुपायान्तरेणापि निर्णयः सम्भवति तथाप्यर्थवादस्यापि निर्णयसामर्थ्यमविकलमेव ।

ननु यदि सर्वोप्यर्थवादात्सन्दिग्धार्थनिर्णयोत्रैव व्युत्पाद्यः किमर्थं तर्हि तृतीय सूत्रकारेणैव दीर्घसोम इत्यत्र षष्ठीसमास इति * कर्तृतोवा विशेषः स्यात् तन्निमित्तत्वादिति * सूत्रेण पूर्वपक्षं कृत्वा * क्रतुतो वाऽर्थवादानुपपत्तेः स्यादिति * सूत्रेण कर्मधारय इति सिद्धान्तितम् । तत्रैव * पानव्यापच्च तद्वदिति * सूत्रेण लौकिकं सोमपानं निमित्तमिति पूर्वपक्षं कृत्वा * दोषात्तु वैदिके स्यादर्थाद्धि लौकिके न दोषः स्यादिति * सूत्रेण वैदिकं सोमपानं निमित्त मिति सिद्धान्तितं । षष्ठ च गवामयनकालविधौ या का चित्पौर्णमासीति * पौर्णमास्यामनियमो विशेषादिति * सूत्रेण पूर्वपक्षं कृत्वा * माघीवैकाष्टकाश्रुतेरिति * सूत्रेण माघीति सिद्धान्तितम् । सप्तमे च * प्रथमोत्तमयोः प्रणयनमुत्तरवेदिप्रतिषेधादिति * सूत्रेण वैश्वदेवशुनासीरीययोः प्रणयनमिति पूर्वपक्षं कृत्वा * मध्यमयोर्वा गत्यर्थवादादिति * सूत्रेण वरुणप्रघाससाकमेधयोरिति सिद्धान्तितम् । उच्यते । सर्वविधस्यापि वाक्यशेषात्सन्दिग्धार्थनिर्णयस्याक्ताधिकरण एव सिद्धत्वेपि सन्तर्दनविधेः प्रकरणादनुत्कर्षलाभात् षष्ठीसमासाश्रयणं वरमित्यधिकशङ्कावारणाय दीर्घसोमवाक्यस्य पुनर्विचारः इन्द्रियवीर्यापचयरूपपुरुषसम्बन्धि-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दोषश्रवणं चरोः पुरुषार्थत्वे एवोपपद्यत इति तत्सिद्धये लौकिकसोमवमनमेव निमित्तं वैदिकवमनस्य हि निमित्तत्वे हि चरोः क्रत्वर्थतया वमनेन क्रतुवैकल्यदोषः श्रूयते इत्यधिकाशङ्कानिरासाय वमनेष्टिवाक्यस्य पुनर्विचारः 'द्वादश पूर्णमास्यो द्वादशैकाष्टका' इति श्रुत्यन्तरे चैत्रादिमासगतासु द्वादशस्वपि कृष्णाष्टमीष्वेकाष्टकाशब्दप्रसिद्धेर्नार्थवादवशेन माधीति निर्णय इत्यधिकाशङ्कावारणाय गवामयनकालविधिवाक्यस्य पुनर्विचारः 'न वैश्वदेव उत्तरवेदिमुपवयन्ति न शुनासीरीय' इति प्रथमोत्तमपर्वणोरुत्तरवेदिप्रतिषेधात् लिङ्गादग्निप्रणयनं तयोरेवेत्यधिकाशङ्कावारणाय प्रणयनवाक्यस्य पुनर्विचार इत्यादिष्वेवाधिकरणेषु स्पष्टम्। वस्तुस्थितिस्तावदियं यदक्ताधिकरणे विधौ सन्दिग्धस्य यत्रतत्रस्थितेनार्थवादेन निर्णयो व्युत्पादित इति तदतिलङ्घनेन तत्रोपसंहारप्राबल्योपजीवनोत्प्रेक्षायां तु ततोप्याञ्जस्येन तत्रोपक्रमप्राबल्योपजीवनमेवोत्प्रेक्षितुं शक्यं तथाहि अक्ताः शर्करा इत्यत्र विधिस्तुल्यारेकविषयतया यथोपक्रमावगत द्रवद्रव्यसामान्यस्य वाक्यशेषे घृतसङ्कीर्तनात् घृतरूपतयाऽस्ति सङ्कोचः तथा घृतस्य यज्ञान्तर्गताञ्जनक्रियासाधकद्रवद्रव्यविशेषतयाऽन्वयाददुष्टघृतरूपतयाऽस्ति सङ्कोचः जात्या संसर्गादिना वा दुष्टस्य घृतस्यायज्ञीयत्वात् एवं च यद्युपक्रमोपसंहारानुगतयोर्द्रवद्रव्यघृतयोरवशिष्टः सङ्कोचः तथाप्युपक्रमेऽनुष्ठेयतयाऽवगतस्य द्रवद्रव्यसामान्यस्यानुष्ठानाय स्वस्यैव विशेषाकाङ्क्षया सङ्कोच उपसंहारे तेजस्त्वेन स्तुतस्य घृतस्य तु न स्वाकाङ्क्षया सङ्कोचः घृतसामान्यैऽप्यौज्वाल्यादिगुणतस्तेजस्त्वेन स्तुत्यविरोधात् किं तूपक्रमगताञ्जनक्रियासाधनद्रवद्रव्यविषयतयान्वयानुसारेणैवेत्येवं सुवचमुक्रमप्राबल्योपजीवनम् ।

नन्वक्ताधिकरणे सन्दिग्धार्थनिर्णय इत्युपक्रमगतसामान्यस्योपसंहारानुसारेण सङ्कोचे तन्माभूदुदाहरणं तथाप्युदाहरणान्तरमस्त्येव, तथाहि ज्योतिष्टोमे * तुल्यान्यत्वर्वाविशिष्टं हि कारणमिति * चतुर्थोपान्त्याधिकरणे दीक्षणीयादीनामिष्टीनामग्नीषोमीयादीनां पशूनां सोमयागस्य च सन्निधौ 'ज्योतिष्टोमेन स्वर्गकामो यजेतेति' आम्नाते यजेः सन्निहितसर्वयागानुवादस्वारस्येन सर्वेषामेव तेषां फलसम्बन्धप्रतीतावपि वा-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

क्यशेषे 'त्रिवृत्पञ्चदशः सप्तदश एकविंश एतानि वाव तानि ज्योतींषि ये एतस्य स्तोमा' इति ज्योतिःशब्दितत्रिवृदादिस्तोमसम्बन्धिनः सोमयागस्य विशिष्य कीर्तनात् तत्रैव यजेः पर्यवसानमिति सोमयागस्यैव फलसम्बन्धः इतरेषां तु फलवदफलन्यायेन तदङ्गत्वमिति निर्णीतं अत्र ह्युपक्रमे नास्ति स्वतः सन्देहः दीक्षणीयादयः फलसम्बन्धिनः सोमयागे वेति, नाप्यनवस्थितप्रतीतिरस्ति दीक्षणीयादिसोमयागान्तानां मध्ये अनियमेन कश्चिदेव फलसम्बन्धीति अत एव फलार्थमनुष्ठानाय को याग उपादातव्य इति विशेषाकाङ्क्षापि नास्ति सन्निहितसर्वयागानामसङ्कोचेन राजसूयवाक्य इव फलसम्बन्धित्वोपपत्तेः 'राजसूयेन स्वाराज्यकामो यजेते'त्यत्र यजेः सन्निहितसर्वयागानुवादस्वारस्यानुरोधेन सन्निहितानामनुमत्यादीनामिष्टीनां मल्हादीनां पशूनां पवित्रादीनां क्रतूनां सोमयागादीनां चाविशेषेण फलसम्बन्धाभ्युपगमात् तथापि यदत्र वाक्यशेषानुसारेण सङ्कोचकल्पनं तदुपसंहारप्राबल्येनैव। एवं नवमे * पत्नीसंयाजान्तत्वं सर्वेषामविशेषा * दित्यधिकरणे द्वादशाहे श्रुतस्य 'पत्नीसंयाजान्तान्यहानि सन्तिष्ठन्ते' इत्यविशेषेण सर्वेषां सौत्यानामन्हां पत्नीसंयाजान्तत्वविधेरसंस्थितो हि तर्हि यज्ञ इति क्रतोरसमाप्तिप्रतिपादकवाक्यशेषानुसारेण येष्वहःसु क्रतोरपरिसमाप्तिस्तेषामेकादशानामेव अन्हां पत्नीसंयाजान्तत्वविधायकमिति यन्निश्चितं तदप्युपसंहारप्राबल्येनैव, तदभावे सर्वेषामन्हां पत्नीसंयाजान्तत्वसम्भवेन असन्दिग्धत्वोपक्रमस्य सङ्कोचकल्पनायोगात्। स्यादेतत् सामान्यविधेर्विशेषसङ्कीर्तने सति *साप्तदश्यवत्तदुपसंहारो न्याय्य * इत्यधिकरणद्वयेपि वाक्यशेषानुसरणं न तूपसंहारभागप्राबल्येन न हि 'सप्तदश सामिधेनीरनुब्रूया'दित्यनारभ्याधीतस्य सामिधेनीसाप्तदश्यविधेः पाञ्चदश्यावरुद्धायां प्रकृतौ निवेशमलभमानतया विकृतिगामित्वे वक्तव्ये विशेषाश्रवणात्सामान्यतः सर्वविकृतिगामित्वेन प्रतीयमानस्य श्रुतसाप्तदश्यासु मित्रविन्दादिषु यदुपसंहरणं तदुपसंहारभागप्राबल्यप्रयुक्तं अनारभ्याधीतस्य मित्रविन्दादिगतस्य च साप्तदश्यविधेरंकत्राम्नानाभावेनोपक्रमोपसंहारभावाभावादिति चेत्। मैवम्। अनारभ्याधीतस्य साप्तदश्यस्य विशेषोपसंहारो न विशेषसङ्कीर्तनमा-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्रात्किन्त्वस्पष्टत्वात् तथाहि सामिधेनीनां साप्तदश्यं अनारभ्याधीतत्रादेनोक्तं तद्यावत्सामिधेनीद्वारा सर्वविकृत्यर्थत्वं कल्पयितुमुपक्रम्यते तावदेव मित्रविन्दादिषु प्राकरणिकेन वाक्येन क्रतुविशेषसम्बन्धे कृते क्षीणाऽर्थापत्तिर्न क्रत्वन्तरसम्बन्धं कल्पयतीति अस्पष्टक्रतुसम्बन्धात्साप्तदश्यस्योपसंहारः नेह तथा विधावस्पष्टः क्रतुसम्बन्धोवाक्यशेषस्पष्ट इति विशेषोस्ति अतो नात्रोपसंहारन्यायः प्रवर्तते अत एव *अभावादतिरात्रेषु गृह्यत* इति दाशमिकेऽधिकरणे 'उत्तरेहन् द्विरात्रस्य गृह्यत' इत्यनारभ्याधीतवाक्येन सामान्यतो द्विरात्राणामुत्तरेऽहनि षोडशिग्रहणविधानस्याऽऽङ्गिरसां द्विरात्रप्रकरणे 'वैखानसं पूर्वेहन्साम भवति षोडश्युत्तर' इति विशेषसङ्कीर्तनेनाङ्गिरसां द्विरात्र उपसंहारमाशङ्क्यानारभ्याम्नानेन षोडशिग्रहस्य सामान्यतः सर्वद्विरात्रक्रतुसम्बन्धस्य स्पष्टत्वान्न तस्योपसंहारो युक्त इति प्राकरणिकं वाक्यं वैखानसवि(१)शेषार्थवादमात्रमित्युक्तम् । उक्तं च वार्तिके सामान्यविधिरस्पष्टः संह्रियेत विशेषतः । स्पष्टस्य तु विधेर्नान्यैरुपसंहारसम्भव इति । अन्यथा न ब्राह्मणं हन्यादिति सामान्यनिषेधस्यापि नात्रेयं हन्यादिति विशेषोपसंहारः कल्प्येत । यदि तु स्पष्टस्यापि क्वचिदुपसंहार इष्यते तथापि यत्र नान्यथासिद्धं विशेषसङ्कीर्तनमस्ति तत्रैव तदुपसंहारः अन्यथा 'यत्किञ्चित्प्राचीनमग्नीषोमीयात्तेनोपांशु चरन्तीति' सामान्यतोऽग्नीषोमीयात्प्राचीनेषु उपांशुत्वविधेरपि 'यावत्या वाचा कामयीत तावत्या दीक्षणीयायामनुब्रूयान्मन्द्रं प्रायणीयायां मन्द्रतरमातिथ्यायामुपांशूपसत्स्विति' श्रवणादुपसन्मात्र उपसंहारः प्रसज्येत । न च यत्किञ्चिदिति वीप्सानुसारेणानुपसंहारः उपसदां साकल्यमादायापि वीप्सोपपत्तेः तस्माद्यथा तत्रोपांशूपसत्स्वित्यत्र सामान्यवचनप्राप्तमुपांशुत्वमवलम्ब्य दीक्षणीयादिस्वरान्तरविधानप्रशंसार्थत्वेनार्थवत्वोपपत्तेर्नोपसंहारकत्वं तद्वदिहाप्यर्थवादरूपस्य वाक्यशेषस्य यथाकथञ्चित्स्तावकत्वसम्भवेनान्यथासिद्धस्य नोपसंहारकत्वं न्याय्यमित्युपसंहारभागप्राबल्यानुसरणमेवास्थेयम् । अत एव विशेषनिष्ठस्याप्युपक्रमस्योपसंहारानुसारेण सामान्यपरत्वमभ्युपगतं लक्ष्यते तत्सिद्धि-

(१) विरोधिशेष इति ख० पु० पा० ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पेटिकयां तत्र हि 'सृष्टीरुपदधातीत्यत्र' सृष्टिशब्दस्य 'तद्वानासामुपधानो मन्त्र इतीष्टकासु लुक्च मतो'रित्यनुशासनात् 'तिसृभिरस्तुवत ब्रह्मासृज्यत पञ्चभिरस्तुवत भूतान्यसृज्यन्ते' त्यादिसृष्टिलिङ्गमन्त्रोपधेयेष्टकार्थकस्य 'एकयाऽस्तुवत प्रजा अधीयन्ते' त्याद्यनुवाकोक्तसृष्टिलिङ्गकासृष्टिलिङ्गकमन्त्रोपधेयानामिष्टकानां प्रत्येकं स्तुतिं कृत्वा 'यत्सप्तदशेष्टका उपदधाति' इत्युपसंहारानुसारेण तदनुवाकाम्नातसृष्टिलिङ्गकासृष्टिलिङ्गकमन्त्रोपधेयानामिष्टकानां समुदाये सामान्यरूपेण लक्षणाऽऽङ्गीकृतेति । अत्रोच्यते । ज्योतिष्टोमाधिकरणे तावदुपसंहारानुसरणमुपक्रमाकाङ्क्षयैव उपक्रमश्रुतस्य ज्योतिष्टोमनाम्नोहि यागे प्रवर्तमानस्य किञ्चित्प्रवृत्तिनिमित्तमाकाङ्क्षितं न च तदाकाङ्क्षितं समर्पयति वाक्यशेषे तदवधीर्य ज्योतिषामग्नीनां स्तोमः समूहो यस्मिन्नित्यादिदीक्षणीयाद्यनुवृत्तं किञ्चित्पुरुषबुद्ध्या कल्पयितुं युक्तं वाक्यशेषे च सोमयागगतमेव प्रवृत्तिनिमित्तं समर्पयति ज्योतिःशब्दितत्रिवृदादिस्तोत्रसम्बन्धस्य 'ग्रहं वा गृहीत्वा चमसं वोन्नीय स्तोत्रमुपाकुर्यादिति' वाक्यान्तरे सोमयाग एव निर्ज्ञातत्वात् अतो यत्र वाक्यशेषस्तत्र ज्योतिष्टोमनाम यत्र च तत् तत्र यजिः क्लृप्तप्रवृत्तिनिमित्तनामपरतन्त्रत्वादाख्यातस्येति उपक्रमाकाङ्क्षानुसृतोपसंहारकारितः सङ्कोचः नोपसंहारप्राबल्यकारितः अत एव यत्रोपक्रमस्य नाकाङ्क्षा न तत्र सत्यप्युपसंहारे विशेषसङ्कीर्तनेन तदनुसारेणोपक्रमस्य सङ्कोचः उपेयते यथा 'एष वाव प्रथमो यज्ञो यज्ञानां यत् ज्योतिष्टोमो य एतेनानिष्ट्वाऽन्येन यजेत' इत्यत्रान्यशब्दस्य 'योहि त्रिवृदन्यं यज्ञक्रतुमापद्यते सतं दीपयति यः पञ्चदशः स तं यः सप्तदशः स तं य एकविंशः स तं' इति त्रिवृदाद्येकस्तोमक्रतुसङ्कीर्तनेपि न तद्विषयतया सङ्कोच उपेयते उपक्रमस्य आकाङ्क्षाविरहेप्युपसंहारप्राबल्यादेव तदर्पितविशेषपर्यवसानमभ्युपगच्छतः तत्राप्यन्यशब्दस्य त्रिवृदाद्येकैकस्तोमक्रतुमात्रपरत्वं त्रिवृदादिचतुष्टयान्तर्गतस्तोमयुक्तक्रतुमात्रपरत्वं वा स्यादिति तेषामेव ज्योतिष्टोमपाश्चात्यत्वनियमः सिध्येत् । त्रिवृदादिस्तोमचतुष्टयसम्बन्धरहितानां चतुष्टोमपञ्चविंशाग्निष्टोमादीनां ज्योतिष्टोमात्पूर्वमप्यनुष्ठानं स्यात् । नचेष्टापत्तिः पञ्चमे * एकस्तोमे वा क्रतुसंयोगात्सर्वेषां वा चोदकाविशेषाप्रशंसास्तोमानामिति *

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पूर्वोत्तरपक्षसूत्राभ्यां सूत्रकृतैव वाक्यशेषानुसारेण सङ्कोचनिरासात् तस्मादुपसंहारप्राबल्यवादिनस्तत्रापि सङ्कोचः स्यात् उपक्रमाकाङ्क्षाया अतन्त्रत्वादिति तदधिकरणविरोधो वज्रलेपायितः। नावमिकाधिकरणेतु उपसंहारानुसरणमसिद्धमनपेक्ष्योपसंहारं विध्युद्देशपर्यालोचनयैव प्रागुत्तमादन्हः पत्नीसंयाजान्तविधिरिति सिद्धेः। तथाहि 'द्वादशाहेन प्रजाकामं याजयेदि'ति द्वादशसोमयागाः सह कार्यत्वेन विहिताः तत्र तेषां सहत्वसिद्धये पूर्वं पूर्वमहः क्वचित्पदार्थेऽत्रस्थाप्य परं परमुपक्रमितव्यं तत्रानियमेन यत्र क्वचनपदार्थेऽवस्थापने प्राप्ते पत्नीसंयाजान्तानि पूर्वपूर्वाण्यहानि कृत्वोत्तरमुत्तरमारभेतेत्येवं एकादशानामन्हां पत्नीसंयाजान्तत्वविधौ नियमविधिर्भवति उत्तरमस्यान्हः पत्नीसंयाजान्तत्वविधौ त्वत्यन्ताप्राप्तविधिः स्यात् अप्राप्तविधानाच्च नियमविधानं बलीयः विधिलाघवात् अतो विशेषश्रवणाभावेपि पत्नीसंयाजान्तत्वविधिः प्रागुत्तमादन्ह इति सिध्यति किमत्रोपसंहारानुसरणेन । अत एवोपांशु यजुषेति वाक्यं निगदाधिकरणोदाहृतं वेदोपक्रमाभावात् मन्त्रविशेषस्य यजुषः उपांशुत्वविधायकमिति मन्यमानैर्यजुषेत्यविशेषश्रवणेपि विशेषोपस्थापकोपसंहाराभावेपि नियमविधिबलीयस्त्वादेव निगदातिरिक्तस्य यजुषोयं उपांशुत्वविधिरिति दर्शितं निगदाधिकरणे यत्रानियमेनोपांशुत्वं प्राप्तं तत्र नियममात्रं उपांशु यजुषेत्यनेन क्रियते निगदव्यतिरिक्तेष्वेव यजुष्षु येन केन चित्स्वरेण कार्यसिद्धेरुपांशुत्वानियमाप्राप्तिरिति तद्विषयमेवेदं वचनं निगदेषु प्रोक्षणीरासादयेत्यादिषु परसम्बोधनलक्षणकार्यवशेन उच्चैष्ट्वमेव प्राप्तं न पक्षेऽप्युपांशुत्वमिति न तत्रास्य वचनस्य व्यापारः एवं चार्थतः प्राप्ते उच्चैष्ट्वे उच्चैर्निगदेनेत्यनुवादमात्रमिति तेषामर्थाधिकरणे च व्रीहीनवहन्तीत्यत्र व्रीहिपदस्यापूर्वसाधनमात्रपरत्वेपि नावघातस्याज्यसान्नाय्यसाधारणयं तत्रावघातस्य पक्षे प्राप्त्यभावेन अत्यन्ताप्राप्तविधानतो विधिगौरवापत्तेरिति व्रीहियवमात्रविषयत्वं नियमविधिबलीयस्त्वादाश्रितम्। किं च तत्रैवाधिकरणे व्रीहियवाभ्यां वैतुष्यार्थं अवघातोऽपेक्षितः नाज्यसान्नाय्याभ्यामित्यपेक्षितविधेरनपेक्षितविधानदौर्बल्यन्यायेनाप्यवघातस्य औषधद्रव्यमात्रशेषत्वं दर्शितं तद्वदिहाप्येकादशभिरहोभिः सहत्वसिद्धये पत्नीसंयाजान्तत्वमपेक्षितं नोत्तमे-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भान्हेति तेनापि न्यायेन प्रागुत्तमादन्हः पत्नीसंयाजान्तत्वविधिरिति सिध्यति अतस्तत्र वाक्यशेषानुग्रहोऽभ्युच्चयमात्रमिति तत्रैवाधिकरणे स्फुटम् । यत्तु 'सृष्टीरुपदधाती'त्यत्र उपसंहारानुसारेण समुदायलक्षणाश्रयणं तदानर्थक्यप्रतिहतानां विपरीतं बलाबलमिति न्यायात् बहुबाधादल्पबाधो वरमिति न्यायाच्च तल्लक्षणानाश्रयणे हि प्रत्येकमसृष्टिलिङ्गकमन्त्रोपधेयेष्टकास्तुतीनामिष्टकासाप्तदृश्यकीर्तनस्य च सर्वथा बाधः स्यात् ततो वरमेकस्य सृष्टिशब्दस्य लक्षणेति तस्मात्सामान्यविशेषविषययोरुपक्रमोपसंहारयोरुपसंहारानुसरणेन तत्प्राबल्यवर्णनमयुक्तम् । एतेन च्छागपशुन्यायोदाहरणमपि निराकृतं तत्राप्यनुष्ठानाय विधेर्विशेषाकाङ्क्षयैव मन्त्रार्पितविशेषे पर्यवसानाभ्युपगमात् ।

नन्वर्थवादान्वयं विना विधेरपर्यवसानात्तदर्पितविशेषग्रहणं युक्तं मन्त्रार्पितविशेषग्रहणं तु कथं स्यात् तदन्वयात्प्रागेवानियतविशेषकल्पनया विधिपर्यवसानसम्भवादिति चेन्न । पर्यवसितस्यापि विधेःप्रत्यक्षविशेषे सत्याक्षेपायोगाद्विधिमन्त्रयोरेकविषयत्वनियमात् पशुत्वसामान्यस्य कृत्स्नस्य च्छागे सद्भावाविरोधेन कांस्यभोजनन्यायावतारान्नियमसम्भवे अनियमानुपपत्तेश्च मन्त्रार्पितविशेषग्राहकत्वात् । अत एव स्थितेप्यक्ताधिकरणेऽप्यपर्यवसितं सामान्यं श्रुतविशेषे पर्यवस्यतु पर्यवसितं तु न सङ्कोचनीयमित्यधिकाशङ्कायां छागपशुन्यायावतारः दृष्टं च पर्यसितस्यापि अग्निहोत्रं जुहोतीति(१)विधेरनियतद्रव्यदेवताक्षेपं विना 'पयसा जुहोति यदग्नये च प्रजापतये च सायं जुहोतीति' वाक्यान्तरविधेयद्रव्यदेवताग्राहकत्वं अन्यथा तत्राप्याक्षेपेणानियतद्रव्यविशेषादिकल्पनयैव पर्यवसानात् उत्पत्तिशिष्टगुणावरोधन्यायेन वाक्यान्तरविधेयद्रव्यविशेषान्वयो न स्यात् तस्मात्तद्वदेव श्रुतविशेषे सत्याक्षेपानवतारात्तदाकाङ्क्षयैव मन्त्रार्पितविशेषपर्यवसानं नोपसंहारप्राबल्यात् । यदि च 'योदीक्षितो यदग्नीषोमीयं पशुमालभेत' इत्ययं विधिः स्वाकाङ्क्षया विना उपसंहारप्राबल्यादेव पशुसामान्यं परित्यज्य मन्त्रार्पितं छागं द्रव्यतया गृह्णीयात् तदाऽग्नीषोमावपि परित्यज्य 'त्वं ह्यग्ने प्रथमो मनोतेति' मनोतामन्त्रार्पितं

(१) जुहोतीत्यादि इति पु० पा० ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

'उपनयत मेध्यादुर आशासाना मेधपतये मेध'मित्य(१)धिगुप्रैषगतदेतापदैकवचनान्तमेधपतिशब्दोपोद्बलितश्च केवलाग्निमेव देवतात्वेन गृह्णीयात् । नचेष्टापत्तिः दशमे मनोताधिकरणे मनोतामन्त्रस्थाग्निशब्दस्यैकदेशछागाग्नीषोमप्रकाशकत्वस्य नवमे मेधपत्यधिकरणे मेधपतय इत्येकवचनस्याग्नीषोमोभयव्यासक्तदेवतैक्याभिप्रायत्वस्य च समर्थितत्वात् । न च मनोतामन्त्रे केवलाग्निशब्दप्रयोगेऽप्यग्नीषोमाभ्यां च्छागस्येत्यादिमन्त्रान्तरेष्वग्नीषोमपदप्रयोगात् मेधपतिशब्दस्य क्वचिच्छाखायामेकवचनान्तपाठेपि शाखान्तरे द्विवचनान्तपाठाच्च विध्यनुगुणमन्त्रसद्भावे तदनुगुणमन्त्रार्पितग्रहणमपि नोपेयत इति वाच्यम् । तथा सति द्रव्यविषयेपि 'इमं पशुं पशुपते ते अद्य' 'पाशात्पशुं प्रमुञ्चते' त्याद्यनुगुणमन्त्रसद्भावादननुगुणमन्त्रार्पितच्छागग्रहणमपि न स्यात् तस्माद्देवताविषये आकाङ्क्षाविरहान्मन्त्रार्पितस्याग्रहणं द्रव्यविषये तत्सत्वान्मन्त्रार्पितस्य ग्रहणमित्येव विशेषो वक्तव्यः । अत एव 'व्रीहिभिर्यजेतेति' विधे' र्धान्यमसीति' मन्त्रार्पितसामान्यग्र (२) हणमनुष्ठानाय विशेषाकाङ्क्षाया इव सामान्याकाङ्क्षाया विरहात् अयुक्तश्चाकाङ्क्षाभावे पदार्थस्य मन्त्रानुसारेण सङ्कोचः मन्त्रोह्यनुष्ठानकाले पदार्थं प्रकाशयन् पदार्थशेषः न च शेषानुसारेण शेषिसङ्कोचो युक्तः अन्यथा 'स्योनं ते सदनं करोमि घृतस्य धारया सुशेवं कल्पयामि । तस्मिन्त्सीदामृते प्रतितिष्ठ व्रीहीणां मेध सुमनस्यमान' इति व्रीहिलिङ्गकमन्त्रानुसारेण सदनकरणप्रतिष्ठापनं व्रीहिपुरोडाशे सङ्कुचिते कल्पनीय इति यवपुरोडाशे ते न स्यातां तस्माद्यथा गुणानुसारेण प्रधानसङ्कोचायोगाद्यवपक्षेपि सदनकारणप्रतिष्ठापने मन्त्रः परं व्रीहिपक्ष इति व्यवस्था तथात्रापि सर्वेपि पशवो द्रव्याणि मन्त्रः परं छागपक्ष इत्येव स्यात् यदि विध्यर्थाकाङ्क्षानुसरणं न स्यात् निराकृतश्च साक्षादिन्द्रपीताधिकरणे निराकाङ्क्षस्य विधेर्मन्त्रलिङ्गानुसारेण सङ्कोचः तत्र हि सोमेन यजेतेत्यत्राविशेषेण ऐन्द्रानैन्द्रप्रदानरूपसर्वाभ्यासानुवृत्तज्योतिष्टोमयागाङ्गत्वेन

(१) सामान्याग्रहणमिति पु० पा० ।
(२) मित्यग्रिमप्रेषगतदेवतापरैक इति पा० पु० ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विहितस्य सोमद्रव्यस्य 'इन्द्राय त्वा वृत्रघ्ने इन्द्राय त्वा वसुमते सोमं गृह्णामीति' मानग्रहणमन्त्रानुसारेणैन्द्रप्रदानविषयतया सङ्कोचमाशङ्क्य गुणानुसारेण प्रधानसङ्कोचो न युक्तः कामं मन्त्र ऐन्द्रविषयः स्यादिति व्यवस्थापितम् । निराकाङ्क्षस्यापि विधेरुपसंहारप्राबल्येन सङ्कोचमभ्युपगच्छतस्तत्रापि सङ्कोचः स्यात् इति तदधिकरणविरोधो वज्रलेपायत इत्यलं विस्तरेण । किञ्च विधेर्मन्त्रानुसारेण पर्यवसानाभ्यु(१)पगमेपि न तत उपसंहारप्राबल्यं मन्त्रस्य विध्युपसंहारत्वाभावादेकवाक्यतया पूर्वापरभावेनाम्नातयोर्हि उपक्रमोपसंहारभावः। न च विधिमन्त्रयोः पूर्वापरभावनियमोऽस्ति । न च यत्र तत्र स्थितस्यापि मन्त्रस्य विधिप्रापितानुष्ठेयप्रकाशकतया तदनुवादरूपतैव तदुपसंहारत्वम्।तथात्वे यथाप्राप्त्यनुवाद इति न्यायेन पुरोवादानुवादयोः पुरोवादस्य प्रबलतयोपक्रमस्य प्राबल्यमापतेदित्यनुवादस्योपसंहारत्वपरिभाषायाः स्वप्रतिकूलत्वादिति दिक् ।

यत्तु श्येनवाक्ये उपसंहारप्राबल्यमुदाहृतं तदप्ययुक्तं तत्रापि श्येनशब्दस्य यागनामत्वाय ज्योतिष्टोमनाम्न इव प्रवृत्तिनिमित्तापेक्षानुरोधेनैव वाक्यशेषोपदर्शितसादृश्यावलम्बनेन गौणत्वाङ्गीकारात् । अन्यथा श्येनशब्दस्य रूढ्या पक्षिपरत्वे कर्ममात्रविधिस्वीकारे गुणश्रवणवैयर्थ्यापत्तेः । कर्मणि गुणविधिस्वीकारे फलश्रवणवैय्यर्थ्यापत्तेः । फलाय गुणविशिष्टकर्मविधिस्वीकारे विशिष्टविधिगौरवापत्तेः फले कर्मणः कर्मणि गुणस्य च विधिस्वीकारे वैरूप्येन विरुद्धत्रिकद्वयापत्तेः कर्माश्रित्य फलाय गुणविधिस्वीकारे विप्रकृष्टविधानस्य धातोरत्यन्तपारार्थ्यस्य चापत्तेर्वाक्यशेषोपदर्शितश्येनसादृश्येन शब्दस्य यागे गौणनामत्वे सम्भवति सोमेन यजेत दध्नेन्द्रियकामस्य जुहुयादित्यादिवत् अनन्यगतिकविशिष्टविधित्वादिकल्पनायोगादत उदाहृतसर्वदोषपरिहाराय श्येनशब्दस्य यागनामत्वसिद्धये प्रवृत्तिनिमित्ताकाङ्क्षयैव वाक्यशेषानुसरणम् । अतएव यत्रोपक्रमस्य नाकाङ्क्षा तत्र तद्विरुद्धार्थोपस्थापकोपसंहारानुसरणं न क्रियते यथा 'अवकाभिरग्निं विकर्षति' इत्यत्रावकाशब्दस्या'पो वैशान्ता'इति वाक्यशेषानुसा-

(१) पर्यवसाननियमाभ्युपगमपीति पु० पा० ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रेणाप्सु लक्षणा नोपेयते अर्थवादाधिकरणे गुणवादसूत्रेणापो वै शान्ता इत्यभिजनस्तुतिद्वारेणावकानामेव स्तुतिरिति विधिस्तुत्योर्वैय्यधिकरण्यपरिहारात् । यथावाऽग्निचयने 'नैवारं चरुमुपदधाती'त्यस्य स्थण्डिलनिर्वृत्यौपयिकयथाश्रुतचरूपधानविधानेन निराकाङ्क्षस्य 'बृहस्पतेर्वा एतदन्नं यन्नीवारा' इत्युपधानरूपगुणकर्मानन्वयिदेवतासम्बन्धप्रतिपादकवाक्यशेषानुसारेण यागविधायकत्वं नाङ्गीक्रियते * संयुक्तस्त्वर्थशब्देनेति * द्वितीयाधिकरणे उपक्रमस्य नैराकाङ्क्ष्याद्वाक्यशेषस्य देवतासमर्पकत्वं निराकृत्य बृहस्पतिपदस्य ब्राह्मणपरत्वाङ्गीकारेण उत्पन्नतया नीवारस्तुतिपरत्वनिर्णयादुपसंहारप्राबल्यवादिनस्त्ववकाशस्यास्य लक्षणा चरुमुपदधातीत्यस्य यागविधायकत्वं च स्यात् । तस्मात्तत्र निराकाङ्क्षस्य वाक्यशेषानुसारेण निराकरणात् इह श्येनवाक्ये उपक्रमाकाङ्क्ष्यैवोपसंहारानुसरणम् । अभ्युपेत्य चेदमुक्तं मीमांसकैर्विध्याकाङ्क्ष्योपसंहारानुसरणं श्येनवाक्य इति । वस्तुतस्तत्रोपक्रमानुसारेणोपसंहार एवान्यथा नीतः उपसंहारस्य पक्षिपरत्व एवाङ्गस्येन यागपरत्वे तदनाङ्गस्यात् । तथाहि पक्षद्वयेपि तावत्तत्रोपमानभागस्य यथा श्येनपक्षी निपत्य मत्स्यादिकमादत्त इत्यर्थः तत्र मत्स्यकामित्यस्यानुपादानेपि प्रसिद्धस्यैव दृष्टान्तीकर्तव्यतया तल्लाभावुपमेयभागस्य त्वेवमयं यजमानस्य शत्रुं मारयतीत्यर्थः । पक्षिणि यागे चोभयत्रापि शत्रोर्मुख्यस्य निपत्यादानस्यासम्भवात् पक्षिपक्षे फले यागे वा साधनत्वेन विनियुक्तस्य पक्षिणः शत्रोरादाने व्यापारासम्भवाद्यागपक्षे क्रियायां निपतनादानक्रिययोः सर्वथैवासम्भवाच्च । एवं च वाक्यशेषस्य पक्षिपरत्वे यथा श्येनः पक्षी निपत्य मत्स्यादिकमादत्ते एवमयं फले यागे वा विनियुक्तः श्येनः पक्षी यजमानस्य शत्रुं मारयतीत्यर्थः अत्र श्येनपक्षिनिष्ठयोर्लोकप्रसिद्धमत्स्याद्यादानविध्युद्देशोपात्तद्विषन्मारणयोरेवोपमानोपमेयभावः प्रतीयते नतु श्येनस्यैव श्येनेनेति नाभेदेन सादृश्यानुपपत्तिः । यद्यपि तयोः साधारणधर्मानोपात्तः तथापि यथा जले स्वच्छन्दं विहरतो मत्स्यस्य श्येनकृतनिपत्यादानं झटित्यशङ्कितोपस्थितं भवति तथा तत्कृतं द्विषतो मारणमपीति गम्यसाधारणधर्मोस्त्येव तथा च यथा 'कप्या-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

संपुण्डरीकमेवमक्षिणी'त्यादाविव गम्यसाधारणधर्मेणोपमानोपमेयाभावानिर्देशेपि न काचिदनुपपत्तिः अवश्यं च तस्य साधारणधर्मस्य गम्यत्वं पक्षान्तरेप्यभ्युपगन्तव्यं अन्यथा द्विषन्मरणमात्रस्य विध्युद्देशादेवावगतत्वेन वाक्यशेषात् दृष्टान्तबलेन तदनवगतयैच्छ्यानवगमे ततः प्रवृत्तिविशेषकरस्तुतिविशेषालाभप्रसङ्गात् तथाच यथा लोके प्रच्छन्नतया गृहं प्रविश्य प्रच्छन्नतयैव निर्गते चैत्रे तस्य प्रच्छन्नतया गृहप्रवेशमात्रं जानानमन्यं प्रति यथा देवदत्तो गृहं प्रविष्टः तथैव निर्गत इति वाक्येन देवत्तनिष्ठयोरेव प्रवेशनिर्गमनक्रिययोः प्रच्छन्नकृतत्वरूपगम्यसाधारणधर्मेणोपमानोपमेयभाव उच्यते नतु देवदत्तस्यैव देवदत्तेनेति मुख्य एवोपमानोपमेयभावः तथाऽत्रापीत्युपपद्यते अयमित्यस्य च सन्निहितप्रथमान्तपदोक्तपक्षिपरत्वेनार्जवं लभ्यते यागपरत्वे तु वाक्यशेषस्यायमित्यस्य व्यवहितयज्युपात्तकरणपरामर्शित्वेनानार्जवं स्यात् । पक्षियागयोश्च मुख्य उपमानोपमेयभावः स्यात् अनुगतसाधारणधर्माभावेन मुख्यसादृश्यासम्भवात् पक्षिणि मत्स्यादिकर्मकमुख्यं निपत्यादानं यागे तु भ्रातृव्यकर्मकं मारणमेवाशङ्कितोपस्थितिकत्वगुणयोगात् तथोपचरितं मुख्यं निपत्यादानमिति तत्प्रयोज्यपक्षियागयोरमुख्यमेव पक्षिसादृश्यम् । न च यागपरत्वपक्षेपि पक्षियागगतयोर्मत्स्यादानभ्रातृव्यमारणयोरेवोपमानोपमेयत्वमुच्यतामिति वाच्यम् । तावता यागे श्येनशब्दप्रवृत्तिनिमित्तस्य श्येनसादृश्यस्यालाभात् उपसंहारानुसारेण श्येनशब्दगौणत्वोक्त्ययोगात् । तस्मादुपक्रमे लाघवाद्यनुसारेण यागमात्रविधिनिर्वाहाय श्येनशब्दस्य यागनामत्वसिद्धये प्रवृत्तिनिमित्तापेक्षायामन्यत्र रूढस्य तत्र मुख्यप्रवृत्तिनिमित्तासम्भवेपि गौणप्रवृत्तिनिमित्तलाभायोपक्रमाकाङ्क्षानुसारेणैव वाक्यशेषे अयमित्यस्य व्यवहितकरणपरामर्शित्वं वाक्यशेषस्यामुख्यसादृश्यपरत्वं च कल्पितमिति तत्रोपक्रमानुसारेणोपसंहारो नीत इत्येव युक्तम् ।

यत्तु वैश्वानरवाक्ये उपसंहारप्राबल्यमुदाहृतं तदतितुच्छम् । न हि तत्रोपसंहारानुसारेण उपक्रमे श्रुतस्य कस्य चिदुपमर्दोस्ति उपक्रमावगतपुत्रजननिमित्तत्वापरित्यागेनैव रात्रिसत्रन्यायेन वाक्यशेषावगतफलस्यापि स्वीकारात् त-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्स्वीकारोपि विध्याकाङ्क्षयैव प्रवर्त्तकस्यैव विधेः फलविशेषसाधनत्वज्ञानं विना पुरुषस्याप्रवृत्त्या प्रवर्तकस्या(१)पर्यवसानात् । अत एवान्यतः प्रवृत्तिलाभेन विधेराकाङ्क्षाविरहात्पर्णमयीवाक्यशेषे श्रुतस्याप्यपापश्लोकश्रवणादेर्नतत्फलत्वमुपेयते । वस्तुतस्तु वैश्वानरवाक्येप्युपक्रमप्राबल्यमेव सुवर्चं यस्मिन्जात इत्यादिवाक्यशेषे पुत्रेष्टिपूतत्वभवनयोरुभयोरपि वर्तमानापदेशेन तुल्यकालत्वप्रतीत्या पूतत्वादेः पुत्रेष्टिफलत्वानवगमेपि विधेः प्रवर्तकत्वपर्यवसानाय फलविशेषाकाङ्क्षयैवाश्रुतफलकल्पनाद्धरं श्रुतस्यैव पूतत्वादेः फलत्वविपरिणाम इति यत्पदस्य व्यत्यासेन योजनं णिजर्थसनर्थाद्यन्तर्भावं च कल्पयित्वा यं पूतत्वादियुक्तं भावयितुमिच्छति तस्मिन्जात एतामिष्टिं निर्वपेदिति विपरिणामेन वाक्यशेषस्य फलसमर्पकत्वाभ्युपगमात् तस्मादुपक्रमप्राबल्य एवोदाहरणीयानि अक्ताधिकरणादीनि कथमर्वाचीनैरुपसंहारप्राबल्ये उदाहृतानीति न विद्मः । ननु प्रस्तरप्रहरणं सूक्तवाकमन्त्रगतायुरादीनां फलत्वमुपगतं तत्र विध्याकाङ्क्षया अङ्गतयान्यतः प्रवृत्तिलाभेन तद्विरहादिति तत्र मन्त्ररूपोपसंहारप्राबल्यमेवोपासनीयम् । उच्यते । न मन्त्रप्रकाश्यत्वेन तत्र तेषां फलत्वं किन्तु श्रुतिविनियुक्तकृत्स्नसूक्तवाकमन्त्रप्रकरणत्वान्यथानुपपत्त्या 'सूक्तवाकेन प्रस्तरं प्रहरतीति' कृत्स्नसूक्तवाकः प्रस्तरप्रहरणे विनियुक्तः न चासौ साक्षात्प्रहरणं प्रकाशयितुं शक्नोति नापि तत्साधनं प्रस्तरं तस्मात् ज्ञायते यदनेन प्रकाश्यते तत्प्रहरणसम्बन्धीति नह्यन्यथा श्रुत्यवगतं कृत्स्नस्य सूक्तवाकस्य प्रहरणाङ्गत्वं घटते क्रियातत्सम्बन्धिप्रकाशनेनैव हि मन्त्रस्य करणता सूक्तवाकेन चाग्न्यादयोदेवताः प्रकाश्यन्ते आयुरादीनि च फलानि तत्र देवता साधनतां प्रतिपद्यते फलानि साध्यत्वमेव इत्थमेव नावमिकं सूक्तवाकाधिकरणे आयुरादीनां फलत्वव्यवस्थापनं कृतं न मन्त्रप्रकाश्यत्वमात्रेण, 'उरु प्रथस्वोरु ते यज्ञपतिः प्रथता'मितिलिङ्गविनियोज्यमन्त्रप्रकाश्यस्य यज्ञपतिप्रथनस्य हि पुरोडाशप्रथनफलत्वं निराकृतं मन्त्राधिकरणभाष्ये । ननु तथाप्यन्यदस्ति उदाहरणं उपसंहारप्राबल्ये तथा हि दशमे*न चेदन्यं प्रकल्पयेत् प्रक्लृप्तावर्थवादस्यानार्थक्यात्परसामर्थ्याच्चे * त्य-

(१) प्रवर्तकत्वा ऽपर्यवसानात् । पु० पा० । अयं युक्तः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

धिकरणे अग्निहोत्रं प्रकृत्य श्रुतेन 'जर्तिलयवाग्वा वा जुहुयात् गवीधुकयवाग्वा वा न ग्राम्यान् पशून् हिनस्ति नारण्यानिति' वाक्येन जर्तिलगवीधुकशब्दवाच्यारण्यतिलारण्यगोधूमकृतयवाग्वोर्विकल्पनाग्निहोत्रहोमद्रव्यत्वविधाने लिङ्गविभक्तिबलेन ग्राम्यारण्यपशुहिंसारहिततया तयोः स्तवनेन च प्रतीयमानेपि 'अथो खलु रनाहुतिर्वै जर्तिलाश्च गवीधुकाश्च' 'पयसाग्निहोत्रं जुहुयादिति' तदनन्तरं जर्तिलादिप्रतिक्षेपेण पयोविधिदर्शनात् तदेकवाक्यतया जर्तिलयवाग्वा वा जुहुयादित्यादेर्ग्राम्यारण्यपशुहिंसाराहित्येन प्रशस्ततया होमार्हाणामपि जर्तिलगवीधुकानां पयोपेक्षया दुष्टत्वात्पयः प्रशस्तमिति पयःस्तुतिलक्षकत्वप्रदर्शनेनोपसंहारप्राबल्यमाश्रितम्। न चानर्थक्यहेतुना सूत्रकृता पयःस्तुतिपरत्वमुक्तं नोपसंहारानुसारेणेति वाच्यम् । पयसा सह विकल्पार्थं जर्तिलादिविधानसम्भवेनानर्थक्याभावात् तेन हेतुना जर्तिलयवाग्वा वा जुहुयादित्यादेः पयस्तुत्यर्थत्वासिद्धेः अनाहुतिर्वै जर्तिलाश्चेत्यादेः जर्तिलादिनिषेधरूपत्वमेव न तु पयःस्तुत्यर्थत्वमिति शङ्कायां विहितजर्तिलादिनिषेधस्य ग्रहणाग्रहणवद्विकल्पार्थकत्वाद्विकल्पस्य च 'पयसा जुहुयादिति' द्रव्यान्तरविधानादेव च सिद्धेर्निषेधानर्थक्यात् । न हि निन्दान्यायेन पयोविधिस्तुत्यर्थतैवेत्यानर्थक्यहेतोरनाहुतिर्वा इत्यादिभागस्य पयःस्तुत्यर्थतागमकत्वात् । * शिष्ट्वा तु प्रतिषेधः स्यादिति * पूर्वाधिकरणे अतिरात्रे षोडशिनं गृह्णातीति विधायाम्नातो नातिरात्रे षोडशिनं गृह्णातीत्ययं तत्प्रतिषेधः न तु नानूयाजेष्वित्यादिवत्पर्युदासादिरूप इत्युक्तेः तर्हि तद्वदेव अनाहुतिर्वा इत्ययमपि प्रतिषेध इति शङ्कायां तन्निराकरणाय सूत्रप्रवृत्तेश्च तथाचास्मिन्सूत्रे शिष्ट्वा(२)प्रतिषेधः स्यादिति पूर्वसूत्रानुषङ्गेण न चेदन्यं विधिं कल्पयेद्यद्यत्र प्रत्यक्षो विधिः सन्निहितो न स्यात्ततः षोडशिग्रहणाग्रहणवदेकेन शिष्ट्वा परेण प्रतिषेधः स्यात् इह तु पयसाग्निहोत्रं जुहुयात् इति विध्यन्तरस्य क्लृप्तत्वात्तच्छेषभूतोऽयमर्थवादः स्यात् विहितप्रतिषेधफलस्य विकल्पस्य पयोरूपद्रव्यान्तरविधानादेव सिद्धेः प्रतिषेधानर्थक्यादियुक्तेः जर्तिला-

---

(१) शिष्टत्वात्तु इति पु० पा० ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

धनाहुतित्वकीर्तनस्य कथं पयःप्रशंसापरत्वमिति शङ्कायां यो हेतुरुच्यते परसामर्थ्यात्परेण पयोविधिनाऽर्थवादत्वेनान्वये सामर्थ्यादिति तत्साधारण्यादेव जर्तिलयवाग्वा जुहुयादित्यादेः पयोविधिशेषत्वं वक्तव्यं दृष्टं हि कस्य चिन्निन्दायास्तदितरस्तुतौ पर्यवसानवत् कस्य चिद्विधिस्तुतिपूर्वकनिन्दाया अपि सहैव विधिस्तुतिभ्यामितरस्तुतौ पर्यवसानं यथा देवदत्तस्तावदतीव विद्वानित्युक्त्वा न तस्य बृहस्पतिरपि समान इति च स्तुत्वा सोपि यज्ञदत्तमपेक्ष्याविद्वानित्युक्तेः सर्वस्यापि यज्ञदत्तस्तुतौ पर्यवसानमिति तथाच पश्चात्पयोविधिदर्शनादुपक्रमावगतस्य जर्तिलयवाग्वादिविधेस्त्याग इत्युपसंहारप्राबल्यापेक्षणं दुर्वारमिति मैवम् । तत्रानेकदृष्टकल्पनानुबन्धिवाक्यभेदपरिहाराय जर्तिलादिविधित्याग इत्युपसंहारप्राबल्यानाश्रयणात् यत्र ह्यनेकविधायकश्रवणं तत्रैकस्य विधायकत्वं अन्यस्यानुवादकत्वमित्येकवाक्यत्वसम्भवे वाक्यभेदावहो विधिभेदो न स्वीकियते अत एव 'नगिरा गिरेति ब्रूयादैरं कृत्वोद्देय' मित्यत्र गिरापदकार्ये (१) इरापदविधानादेव गिरापदनिवृत्तिसिद्धेरैरं कृत्वोद्देयमित्येव विधिः न गिरा गिरेति ब्रूयादिति तु तत्प्राप्तगिरापदनिवृत्त्यनुवाद इरापदस्य गिरापदकार्यापत्तिसिद्धये तत्कार्यलक्षणार्थं नतु गिरापदप्रतिषेधविधिः गिरापदनिषेधमात्रादिरापदस्याप्राप्तेरैरं कृत्वोद्देयमित्यस्यापि विधायकत्वापत्त्या वाक्यभेदापत्तेरित्युक्तं अत एव च नचतुस्त्रिंशदिति ब्रूयात् षड्विंशतिरिति ब्रूयादित्यत्राश्वमेधे अश्ववंक्रीयत्ताप्रकाशनाय पठितायाः 'श्रुतुस्त्रिंशद्वाजिनोदेवबन्धोवंक्रीरश्वस्य स्वधितिः समेती'त्यस्या ऋचो न चतुस्त्रिंशदिति प्रतिषेधेन प्राप्तस्य षड्विंशतिरस्य वंक्रय इति वंक्रिमन्त्रस्य यथाप्राप्त्यनुवादमात्रं षड्विंशतिरित्येवब्रूयादिति वचनं न तु प्राकृतमन्त्रे षड्विंशतिपदनियमेपि तस्य तात्पर्यं तस्यापि विधाने वाक्यभेदापत्तेरिति तूपरगोमृगयोरश्वस्य वंक्रिणा समस्य वचनस्य षडशीतिरेषां वंक्रय इत्येवं रूपस्याबाध उक्तः एवं रथन्तरे प्रस्तूयमाने सम्मीलयेत् स्व(२)दैशं प्रति वीक्षेतेत्यादिष्वपि बहुषु स्थलेषु वाक्यभेदपरिहारायैकोविधिरपरोऽनुवाद इति व्यवस्थापनं दृष्टं एवमिहापि वाक्यभेदपरिहाराय जर्तिलादिवाक्यस्य विधिसरू-

(१) पदवाक्ये इति पु० पा० । (२) स्वसदश पा० पु० ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पार्थवादत्वाश्रयणमिति नानेनोपसंहारप्राबल्यसिद्धिः ।

यत्तु क्वचिदुक्तं अर्थैकत्वाधिकरणे 'यदृचाऽस्तुवत' इत्यस्याकर्तृविशेषणविधिशक्त्यप्रतिबन्धकयच्छब्दयुक्तस्यापि उपक्रमस्य 'य एवं विद्वान्साम्ना स्तुवीतेति' कर्तृविशेषणविधिशक्तिप्रतिबन्धकयच्छब्दयुक्तोपसंहारबलेन स्वतः प्राप्तमृग्विधानत्वं परित्यज्य सामविधिशेषत्वस्वीकारादुपसंहारप्राबल्यमाश्रितमिति तदप्यनेन निरस्तम् । तत्रापि वाक्यभेदादिदोषपरिहारार्थमौपसंहारिकसामविधिशेषत्वस्वीकारात् । तथा हि उपक्रमे 'यदृचास्तुवते तदसुरा अन्ववायन् यत्साम्ना स्तुवते तदसुरा नान्ववायन्निति' ऋचा स्तुतिः साम्ना स्तुतिश्चेत्युभयं श्रूयते न तु ऋचा स्तुतिमात्रं विधिस्तूभयत्रापि न श्रूयते तत्कल्पना चोभयत्र न सम्भवति एकवाक्यत्वसम्भवे वाक्यभेदस्यान्याय्यत्वात् प्रकृते चासुरागमनहेतुत्वेन भयावहतया ऋचा स्तुतिं निन्दित्वा साम्ना स्तुतिर्विधीयत इति वा अवश्यानामसुराणामपि वशीकरणहेतुत्वेन स्तुतामृचा स्तुतिं विधायाग्रे तच्छेषतया साम्ना स्तुतिरवश्यवशीकरणासमर्थत्वेन निन्द्यत इति वा एकवाक्यत्वसम्भवात् । न चात्र किं चिदन्यतरस्मिन् पक्षे विनिगमकमुपक्रमे दृश्यते न च तत्र विनिगमकादर्शनमात्रेण वाक्यभेदमभ्युपगम्य उभयत्र विधिकल्पनं युक्तं असुरान्ववायन्नित्यस्य भयावहत्वेन निन्दापरत्वे ऋचा स्तुतौ विध्ययोगात् अवश्यवशीकरणसमर्थत्वेन स्तुतिपरत्वे तदसमर्थत्वेन निन्द्यमानायां साम्ना स्तुतौ विध्ययोगात् । न चान्ववायन्नित्यस्यावश्यवशीकरणसामर्थ्येन स्तुतिपरत्वं नान्ववायन्नित्यस्य भयावहानागमनहेतुत्वेन स्तुतिपरत्वमिति द्विरूपार्थकल्पनमुचितं प्रथमवाक्ये यदभिप्रायेणासुरा अन्ववायन्नित्युक्तं तन्निषेध एवासुरा नान्वयन्नित्यस्य स्वारस्यात् ततश्च वाक्यभेदस्य ऋचा साम्ना च स्तुत्योर्विकल्पस्योभयोरन्ववायन्नित्येतयोर्भिन्नार्थत्वस्य च परिहाराय किमन्यतरत्र विधौ विनिगमकमस्तीति स्वत एवोपक्रमस्य विनिगमकापेक्षया साम्ना स्तुवीतेति प्रत्यक्षविधेस्तद्विनिगमकत्वेनाश्रयणं नत्वौपसंहारिकत्वेन प्राबल्यात् ततश्च तदनुसारेणासुरा अन्ववायन्नित्यस्य निन्दापरत्वनिर्णयः अत एव स्तुतौ सन्दिग्धं विधिनाऽवधार्यत इत्यस्येदमुदाहरणमिति प्राग्दर्शितं ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ननूपक्रमप्राबल्ये यद्वचा स्तुवत इति परमोपक्रमश्रवणमात्रेण ऋचा स्तुतौ विधिरित्यवधारितं तदनुसारेणैव तदनन्तरश्रुतं सर्वं नेतव्यं स्यादिति चेत् । स्यादेवं यदि तत्र प्रत्यक्षोविधिः श्रूयेत कल्प्यस्तु तत्र विधिः कल्पनं च तद्विरुद्धप्रत्यक्षश्रुतोवाक्यशेषोनिरूणद्धीत्यावेदितमक्ताधिकरणार्थनिर्णय इत्येषा दिक् ।

एवमन्यत्रापि सम्भाविताः क्षुद्रोपद्रवा अनयैव दिशा निरसनीयाः। यत्नूपक्रमप्राबल्यवादे किमुपक्रमे प्रतीतमात्रस्य ग्राह्यत्वमित्यादिप्रलपितं तदुपसंहारप्राबल्यवादे किमुपसंहारे प्रतीतमात्रस्य ग्राह्यत्वं किंवा उपक्रमपरामर्शेन व्यवस्थितस्य, आद्ये उच्छिष्टादीनामृगादिधर्मत्वापत्तिः द्वितीये उपक्रमस्यैव प्राबल्यं सिद्ध्येदिति प्रतिवचनमेव रिक्तीकरोति । वस्तुस्थितिस्तु उपक्रमस्वारस्येन प्रतीतं ग्राह्यं नोपसंहारपरामर्शेन व्यवस्थितं श्येनादिवाक्ये विशिष्टविधिगौरवादिभिया उपक्रमस्य स्वारस्येनैव पक्ष्यादेरग्रहणं नोपसंहारानुसारेणेत्यावेदितमेव तस्माद्वार्तिकोक्तरीत्या निरवद्यमुपक्रमप्राबल्यम्। एवं पूर्वमीमांसायां व्यवस्थितमुपक्रमप्राबल्यमुररीकृत्यैवोत्तरमीमांसायामपि भगवत्पादैः तत्रतत्रार्थनिर्णयाः कृता दृश्यन्ते । यत्त्वर्वाचीनैः पूर्वमीमांसायामिवोत्तरमीमांसायामप्युपसंहारप्राबल्योपजीवनमस्ति तत्र तदन्तरप्रतिपत्तावित्यधिकरणे 'तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वति'इतिपञ्चाग्निविद्यागतवाक्ये श्रद्धाशब्दस्य 'इति तु पञ्चम्यामाहुतौ आपः पुरुषवचसोभवन्ती'त्युपसंहारानुसारेणाप्युपलक्षणायाः *प्रथमे ऽश्रवणात् इति चेन्न ता एव ह्युपत्तेरिति*सूत्रेणोक्तत्वादित्युदाहरद्भिस्तत्रापि स्वाव्युत्पत्तिप्रकटनं कृतं तस्य यथाश्रुतं भगवत्पादीयं तत्सूत्रगतोपपत्तिपदव्याख्यानमेव निराकरणं भगवत्पादैर्हि'वेत्थ यथा पञ्चम्यामाहुतावापः पुरुषवचसोभवन्तीति'परमोक्रमप्रश्नोपपत्तिः'वेत्थ यथा पञ्चम्यामाहुतावापः पुरुषवचसोभवन्ति इति तु पञ्चम्यामाहुतावापः पुरुषवचसोभवन्तीति' प्रश्नप्रतिवचनैकरूप्योपपत्तिः श्रद्धाकार्यसोमवृष्टयन्नरेतोरूपानन्तराहुतिद्रव्याणां जलप्रचुरोपपत्तेः(१)प्रत्यवविशेषरूपायाः श्रद्धायाः स्वोपादानादवच्छिद्यान्यत्र प्रक्षेपस्यासम्भवेनाहुतिद्रव्यत्ववर्णनायोगात् श्रद्धाशब्दस्य स्वत एव

(१) पपत्तेः प्रत्यवि० पा० पु० ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रक्षेपयोग्यद्रव्यपरत्वाकाङ्क्षायां वाक्यशेषसमर्पितास्वप्सु तात्पर्योपपत्तिः 'श्रद्धावा आप' इत्यादौ श्रद्धाशब्दस्याप्यप्सु दृष्टप्रयोगत्वेन तल्लक्षणोपपत्तेश्च 'श्रद्धां जुहोती'त्यत्र श्रद्धाशब्दस्याप्युपलक्षणाभ्युपगमे मूलत्वेन व्याख्याता नोपसंहारमात्रोपपत्तिः तस्मात्तत्रायमस्थाने भ्रमः इह त्वेवं सम्भवति भ्रमः *अन्यथात्वं शब्दादिति चेन्नाविशेषा*दित्यधिकरणे 'हन्तासुरान्यज्ञ उद्गीथेनात्ययामे'त्युद्गीथोपक्रमेणोद्गीथस्योपास्यत्वे प्रतीयमानेप्युपसंहारे 'तेभ्य एष प्राण उदमाय'दित्यादौ उद्गातृपरामर्शात्तदनुरोधेनोद्गातुरेव प्राणदृष्ट्योपास्यत्वं नोद्गीथस्येति निर्णयः कृतः । *न संख्योपसङ्ग्रहादपी*त्यधिकरणे 'यस्मिन्पञ्चपञ्च जना आकाशश्च प्रतिष्ठितस्तमेव मन्य आत्मानं विद्वान् ब्रह्मामृतोमृतमिति' वाजसनेयकाम्नातमन्त्रगतस्य मनुष्येषु रूढस्य पञ्चजनशब्दस्य 'प्राणस्य प्राणमुत चक्षुषः चक्षुः श्रोत्रस्य श्रोत्रं मनसो मनो विदुरिति' वाक्यशेषसङ्कीर्तितेषु प्राणादिषु वृत्तिः *प्राणादयो वाक्यशेषादिति* सूत्रेणैवोक्ता । पारिप्लवाधिकरणे च 'सर्वाण्युपाख्यानानि पारिप्लवे शंसतीति' विध्यनुसारेण 'प्रतर्दनो ह वै दैवोदासिरिन्द्रस्य प्रियं धामोपजगाम युद्धेन च पौरुषेण च' 'मटचीहतेषु कुरुष्वाटक्या सह जायया उषस्तिर्हिंचाक्रायण इभ्यग्रामे मद्राणक उवासे' त्यादिब्रह्मविद्याङ्गभूतोपाख्यानानामपि पारिप्लवार्थत्वे प्राप्ते 'मनुर्वैवस्वतो राजे' त्यादिवाक्यशेषसङ्कीर्तिताख्यानविशेषेषु सर्वशब्दस्य सङ्कोचमभ्युपगम्य तेषामेव पारिप्लवार्थत्वं * पारिप्लवार्था इति चेन्नाविशेषितत्वा * दितिसूत्रेण निर्णीतम् । दहराधिकरणे च 'अथ यदिदमस्मिन्ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशः तस्मिन्यदन्तः तदन्वेष्टव्यं तद्वावविजिज्ञासितव्यं तं चेद्ब्रूयुर्यदिदमस्मिन्ब्रह्मपुरे दहरीकं वेश्म दहरोऽस्मिन्नन्तराकाशः किं तत्र विद्यते यदन्वेष्टव्यं यद्वाविजिज्ञासितव्यमिति स ब्रूयाद्यावान्वा अयमाकाशस्तावानेषोन्तर्हृदय आकाश उभे अस्मिन् द्यावापृथिवी अन्तरेव समाहिते इत्यादि' वाक्ये तस्मिन्यदन्तस्तदन्वेष्टव्यमित्युपक्रमे तस्मिन्नित्यस्याव्यवहिताकाशपरत्वस्वारस्येन आकाशान्तर्वर्तिनस्ततोऽन्यस्यान्वेष्टव्यत्वप्रतीतावपि 'यावान्वाअयमाकाश' इत्यादिवाक्यशेषे दराकाशस्य बाह्याकाशसमानपरिमाणत्वादिमहिमवर्णनदर्शनात्तस्यैवान्वेष्टव्यत्वं परब्रह्मरूपता चेत्युभयं *दहर उत्त-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रेऽय्य* इति सूत्रे निर्णीतं एवमेतेष्वधिकरणेषु भगत्पादरीत्योपसंहारानुसरणं प्रतीयत इत्यत्रैवं प्रतिबोधनीयम् । * अन्यथात्वं शब्दादिति चेत्यधिकरणोदाहरणे उपक्रमोपसंहारयोर्विरोध एव नास्ति तत्रोपक्रमप्रतीतोद्गीथापरित्यागेनैवोद्गीथगानकर्तृरूपे उद्गातरि प्राणादृष्टिविधानाभ्युपगमात् उपक्रमस्य लक्षणादिकल्पनं विनोपसंहारसमर्पितविशेषाद्यापमात्रं हि न तेन विरुद्ध्यते यथा गुरुमते आग्नेयादियागानामुत्पत्तिवाक्यावगतेन यागत्वेन 'चतुरवत्तं जुहोतीति'गुणविधिवाक्यावगतस्तेषु प्रक्षेपाधिकत्वरूपहोमत्वाद्यापो न विरुध्यते 'यस्मिन्पञ्च पञ्चजना' इति मन्त्रे पञ्चमनुष्याः परब्रह्मणि सन्तीत्येतावता परब्रह्मणः कस्य चिदुत्कर्षस्याप्रतीतेः पञ्चजनशब्दस्यान्यत्रैव क्वचिदर्थेतात्पर्यमिति सामान्यतोऽवगतौ तद्विशेषाकाङ्क्षायां वाक्यशेषसमर्पितप्राणादिपरिग्रहो न तु तदनुसारेणोपक्रमस्यान्यथानयनम् । सर्वाण्युख्यानानिपारिप्लवे शंसंतीत्यत्रानन्तशाखागतसर्वाख्यानशंसनस्याशक्यतयोपक्रमस्यैव केन चिदवच्छेदेन आख्यानसामस्त्ये पर्यवसानाकाङ्क्षया वाक्यशेषसङ्कीर्तिताख्यानसामस्त्ये पर्यवसानं नोपसंहारानुसारेण दहराधिकरणे दहराकाशस्य परब्रह्मता वाक्यशेषगतश्रुतिलिङ्गभूयस्त्वेन निर्णीता*विप्रतिषिद्धधर्माणां समवाये भूयसां स्यात्सधर्मत्वमिति* न्यायादत एव तत्र उत्तरेऽय्य इति बहुवचनेन लिङ्गभूयस्त्वं दर्शितं वाक्यशेषे च यावान्वा अयमाकाश इत्यादिना प्रतिपादितं प्रसिद्धाकाशसादृश्यं उभेऽस्मिन् द्यावापृथिवी इत्यारभ्य यच्चास्येहास्ति यच्च नास्ति सर्वं तस्मिन्समाहितमित्यन्तेन प्रतिपादितं द्यावापृथिव्यग्निवायुसूर्यचन्द्रविद्युन्नक्षत्रादिसकलजगदाधारत्वं 'एष आत्माऽपहतपाप्मा विजरो विमृत्यु'रित्यादिना प्रतिपादितमपहतपाप्मत्वादिगुणाष्टकमित्यादीनां लिङ्गानां भूयस्त्वं स्पष्टमेव 'एष आत्मा अथ य इहात्मानमित्याद्यात्मश्रुतयश्च सन्ति गुणसूत्रोक्ताश्च गत्यादयः तथाच बहूनामेषामनुग्रहाय त्यजेदेकं कुलस्यार्थे इति न्यायेन आकाशश्रुतिरेकाऽन्यथा नीयते बहुबाधस्यान्याय्यत्वात् । न चात्मार्थे पृथिवीं त्यजेदिति ततोऽपि बलवता न्यायेन प्रधानविरोधिनां बहूनामपि गुणानां बाधनं न्याय्यं उपक्रमोपसंहारैकरूप्यावगतप्रधानवेदान्तप्रतिपाद्याद्वैतविरोधिनां बहूनामपि तत्तत्पदसमर्पितप्रवृत्तिनिमित्तभूतधर्माणां बा-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

धाभ्युगमात्सूक्ष्मखादिरादिप्रधानयूपद्रव्यविरोधिनां तक्षणादीनां बहूनामपि बाधस्य पूर्वतन्त्रे * द्रव्यसंस्कारविरोधे द्रव्यतदर्थत्वा * दित्यधिकरणे प्रतिपादनाच्च विप्रतिषिद्धधर्माणां समवाय इत्यधिकरणन्यायो यत्र तुल्यप्रधानानामेव प्रथमचरमभावमात्रं विशेषस्तत्रैव अतएव तत्र पञ्चदशरात्रे अग्निष्टुत्प्रथममहस्तद्धर्मतयोपसत्स्वाग्नेयी सुब्रह्मण्या प्राप्ता उत्तराणि ज्योतिर्गौरायुरित्यादीनि चतुर्दशाहानि तद्धर्मतयैन्द्री प्राप्ता एवमहर्धर्मयोर्विरोधे सत्यन्हां समप्रधानत्वेन गुणप्रधानभावादिविशेषानवगमेन कस्य धर्मो ग्राह्य इत्याकाङ्क्षायां मुख्यत्वादग्निष्टुतस्तद्धर्मग्रहे प्राप्ते पाश्चात्यत्वेपि ज्योतिरादीनां भूयस्त्वात् भूयोनुग्रहस्य न्याय्यतया ज्योतिरादि धर्मो ग्राह्य इति सिद्धान्तितम् । यत्र तु भूयसामेकस्य च गुणप्रधानभावादिविशेषः न तत्र भूयोनुग्रहादरो यथोदाहृतंद्रव्यसंस्कारविरोधाधिकरणे तत्र हि यदा तनुत्वात्तक्षणादिसंस्कारयोग्यः पशुनियोजनमात्रयोग्यः खदिरोलब्धः तत्प्रतिनिधिः कदरस्तु महान् तक्षणादीनामपि योग्यो लब्धः तत्र यूपार्थं कस्योपादानं कर्तव्यमिति संशय्य कदरोपादाने खादिरो यूपो भवतीत्यस्य किं चिद्वैकल्येपि तक्षणादीनां बहूनामनुग्रहलाभात् कदरोपादानं युक्तमिति प्राप्ते बहूनामपि तक्षणादिसंस्काराणां द्रव्यार्थत्वाद्गुणानुरोधेन प्रधानपरित्यागो न युक्त इति खदिरोपादानं कर्तव्यमिति सिद्धान्तितं । अनुनिर्वाप्याधिकरणे च अग्निचयने अग्नीषोमीयस्य पशुपरोडाशमष्टौ देवसुवां हवींष्यनु निर्वपतीत्यत्र किमग्नीषोमीयपशुधर्मा एकादश प्रयाजत्वादयो ग्राह्या उत अनुनिर्वाप्यधर्माः पञ्च प्रयाजत्वादय इति संशय्य भूयोऽनुग्रहन्यायेनानुनिर्वाप्यधर्मग्रहे प्राप्ते यत्र सर्वेषां तन्त्रतया न गृह्यते विशेषः तत्र मुख्यानुग्रहन्यायापवादोभूयोऽनुग्रहः यत्र त्वेकस्तन्त्री इतरे प्रसङ्गिन इति गृह्यते विशेषः तत्रैकस्यापि तन्त्रिण एव धर्मा ग्राह्या बहूनामपि प्रसङ्गिनां तत्तत्तन्त्रोपजीवित्वेन स्वधर्माप्रयोजकत्वादिति निर्णीतमिति चेन्मैवं वेदान्ते ऽद्वैतवदिहोपासनापरे आकाशशब्दितस्य प्रतिपाद्यत्वरूपप्राधान्यासिद्धेः विधीयमानक्रियाकर्मत्वलक्षणस्य खदिरादिवत्प्राधान्यस्य ब्रह्मलिङ्गभूतेषु गुणेष्वप्यविशिष्टत्वात् 'अथ य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान्कामान् तेषां सर्वेषु लोकेषु कामचारोभवतीति' तेषामप्युपास्य-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्वनिर्देशादग्नीषोमीयवत् तन्त्रित्वलक्षणविशेषस्य चेह शङ्कनास्पदत्वात् तस्माद्दहराकाशो ब्रह्मेति बव्हनुग्रहन्यायेन निर्णयो नोपसंहारप्राबल्येनानन्वस्त्वेवमेतत् तथापि तस्मिन् यदन्तरिति दहराकाशस्योपासना विधीयत इति कुतोऽवसीयते 'यावान्वा अयमाकाश इत्यादिना तन्महिमवर्णनादिति चेत् न । पद्मकोशप्रतीकाशमित्यादौ दहरपुण्डरीकवर्णनवत्तदन्तर्वर्तिवस्तुप्रतिपत्त्यर्थत्वेनापि तत्सम्भवात् दहराकाशान्तरवर्ति ततोऽन्यदुपास्यं न सम्भवतीति चेन्न। तदनन्तरमेवोभे अस्मिन् द्यावापृथिवी इत्यादिना तदन्तर्वर्तिवस्तुप्रतिपादनेन तस्योपास्यत्वसम्भवात् । द्यावापृथिव्यादेरुपास्यत्वे अथ य इहात्मानमित्यात्मोपास्तेः फलत्वोपसंहारोविरुद्ध्यत इति चेत्तर्हि तन्मात्रानुसारेण तस्मिन् यदन्तरित्यादेर्दहराकाशरूपपरमात्मोपासनाविधिपरत्वमिति सिद्धमुपसंहारप्राबल्यम् । नच तस्मिन्यदन्तरित्यादेः पुण्डरीकान्तर्वर्तिदहराकाशोपासनाविधिपरत्वं दहराकाशान्तर्वर्तिवस्त्वन्तरोपासनाविधिपरत्वस्यैव तत्स्वारस्येनावधार्यमाणतया सन्देहाभावात् तस्य पुण्डरीकान्तर्वर्तिदहराकाशोपासनाविधिपरत्वे हि तस्मिन्नित्यस्य व्यवहितपुण्डरीकपरामर्शित्वं स्यात् तच्चाव्यवहितदहराकाशपरामर्शित्वसम्भवे न युक्तं दहराकाशस्य पुण्डरीकातर्वर्तित्वस्य दहरोऽस्मिन्नन्तराकाश इत्यनेनैव प्राप्ततया तस्मिन्यदन्तरित्यस्य च वैय्यर्थ्यं स्यात् तदपि तदप्राप्तदहराकाशान्तर्वर्त्तित्वपरत्वेन सार्थकत्वसम्भवे न युक्तं दहराकाशः पुण्डरीकान्तरवर्तीइत्यस्य निर्ज्ञाततया तस्मिन्यदन्तरिति उक्त्यनन्तरं किं तदत्र विद्यत इति प्रश्नोप्यसमञ्जसः स्यात् तदसामञ्जस्यमपि तस्मिन्यदन्तरित्येवं संमुग्धाकारेण दहराकाशान्तरवर्तिनः कस्य चिदुपासनाविधिपरत्वे तस्य विशिष्यावगत्यर्थं किं तदत्र विद्यत इति प्रश्न इति सामञ्जस्यसम्भवे न युक्तं यत्पदस्य दहरोऽस्मिन्नन्तराकाश इति पूर्वनिर्दिष्टनिर्ज्ञातपुल्लिङ्गाकाशपरत्वे च नपुंसकलिङ्गमत्यन्तासङ्गतं स्यात् इति तस्य प्रश्नानन्तरं निर्देश्यमाणानिर्ज्ञातलिङ्गवस्त्वन्तरपरत्वेन कथं चित्सङ्गतिसम्भवे तदसाङ्गत्यमपि न युक्तं एवमपि यत्तस्मिन्यदन्तरित्यस्य दहराकाशोपासनाविधिपरत्वमवगम्यते न तदुपास्तिफलोपसंहारप्राबल्येनेत्येव पर्यवस्यतीति । एतेन तस्मिन्यदन्तरित्यत्र यद्रामानुजीयं कल्पनं त-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्मिन्नित्यव्यवहितो दहराकाशः परामृश्यते यदन्तरिति चास्मिन्कामाः समाहिता इति प्रश्नान्तरनिर्देक्ष्यमाणं कमनीयतया कामशब्दवाच्यं तदवगतमपहतपाप्मत्वादिगुणजातमुच्यते अतो न कश्चित्पूर्वोक्तदोषः तदन्वेष्टव्यमिति तु तन्मात्रस्योपासना न विधीयते। अथ य इहात्मानमिति वाक्यशेषे आत्मनस्तद्गुणानां च उपासनायाः फलवत्वोपसंहारात् किन्तु तस्मिन्निति निर्दिष्टो दहराकाशः यदिति निर्दिष्टं तदन्तर्वर्तिगुणजातं चेत्युभयोरुपासनं विधीयते। न च नपुंसकलिङ्गैकवचनान्तेनोभयपरामर्शानुपपत्तिः, 'नपुंसकमनपुंसके नैकत्रचास्यान्यतरस्यामिति' व्याकरणसूत्रेण नपुंसकानपुंसकयोर्नपुंसकशेषस्य एकवद्भावस्यानुशासनादुभयपरामर्शोपपत्तिरिति, तत्रापि नपुंसकैकवचनान्तस्य यत्पदस्य कामशब्दोक्तानेकगुणपरामर्शित्वातदस्य तस्मिन्यदिति विभिन्नविभक्तिनिर्दिष्टोभयपरामर्शित्वतदेकशेषेइति त्रयमिदं क्लिष्टं स्वतोऽप्रतीयमानमथ य इहात्मानमित्याद्युपसंहारानुसारेणैव कल्पनीयमित्युपसंहारप्राबल्यमवर्जनीयमिति चेत्। उच्यते। यावान्वा अयमाकाशस्तावानेषोन्तर्हृदय आकाश इति एतावता दहराकाशमहिमवर्णनस्य द्यावापृथिव्यादितदङ्गतवस्तुप्रतिपत्यर्थत्वसम्भवेपि तेषां तदङ्गतत्वप्रतिपादनानन्तरमारब्धस्य 'एष आत्माऽपहतपाप्मा' 'अस्मिन्कामाः समाहिता' 'अथय इहात्मान' 'मिमाः प्रजाः अहरर्गच्छन्त्येतं ब्रह्मलोकं न विदन्त्यनृतेन हि प्रत्यूढा' 'अथ य आत्मा स सेतुर्विधृतिरेषां लोकानामसम्भेदाय'त्यादिदहराकाशमहिमप्रपञ्चनस्य तदन्तर्गतवस्तुप्रतिपत्यर्थत्वासम्भवादुपासनार्थत्वावश्यम्भावेन तेषामनन्यथासिद्धानां भूयसामनुग्रहानुरोधेन तस्मिन्यदन्तरित्यादेर्दहराकाशस्यान्वेष्टव्यतापरत्वमवसीयते न तदुपास्तिफलोपसंहारमात्रानुरोधेन। न चैष आत्मेत्यादौ एतदादिशब्दानामव्यवहितद्यावापृथ्यादिपरत्वं शङ्कनीयं पुल्लिङ्गैकवचनान्तानां तेषां व्यवहितेप्याकाश एव स्वारस्यादुभे अस्मिन् द्यावापृथिवी इत्यादौ आकाशे अवगतस्य समाधानाधारत्वस्यास्मिन्कामाः समाहिता इत्यत्र प्रत्यभिज्ञानाच्च तथा च भूयोऽनुग्रहानुरोधेन तस्मिन्यदन्तरित्यत्र तस्मिन्नित्यस्य व्यवहितपुण्डरीकपरामर्शित्वकल्पनं न दोषः सर्वनाम्नामव्यवहितपरामर्शासम्भवे व्यवहितपरामर्शित्वस्य तस्य

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

द्वादशगतं दक्षिणेत्यादौ दृष्टत्वात् । यत्पदं वक्ष्यमाणद्यावापृथिव्यादिसकलविशेषणविशिष्टदहराकाशपरं अन्यथा विशेषणानां विध्य(१)संस्पर्शउपास्यत्वासिद्धेरिति नानुवादवैय्यर्थ्यं अत एव किं तदत्र विद्यत इत्यप्युपपद्यते नह्ययं प्रश्नः किन्त्वाक्षेपोयं अतिस्वल्पे आकाशे विशेषणतया किमन्वेष्टव्यं विज्ञातव्यं वास्तीति अतएव यदिदमस्मिन्ब्रह्मपुर इत्यादेः पुनरनुसङ्कीर्तनं शरीरान्तर्गतं पुण्डरीकमेव तावदल्पमल्पतरं च तदन्तर्गतमाकाशं किं तत्र वर्तते इत्याक्षेपोपयोग्यर्थद्योतनाय, प्रश्नपरत्वे किं तत्र विद्यते एतावदेव वक्तव्यं स्यात् एवमाक्षिप्ते सत्युत्तरवाक्येन भूताकाशसादृश्यप्रतिपादनं तदन्तः सर्वसमाधानप्रतिपादनाय पुण्डरीकवेष्टनकृताल्पत्वव्यावृत्तिपरमिति नासमञ्जसं किं चित् । यच्च नपुंसकलिङ्गासङ्गतिरित्युक्तं तदपि न । लुङः विषये अनद्यतनभूतेपि भूतत्वसामान्यानुवृत्तेस्तद्विवक्षया लुङः प्रयोगस्यैव सर्वविकारानुवृत्तसत्वरजस्तमोगुणानुगतं गुणत्वसामान्यं स्थितिशब्दितं नपुंसकलिङ्गमिति शाब्दिकमर्यादया नपुंसकलिङ्गस्य स्त्रीपुंलिङ्गरूपयोरपि विकारयोरनुगमात्तद्विवक्षया नपुंसकलिङ्गनिर्देशस्योपपत्ते'र्मुखनासिकावचनोऽनुनासिकः' 'द्विगुरेकवचन'मित्यादौ निर्ज्ञातान्यलिङ्गपदान्तरविशेषणानामपि नपुंसकलिङ्गत्वदर्शनाच्च । ननु लिङ्गविशेषनिर्देशात्समानविधानेष्वप्राप्ता सारस्वती स्त्रीत्वादिति पूर्वतन्त्राधिकरणे संस्थानां पशूनां च सामान्याविध्यपक्षे ऽतिरात्रगतायां सारस्वत्यां मेष्यामध्रिगुप्रैषाम्नातस्य प्रास्माअग्निं भरतस्तृणीत बर्हिरित्यस्मै यद्वस्य क्रतुपशुपरामर्शिनोपि लिङ्गत्वादप्रवृत्तिरुक्ता । सत्यं तत्र पुल्लिङ्गस्य स्त्रियामसाधुत्वादप्रवृत्तिरुक्ता अन्वेनम्माता मन्यता मित्यन्वादेशे पुल्लिङ्गनिर्देशेनास्मा इत्यस्य पुल्लिङ्गत्वनिश्चयात् इह तु नपुंसकलिङ्गस्यान्यत्राप्रवृत्तिरुपपादितैव । किं च तत्र पुंस्पशूनामपि सन्निधानात्तेषु चरितार्थस्यास्मैपदस्य सारस्वत्यामप्रवृत्तिर्युक्ता इह तु यत्पदस्य क्व चरितार्थताऽस्तु निर्देक्ष्यमाणेषु द्यावापृथिव्यादिष्वपि लिङ्गवैगुण्यमविशिष्टं अधिकं तु वचनवैगुण्यं यद्यपि तदादिनिर्देक्ष्यमाणविशेषानवगमात् तद्वैगुण्यं न प्रतिसन्धीयते त-

(१) विधिसंस्पर्श इति पु० पा० ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

थापि द्यावापृथिव्यादिनिर्देशानन्तरं तद्वैगुण्यप्रतिसन्धानमवर्जनीयमिति तदा तत्र लिङ्गवचनयोरुभयोरपि कथं चिदुपपादनमन्वेषणीयं तदिहैव लिङ्गमात्रस्योपपादनमन्विष्यताम् ।

यद्वा दहराकाशे परमात्मनि यदन्तर्वर्तते तदन्वेष्टव्यमिति वक्ष्यमाणानां द्यावापृथिव्यादिनां सामान्येनोपासनाविधिः एवं च तस्मिन्नित्यस्य न व्यवहितपरामर्शित्वं न च नपुंसकलिङ्गानुपपत्तिः नापि तस्मिन्यदन्तरिति पुनरनुकीर्तनं व्यर्थमिति शङ्कावकाशः, किं तदत्र विद्यत इति पूर्ववदेव तदन्तर्वर्त्यसम्भवेनाक्षेपे यावान्वा अयमित्यादिना दहराकाशवैभववर्णनापूर्वकं तत्र द्यावापृथिव्यादीनां पित्रादिब्रह्मलोकान्तानां च सत्यकामशब्दितानां तदन्तर्वर्त्तितयोपास्यानामुपन्यासः तस्य दहराकाशस्योपासनाविधिस्तु तदन्तर्गतोपासनाविधिनैवार्थसिद्धः पृष्ठसामगतः(१) सर्वताविधानेनेव पृष्ठसामविधिः न हि दहाराकाशमनुपासीनेन तदन्तर्वर्त्तितया द्यावापृथिव्यादिकमुपासितुं शक्यं एवमर्थसिद्धं दहराकाशस्योपासनं श्रुतं तत्समाहितोपासनं च अथ य इहात्मानमित्यादिफलवाक्ये अनुकीर्तितं इति न कस्याप्यसाङ्गत्यम् । अथ वा तस्मिन्यदन्तस्तत्साधारमन्वेष्टव्यमित्यध्याहारोस्तु अग्रिमानुरोधात् न ह्येतावतोपसंहारेणात्रोपक्रमस्य प्रतीतार्थपरित्यागरूपं अन्यथाकरणं तत्प्रतीतदहराकाशान्तर्वर्त्युपास्यत्वापरित्यागेनैवोपसंहारसमर्पितदहरोपास्यत्वलक्षणाधिकावापमात्रकरणात् । केचित्तु फलवाक्ये दहराकाशस्य धर्मिणस्तद्धर्माणां च पृथगुपासनानुवादमनुरुन्धानास्तस्मिन्यदन्तरित्युपक्रमे यो दहराकाश इत्यध्याहृत्य यो दहराकाशो यच्च तदन्तर्वर्ति गुणजातं तदुभयमुपासनीयमिति वाक्यार्थं वर्णयन्ति तदर्थं च तत्पदे 'त्यदादीनि सर्वैर्नित्यं' 'नपुंसकमनपुंसके नैकवच्चास्यान्यतरस्यामिति' व्याकरणसूत्रानुरोधेन नपुंसकशेषैकवद्भावावङ्गीकृत्योभयपरामर्शित्वमुपपादयन्ति सर्वेप्येते पक्षाः प्रपञ्चेन न्यायरक्षामणावस्माभिरुपपादयिष्यन्ते तस्मात्सिद्धमेतत् दहराधिकरणे नोपसंहारप्राबल्योपजीवनमस्ति न वा सूत्रकारमतिप्राप्तं उत्तरेभ्य इति बहुवचनेन बह्वनुग्रहन्यायस्यैव सूचनादिति । न-

---

(१) गतसर्वता इति पु० पा० ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

न्वाकाशस्तल्लिङ्गादित्यधिकरणे लिङ्गबलेनाकाशश्रुतेरन्यथानयनं कृतमिति तावदविवादं तत्र स्वतः श्रुतेर्दुर्बलस्य लिङ्गस्य 'दुर्बलस्य प्रमाणस्य बलवानाश्रयो यदा । तदापि विपरीतत्वं शिष्टाकोपे यथोदित'मिति न्यायेन बलवदुपष्टम्भकृतमेव बलवत्त्वं वाच्यं तत्र न तावल्लिङ्गस्योपक्रमगतत्वं प्राबल्ये हेतुः उपक्रमे ब्रह्मलिङ्गादर्शनात् । न चा'स्य लोकस्य का गतिराकाश इतिहोवाच सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्त आकाशं प्रत्यस्तं यन्त्याकाशोह्येवैभ्यो ज्यायानाकाशः परायणं स एष परोवरीयानुद्गीथः स एषोऽनन्त' इति विषयवाक्ये प्रश्नस्थं सर्वलोकगतित्वं उपक्रमगतं लिङ्गमिति शङ्कनीयं, प्रश्नस्या'मुष्य लोकस्य का गतिरित्ययं लोक इति होवाचेति' प्रस्तुत पृथिवीलोकगतिमात्रविषयत्वेन सर्वलोकगतिविषयत्वासिद्धेः । न चास्य प्रश्नस्य पृथिवीमात्रविषयत्वे 'अद्भ्यः पृथिवीति' श्रुत्यन्तरे तत्कारणत्वेन प्रसिद्धानामपामेव गतित्वेन वक्तव्यतया आकाश इति होवाचेत्युत्तरासङ्गत्यमिति वाच्यम् । पृथिवीं प्रत्यपां साक्षात्कारणत्वेपि परम्परया आकाशस्यापि कारणकोटिनिविष्टत्वेन सामगतिपरंपरायामन्नकारणत्वेन पूर्वं गृहीता अपो विहायाकाशो गतित्वेनोक्त इत्युपक्रमप्राबल्यवादे तदनुरोधेन तत्साङ्गत्यवर्णनोपपत्तेः पूर्वग्रन्थे 'का साम्नोगतिरिति स्वर इति होवाच स्वरस्य का गतिरिति प्राण इति होवाच प्राणस्य का गतिरिति अन्नमिति होवाच अन्नस्य का गतिरिति आप इति होवाच अपां का गतिरिति असौ लोक इतिहोवाच इति' शालावत्यदाल्भ्यप्रश्नप्रतिवचनपरम्परायामन्नगतित्वेनापां गृहीतत्वात् नाप्युपसंहारग(१)त्वेपि भूयस्त्वं प्राबल्ये हेतुः उपासनापरेपि वाक्ये गतिविषयप्रश्नप्रतिवचनदर्शनादवान्तरतात्पर्येणाकाशस्य सामगतिपरम्पराविश्रान्तिभूमित्वेन प्रतिपाद्यत्वावगत्या प्रधानविरोधिनां भूयसामप्यनादरणीयत्वात् प्रधानश्रुत्यनुसारेण सर्वकारणत्वसर्वलयस्थानत्वसर्वतोज्यायस्त्वपरायणत्वपरोवरीयस्त्वानन्तत्वलिङ्गानामेव भूयसामप्यन्यथानयनस्योचितत्वात् सूत्रे तल्लिङ्गादित्येकवचनस्वारस्येन भूयस्त्वापेक्षेण केन चिदेव लिङ्गेन श्रुतेरन्यथा-

---

(१) नाप्युपसंहारगतत्वेति ख० पु० पा० ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नयनं विवक्षितमिति प्रतीतेश्च । नचोपसंहारगतत्वेपि सर्वकारण-त्वादेरनन्यथासिद्धत्वं प्राबल्ये हेतुः 'आकाशाद्वायुरिति' श्रुत्यन्त-रसिद्धभूताकाशगतवाय्वादीतरसर्वभूतकारणत्वाभिप्रायेण सर्वका-रणत्वव्यपदेशः अग्रिमसन्दर्भोपि वाय्वादीतरभूतलयस्थानत्वतदपे-क्षज्यायस्त्वादिविषयः इति सर्वेषामन्यथा नेतुं शक्यत्वात् । न चा-काशादेव समुत्पद्यन्ते इति सावधारणं कारणत्वं भूताकाशे न सम्भवति तस्य तेजःप्रभृतिकारणत्वे वाय्वादिकारणान्तरसापे-क्षत्वादिति शङ्कनीयं ब्रह्मणोपि 'वैषम्यनैर्घृण्ये न सापेक्षत्वादिति' न्यायेन जगत्सृष्टौ कालादृष्टादिसापेक्षत्वेन साम्यात् कथञ्चिदव-धारणसमर्थनस्य भूताकाशेपि सम्भवात् तस्मात्प्रकारान्तरा-सम्भवादुपसंहारगतत्वमेव लिङ्गस्य प्राबल्यहेतुरिति सिद्धमुपसं-हारप्राबल्यापेक्षणम् ।

अत्रोच्यते । उपक्रमावगततया उक्रमोपसंहारैकरूप्याव-गततया अन्यथासिद्धतया च प्रबलेनानन्तत्वेन लिङ्गेन त-त्राकाशश्रुतेरन्यथानयनं तथाहि उपक्रमे पृथिवीलोकं सा-मगतिपरम्पराविश्रान्तिभूमित्वेन समर्थितवतः शालावत्यस्य पक्षे 'अन्तवद्वै किल ते शालावत्य सामेति' जैवलिना अन्तवत्वदोष उ-द्भावितः तेन उपक्रम एवैतदवगतं स्वयं जैवलिरनन्तमन्यत्सामगति-परम्परापर्यवसानभूमित्वेन विवक्षतीति तदेकरूपश्चोपसंहारः अस्य लोकस्य का गतिरिति शालावत्यपृष्टेन जैवलिना आकाशं गति त्वेनोक्ता स एषोनन्त इति तत्रानन्तत्वस्योपसंहृतत्वात् अनन्य-थासिद्धत्वञ्चानन्तत्वलिङ्गं अनन्तवत्येव भूताकाशे वाय्वादिस्व-कार्यापेक्षयाऽधिककालावस्थायित्वाभिप्रायेणानन्तत्वव्यपदेश इति त्रिदशामरत्वन्यायेन तदनन्यथानयन उपक्रमसङ्कीर्तितान्तवत्त्व-दोषपरिहारालाभात् ततश्च यथा 'जामि वा एतद्यज्ञस्य क्रि-यते यदन्वञ्चौ पुरोडाशौ उपांशु याजमन्तरा यजति विष्णुरु-पांशु यष्टव्योऽजामित्वाय प्रजापतिरुपांशु यष्टव्यो ऽजामित्वाय अ-ग्निषोमौ उपांशु यष्टव्यावजामित्वायेति' वाक्ये उपक्रमे पुरोडाशयाग-द्वयनैरन्तर्येण जामितादोषसङ्कीर्तनेन तत्परिहाराय तयोर्मध्ये किञ्चि-द्विधिस्तिमित्यवगमात् अजामित्वायेति तद्दोषपरिहारोपसंहारै-क्यरूपात् विष्ण्वादिवाक्येषु यागविधिस्वीकारे तद्दोषपरिहारलाभा-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

च तद्दोषपरिहारायान्तरावाक्य एव कल्प्योपि यागविधिः स्वीकर्तव्य इति जामितादोषपरिहारानुसारेण विष्ण्वादिवाक्येषु प्रत्यक्षाया अपि श्रुतेरन्यथानयनं तत्वानुसारेणाकाशश्रुतेरिति ।

नन्वेवं स्वर्गलोकं सामगतिपरम्परापर्यवसानभूमित्वेन समर्थितवतोदालभ्यस्य पक्षे शालावत्यकृतेन 'अप्रतिष्ठितं वै किल दालभ्य सामे'त्यप्रतिष्ठितत्वदोषोद्भावनेन शालावत्यः स्वयं प्रतिष्ठारूपं किञ्चित्तत्वेन विवक्षतीत्यनुमानात्तदनन्तरमयं लोक इति होवाचेति शालावत्यवचनमपि ब्रह्मविषयं स्यात् ब्रह्मण एवासङ्कुचितसर्वप्रतिष्ठारूपत्वात् 'ब्रह्मपुच्छं प्रतिष्ठेति' श्रवणाच्च। मैवम्। तदनन्तरं तद्ब्रह्मत्वगमकान्तवत्वश्रवणात्तद्गत्यन्तरप्रपञ्चानुसारेण च तस्य प्रतिष्ठालोकत्वप्रसिद्धेः पृथिवीलोक एव विश्रान्तेः भूयोनुग्रहन्यायात् 'इतः प्रदानं देवा उपजीवन्ति' इति श्रुत्यन्तरानुसारेण 'अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते । आदित्याज्जायते वृष्टिः वृष्टेरन्नं ततः प्रजा इति' स्मृत्यनुसारेण पृथिवीलोकस्य स्वर्गलोकगतित्वौचित्याच्च । नचाकाशस्यानन्तत्वकीर्तनानन्तरं तद्विरुद्धश्रवणमण्वप्यस्ति वा न वा भूताकाशस्य पृथिवीलोकगतित्वौचित्यमस्ति पृथिवीं तद्गतं प्राणिनिकायं वा प्रति विशिष्य भूताकाशस्योपजीव्यत्वप्रसिध्यभावात् सामादीन्प्रति तथोपजीव्यत्वेन लोकतः श्रुतितो वा प्रसिद्धानामेव स्वरादीनां सामगतित्वस्य पूर्वग्रन्थे वर्णनात् तर्हि पृथिवीलोकं प्रति ब्रह्मणोपि विशिष्य गतित्वप्रसिद्धिर्नास्तीति तस्यापि पृथिवीलोकगतित्ववचनं समञ्जसं न स्यादिति चेत् । सत्यम् । नास्माभिरस्य लोकस्येति शालावत्यप्रश्नः पृथिवीलोकगतिविषय इत्युपेयते किंतु सर्वलोकगतिविषय इति पृथिवीलोकमात्रगतिविषयत्वे प्रत्यक्षादिसन्निधापितसमस्तपरामर्शशक्तयोरस्य लोकस्येति श्रुत्योः पृथिवीलोकसन्निधानेन सङ्कोचकल्पनापत्तेः सर्वाणिह वा इमानि भूतानि इत्याद्यग्रिमप्रपञ्चस्यासामञ्जस्यापत्तेश्च आकाशस्य सर्वलोकगतित्वोक्तौ हि तदुपादनार्थं अग्रिमप्रपञ्चः सङ्गच्छते सर्वभूतोत्पत्तिलयस्थानत्वात् सर्वलोकं प्रति गतित्वमुपजीव्यत्वरूपमुपपन्नमिति पृथिवीमात्रगतित्वोक्तौ तावन्न वक्तव्यं स्यात् । ननु स्वर्गलोकं प्रति पृथिवीलोकस्य गतित्वे उक्ते पृथिवीलोकं प्रत्येव गतौ प्रष्टव्यायां सर्वलोकगतिप्रश्नस्य कथं सङ्गतिरिति चेत् इत्थं अन्तव-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

द्वै किल त इति अन्तवत्त्वदोषोद्भावनेन स्वयमनन्तं जैवलिर्गतित्वेन विवक्षतीति तावदवगतं अनन्तं च देशतः कालतो वस्तुतस्तथ परिच्छेदरहितं वस्तुतः पदच्छेदराहित्यं च सर्वोपादानतया सर्वात्मकस्यैव सम्भवति तथ ,सर्वलोकगतिरूपमिति निश्चित्य तर्हि सर्वलोकगतिरूपमनन्तं वस्त्विति प्रश्न इति एवं सर्वलोकगतौ पृष्टायां तथात्वेन 'यतो वा इमानि भूतानि जायन्ते' 'कोह्येवान्यात्कः प्राण्यादि'त्यादिश्रुत्यन्तरे ब्रह्म प्रसिद्धमिति तस्य गतित्ववचनं युज्यते अतएवानन्तरग्रन्थे सर्वाणि हवा इति हवै शब्देन सैव प्रसिद्धिर्द्योत्यते एवं चोपक्रमगतसर्वलोकगतित्वलिङ्गेनाप्याकाशश्रुतेरन्यथानयनमविकलं तथा भूयोनुग्रहन्यायेनाप्याकाशेसर्वलोकगतिसम्बन्धस्यैवावान्तरतात्पर्येणापि प्रतिपाद्यतया आकाशस्य स्वरूपतः प्रतिपाद्यत्वरूपप्राधान्यासिद्धेः । नन्वाकाशश्रुतिरपि पञ्चषवारमभ्यस्तेति भूयोऽनुग्रहन्याय उभयत्रापि तुल्य इति चेन्न। सर्वलोकगतित्वादीनामनन्तत्वपर्यन्तानां लिङ्गानां तदपेक्षया भूयस्त्वात् लिङ्गानुग्रहेपि श्रुतीनामपि कासां चिदनुग्रहलाभेन श्रुतिसाहित्येन भूयस्तरत्वाच्च लिङ्गान्यथाकरणे हि भूतश्रुतेराकाशसाधारणायाः सर्वश्रुतेश्च तत्साधारणसामस्त्यवाचिकाया आकाशव्यतिरिक्तेषु सङ्कोचरूपोबाधः कल्पनीयः स एषोनन्त इत्यत्र निषेध्यसमर्पकस्यान्तशब्दस्य चाल्पकालावस्थायित्वे लक्षणा कल्पनीया आकाशादेवेत्यवधारणश्रुतेश्चात्यन्तबाधः कल्पनीयः अवधारणश्रुतिर्हि उपात्तसजातीयं व्यवच्छिनत्ति अतएव गृहमधीये परिङ्ख्यापक्षे आज्यभागौ यजतीत्यस्यावधारणार्थलक्षकस्याज्यभागसजातीययागान्तरव्यवच्छेदकत्वं स्विष्टकृद्विधानस्येवावधारणार्थे लक्षकस्य शेषकार्यान्तरव्यवच्छेदकत्वं च पूर्वतन्त्रे*स्विष्टकृदिति भक्षप्रतिषेधः स्या*दित्यधिकरणे दर्शितं एवञ्चाकाशशब्दस्य मूलकारणब्रह्मपरत्वे भूतेषु तादृशकारणान्तराभावात्सङ्कतावधारणश्रुतिरवान्तरकारणभूताकाशपरत्वे तु तेजः प्रभृतिषु वाय्वादीनामपि तादृशकारणानां सत्त्वेन तद्व्यवच्छेदासम्भवादसङ्कताऽवधारणश्रुतिःस्यात् नहिपूर्वतन्त्रे श्रुत्या मन्त्रलिङ्गबाधे श्रुतिकल्पनामात्रबाधवदिह श्रुत्युपस्थाप्यब्रह्मलिङ्गबाधे श्रुतिकल्पनामात्रबाधः किन्तु तत्तल्लिङ्गोपस्थापककोट्यन्तर्गतक्लृप्तश्रुतिबाधोप्यवर्जनीयः एवञ्च भूयसीनां ब्रह्म-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

लिङ्गश्रुतीनामनुग्रहायाकाशश्रुतिरन्यथा नेयेत्यपि युक्तमेव तस्मादाकाशाधिकरणेपि नोपसंहारप्राबल्योपजीवनशङ्कावकाशः एवमन्यत्रापि तत्र तत्र सम्भावितानां शङ्काशूकानां निरसनमूहनीयं तस्मादुत्तरमीमांसायामप्युपक्रमप्राबल्यमविगीतं एवं च सकलमीमांसकव्यवहारविरुद्धोनयसरणिगन्धानभिज्ञैरर्वाचीनैः स्वमतस्येतरमतवैलक्षण्यप्रकटनाय कल्पितोपक्रमोपसंहारबलाबलव्यत्ययो यवनगुरूपदिष्टशौचमुखप्रक्षालनपौर्वापर्यव्यत्यासवदुपेक्षणीयः प्रामाणिकैरिति सिद्धम् ।

विद्वद्गुरोर्विहितविश्वजिदध्वरस्य
श्रीसर्वतोमुखमहाव्रतयाजिसूनोः ॥
श्रीरङ्गराजमखिनः श्रितचन्द्रमौलि-
रस्त्यप्यदीक्षित इति प्रथितस्तनूजः ॥
अकरोदयमक्लिष्टमात्मबुद्धिविशुद्धये ।
उपसंहृतदुर्न्यायमुपक्रमराक्रमम् ॥

इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभ श्रीमदद्वैतविद्याचार्य श्रीरङ्गराजाध्वरिवरसूनोरप्पयदीक्षितस्य कृतिरुपक्रमपराक्रमः सम्पूर्णः ।

॥ श्रीहरिर्जयति ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सूचीपत्रम् ।

गणपाठः	०	४	०
गोलप्रकाशः	२	८	०
गंगालहरी	०	१	०
गुरुसारणी	०	४	०
जातकतत्त्वम्	०	१२	०
तत्त्वदीप	०	१	०
तर्कसंग्रहः	०	१	६
दत्तकमीमांसा	०	८	०
धर्म्मशास्त्रसंग्रहः	०	१	६
धातुपाठः (शिला -))	०	२	०
धातुरूपावली	०	२	६
नैषध चरित नारायणी टीका टाइप	४	०	०
परिभाषापाठः	०	०	०
पाणिनीयशिक्षा भाष्यसहिता	०	२	०
प्रथम परीक्षा	०	२	०
प्रथमपुस्तक हिन्दी	०	१	०
प्रश्नभूषणम् (प्रश्न विचार का बहुत उत्तम ग्रन्थ)	०	४	०
बीजगणितम् (म० म० पं० सुधाकरकृतटिप्पणीसहित)	१	४	०
भट्टीकाव्य ५ सर्ग	०	६	०
मनोरमा शब्दरत्नसहिता (टाइप)	९	०	०
लघुकौमुदी टिप्पणीसहिता	०	४	०
लक्षणावली	०	२	०
लीलावती (म० म० पं० सुधाकरकृतटिप्पणीसहित)	१	०	०
वसिष्ठसिद्धान्तः	०	१	६
वार्तिकपाठः	०	४	०
विष्णुसहस्रनाम	०	१	०
शब्दरूपावली	०	१	६
शृङ्गार सप्तशती	१	८	०
समासचक्रम्	०	१	०
समासचन्द्रिका	०	१	०
सरस्वतीकण्ठाभरणम्	३	०	०
साङ्ख्यचन्द्रिका टिप्पणीसहिता	०	८	०
साङ्ख्यतत्त्वकौमुदी	०	६	०
सिद्धान्तकौमुदी	४	०	०
सिद्धान्तमुक्तावली दिनकरीटिप्पणीसहिता	३	०	०
उपसर्गवृत्ति	०	१	०

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

बनारससंस्कृतसीरीज़नाम्नी वाराणसेयसंस्कृतपुस्तकावली ।

इयं पुस्तकावली खण्डशो मुद्रिता भवति । अस्यां संस्कृतभाषानिबद्धा बहवः प्राचीना दुर्लभा उत्तमोत्तमाः केचिदङ्गलभाषानुवादसहिताश्च ग्रन्था मुद्रिता भवन्ति । तांश्च ग्रन्थान् काशिकराजकीयसंस्कृतपाठशालीयपण्डिता अन्ये ऽपि विद्वांसः शोधयन्ति । यैर्ग्राहकमहाशयैरियं पुस्तकावली नियमेनाविच्छेदेन संग्राह्या तैस्तदेकैकस्य खण्डस्य ॥।) मूल्यं प्रापणव्ययश्च =) देयः । अन्यैर्महाशयैर्यैः कानिचित् खण्डानि संग्राह्याणि तैश्च प्रत्येकं खण्डानां १) मूल्यं प्रापणव्ययश्च =) देय इति ॥

तत्र मुद्रिता ग्रन्थाः ।

	रु०	आ०
सिद्धान्ततत्त्वविवेकः खण्डानि ५	५	०
अर्थसङ्ग्रहः अंग्रेजीभाषानुवादसहितः	१	०
तन्त्रवार्त्तिकम् खण्डानि १३	१३	०
कात्यायनमहर्षिप्रणीतं शुक्लयजुःप्रातिशाख्यम् सभाष्यं ख० ६	६	०
सांख्यकारिका चन्द्रिकाटीकागौडपादभाष्यसहिता	१	०
वाक्यपदीयम् खण्डानि ३	३	०
रसगङ्गाधरः खण्डानि ९	९	०
परिभाषावृत्तिः खण्डे २	२	०
वैशेषिकदर्शनं किरणावलीटीकासंवलितप्रशस्तपादप्रणीतभाष्यसहितम् खण्डे २	२	०
शिक्षासङ्ग्रहः खण्डानि ५	५	०
नैष्कर्म्यसिद्धिः खण्डानि ४	४	०
महर्षिकात्यायनप्रणीतं शुक्लयजुस्सर्वानुक्रमसूत्रम् सभाष्यम्	३	०
ऋग्वेदीयशौनकप्रातिशाख्यं सभाष्यम् खण्डानि ४	४	०
(बृहत्) वैयाकरणभूषणम् पदार्थदीपिकासहितम् खण्डानि ४	४	०
विवरणोपन्यासः सटीकवाक्यसुधासहितः खण्डे २	२	०
तत्त्वदीपनम् (पञ्चपादिकाविवरणस्य व्याख्यानम्) ख० ८	८	०
वेदान्तदीपः (श्रीभगवद्रामानुजाचार्यविरचितः) खण्डानि ३	३	०
टुप्टीका खण्डानि ४	४	०
पातञ्जलदर्शनम्।श्रीरामानन्दयतिकृतमणिप्रभाऽऽख्यवृत्ति स०	१	०
व्याकरणमिताक्षरा । श्रीमदर्णभट्टप्रणीता खण्डानि० ४	४	०
रसमञ्जरी । व्यङ्ग्यार्थकौमुद्या प्रकाशेन च सहिता ख० ३	३	०
भेदधिक्कारः व्याख्यासहितः श्रीमदप्पयदीक्षितकृत उपक्रमपराक्रमसहितः खण्डे २	२	०
बोधसारो नरहरिकृतः तच्छिष्यदिवाकरकृतटीकया स० ख० २	२	०
ब्रह्मसूत्रदीपिका श्रीमच्छङ्करानन्दभगवद्विरचिता ।	१	०

ब्रजभूषण दास और कम्पनी

चांदनीचौक के उत्तर नई सड़क बनारस ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri